भट्टवागीश्वर प्रणीता

न्यायतात्पर्यदीपिका

सम्पादकः

डॉ. किशोर नाथ झा

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठम्, प्रयागः

भट्टवागीश्वरप्रणीता

न्यायतात्पर्यदीपिका

प्रस्तावना लेखक :

प्रो० श्रीमदनन्तलालठाकुरः

भूतपूर्व निदेशकः

काशीप्रसाद जायसवालशोधसंस्थानम्

पटना

सम्पादकः

डा० किशोरनाथ झा

व्याख्याता

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

इलाहाबाद

गंगानाथझा केन्द्रीय संस्कृत विद्यापीठम्

मोतीलाल नेहरू पार्क

इलाहाबाद-२

१९७९ ई०

प्रकाशक :
डा० गयाचरणत्रिपाठी
प्राचार्य :
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

मूल्यम् :

मुद्रक :
श्री विष्णु आर्ट प्रेस
२५७ चक, जीरो रोड, इलाहाबाद

18/3/81

FOREWORD

It is a matter of great satisfaction that this Vidyapeetha is publishing yet another commentary on the Nyāyasūtras in the form of this work. The first commentary published last year is the Gautamīyasūtraprakāśa by Keśava Miśra. The present commentary called *Nyāyatātparyadīpikā* is written by one Bhaṭṭa Vāgīśvara about whom very little, if anything, is known except that he appears to be a Southerner.

The only available manuscript of this work is preserved in the Govt. Oriental Manuscript Library of Madras and is said to have been procured from somewhere in Keralā. The work attracted attention of Prof. Anantlal Thakur of Darbhanga, the renowned Veteran scholar of Nyaya. He got it copied and gave it to Dr. Kishore Nath Jha, then his pupil, for purpose of revising the text and bringing it out in 1967-78 when Dr. Jha was a senior Research Fellow at the Darbhanga University. Due to his pre-occupation with other works, Dr. Jha could take up this work only in early seventies and finished it in the middle of 1977.

Dr. Jha has competently edited the work Gautamīya-sūtraprakāśa which has been widely acclaimed. I am confident that the students as also the scholars of Nyaya shall welcome the publication of this work.

Prof. Thakur has very kindly supplied a scholarly preface to this work which traces the development of the Nyaya system of philosophy and deals with its importance on the basis of the original sources, namely the *Sūtras* and the *Bhāṣya*. I express my sincere gratitude to him and hope that the book shall be received well by the public.

Dr. G. C. Tripathi,
Principal
G. N. Jha Kendriya Sanskrit Vidyapeetha
Allahabad.

प्रास्ताविकं किञ्चित्

भगवतो विश्वेश्वरस्यानुग्रहेणैतस्या न्यायसूत्रवृत्त्यात्मिकाया **भट्टवागीश्वर-प्रणीताया न्यायतात्पर्यदीपिकायाः** स्वरूपं न्यायशास्त्रविवेचकानां पुरतः प्रथमत उपस्थापयताऽद्य महान् प्रमोदोऽनुभूयते। वर्षाण्यतीतानि अद्याऽपि स्मर्यते तन्माङ्गलिकं दिनं यस्मिन्नहनि गुरुवर्या **प्रो० श्री अनन्तलालठाकुरमहाशया** निसर्गतोऽस्मिन् जने कृपाशीला आग्रहप्रयत्नाभ्यां मद्रासनगरस्य राजकीय-प्राच्यविद्यामातृकागारतः स्वयं सम्पादनाय संगृहीतामस्या मातृकां जनायास्मै ससुखं सम्पादनार्थं दत्तवन्त इति। पश्चात् कृतेऽप्यायासे नापरा मातृकास्याः कुत्रापि समुलब्धेति स्वाभाविकमेव सम्पादने स्खलनं कष्टानुभवश्च। मातृकायां स्थाने स्थाने पाठभ्रंशो यद्यपि ग्रन्थमेतं सामीक्षिकसम्पादनानुरूपगुणविरहित-मकरोत् तथापि **न्यायभाष्यवार्त्तिकतात्पर्यटीका**दिप्राचीनग्रन्थाशयानां सारांश-मात्रसङ्कलने दत्तचित्तस्य वृत्तिकृतोऽस्य **भट्टवागीश्वरस्य** कृतिरियं प्रकाशिता सती न केवलं न्यायशास्त्रे प्रविविक्षूणां जनानामपि तु गवेषकाणामपि महान्त-मुपकारं विधास्यतीति कृत्वैव प्रवृत्तिरिह।

यद्यपि तथ्यमिदं यत् न्यायशास्त्रस्य जन्मभूमौ मिथिलायां न्यायसूत्राणां पाठनिर्णयविधौ विद्वद्भिरनेकधा प्रयत्नः कृतः। अतएव **वृद्धवाचस्पतिमिश्रस्य न्यायसूचीनिबन्धः, द्वितीयवाचस्पतिमिश्रस्य न्यायसूत्रोद्धारश्च** दृष्टिपथातिथ्यं भजेते। वृत्तिकारेष्वपि **वंशधरोपाध्यायस्य गौतमीयसूत्रप्रकाशकृतः** केशवमिश्रस्या-न्येषां चास्मिन् विषये पारस्परिकं वैमत्यं गवेषकाणां कृते प्रचुरां सामग्रीं प्रस्तौति। तथापि अनिश्चितदेशकालस्यात एवापरिचितस्य **भट्टवगीश्वर य** कृतिरियं सूत्रपाठविधौ स्थितित्रयमुपस्थापयति। तद्यथेह वृत्तौ एकादश भाष्य-वाक्यानि सूत्रतया परिगणितानि, त्रयोदशसूत्रेषु पाठभेदा विहिताः, प्रसिद्धानां षड्विंशतिसूत्राणां च लोपोऽत्र कृतः। इत्थं पञ्चाशत् स्थलेषु भट्टवागीश्वरेण सूत्रपरिवर्तनादिकमकरोदिति यथास्थानं विद्वांसोऽवलोकयिष्यन्ति। न चात्रासौ किमपि निर्दिशति कारणमपि तु मौन एवावतिष्ठते।

सम्पादनावसरे पाठसंशोधनादिकार्येषु यथामति विहितेऽप्यवधाने मुद्रणादि-दोषा प्रमादान्मतिमान्द्याच्च समागता एवेति मर्षयिष्यन्ति गुणगृह्या वचने विपश्चितः। आधुनिकगवेषकाणामुपकाराय परिशिष्टेषु आलोचनात्मिका टिप्पणी, सूत्रसूची, विशिष्टशब्दसूची, समुद्धृताचार्यग्रन्थसूची च समावेशिताः।

मातृका चास्या शतपत्रात्मिका १०$\frac{३}{४}$×९$\frac{१}{४}$ आकारा देवनागराक्षरेषु लिखिता प्रतिपत्रं विंशतिपंक्तिमिता १९२०, २१ तमयोः खिष्टाब्दयोः चेन्नामङ्गलम्

पारुर इत्याख्ये कौचीन प्रान्ते समुपलब्धाया मातृकाया प्रतिलिपिरूपा मद्रासनगरस्य राजकीयप्राच्यविद्यामातृकागारेऽस्ति संरक्षिता ।

सन्त्यत्र कार्तज्ञ्यभाजनानि विद्यापीठस्यास्य प्राचार्याः कल्याणमित्राणि **डा० गयाचरणत्रिपाठिमहाशयाः** । एतेषां कार्यालयीयसाहाय्येन वात्सल्यपूर्णपरामर्शादिना च सम्पादनप्रकाशनयोः सर्वविधं सौलभ्यमनुभूतमिति । गुरुचरणाः **प्रो० श्री अनन्तलालठाकुरमहाशयास्तु** न केवलं मातृकामेव सम्पादनाय दत्तवन्तोऽपि तु विस्तृतां भूमिकामपि ग्रन्थगौरवानुरूपां लिखितवन्त इति उभयेभ्यः प्रणामाञ्जलिः समर्प्यते । पण्डित के० रघुनाथन् महोदयः अत्रत्यानुसन्धानसहायकः, श्रीविष्णुआर्टप्रेसव्यवस्थापकश्च साधुवादार्हः वर्तते, यस्य सहयोगोऽत्र समुपलब्ध इति ।

विदुषामाश्रवः
किशोरनाथझाशर्मा
व्याख्याता
गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
प्रयागः

प्रयागः
२०-३-७६

प्रस्तावना

न्यायशास्त्रस्य परिचयः, उत्पत्तिर्विकास उपयोगिता च ।

(१)

संसारेऽस्मिन् युक्तिशास्त्रस्योत्पत्तिः कदा संजातेति निर्णयो न शक्यक्रियः किन्त्वस्य संघटनं भारतवर्षे एव समभूदित्यत्र न सन्देहः । कश्मीरपतेः शङ्कर वर्मणो धर्मसचिवेन **भट्ट जयन्तेनात्र** विचार्य सिद्धान्तितम्—'आदिसर्गात्प्रभृति वेदवदिमा विद्याः प्रवृत्ताः । संक्षेपविस्तरविवक्षया तु तत्र तत्र तांस्तान् कर्तृ नाचक्षत' इति । वस्तुस्थितिविचारेणापि सिद्धान्तोऽयं संगत इति प्रतिभाति । **ऋग्वेदसूक्तेष्वितस्ततो** युक्तिवादस्य स्फुरणमवलोक्यते । **ब्राह्मणग्रन्थेषु** अस्य प्रयोगपरिपाटी प्रत्यक्षीक्रियते । **उपनिषत्सु** चास्य विस्तारः तत्वज्ञानक्षेत्रे सुविदित एव समेषाम् । **रामायणे महाभारते मन्वादिधर्मशास्त्रग्रन्थेषु** शास्त्रत्वेन न्यायस्योल्लेख उपयोगश्च दृश्येते । बहुत्र न्यायशास्त्रीयविषयविवेचनमपि तेषु समुपलभ्यते । **महाभारते** न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः ।

हेत्वागमसदाचाराद् यद्युक्तं तत् प्रगृह्यताम् । इति

उल्लेखेन प्राचीनेऽपि काले न्यायप्रस्थानानि अनेकान्यासन्निति परिज्ञायते ।

[नारदः **'पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषविद्'** आसीत् ।

अश्वत्थामा वितण्डावादेषु रमते स्म इति **महाभारतोक्तिः** । न्यायशास्त्रकर्तुः परिचयो बहुधा दत्तो **महाभारते** । यज्ञसभासु ऋषीणामाश्रमेषु च वादानां जल्पानां वितण्डानां व्यवहाराः वर्णिताः । उपलभ्यमानस्य न्यायदर्शनस्य पर्यालोचनातोऽपि अस्य पृष्ठभूमौ सुदीर्घा गवेषणा, महानैयायिकानां चानेकेषामवदानमास्तामिति विज्ञायते । अत्र प्रकरणेषु भगवता **अक्षपादेन** प्रतिपक्षाणां मतानि समुपन्यस्य युक्त्या तत्खण्डनं विधाय च स्वसिद्धान्ताः प्रतिष्ठापिता इति स्पष्टमेतत् । सर्वे एवात्र पूर्वपक्षाः कल्पिता इति मतं सर्वथा अश्रद्धेयमेव । न सर्वाणि पूर्वपक्षमतानि प्राचीनेषु ग्रन्थान्तरेषूपलभ्यन्त इत्यत्र प्राचीनग्रन्थानां विलोप एव कारणं मन्तव्यम् । बहुत्र पूर्वपक्षीययुक्तयस्तत्सदृशा वा विषया समुपलभ्यन्तेऽपि । **वात्स्या**

यनकृतान्न्यायभाष्यादारभ्य न्यायाचार्यस्योदयनस्य तात्पर्यपरिशुद्धिं यावत् सर्वत्र पूर्वपक्षयुक्तयः प्राचीनबौद्धादिग्रन्थेभ्यः समाहृता इति निश्चप्रचम्। तदनुसारं सूत्रकारोऽपि वास्तवमतान्येव खण्डितवानिति संभाव्यतेतराम्। न्यायसूत्रकृदक्षपादः कदावतीर्णो बभूवेत्यत्र वादिनां विप्रतिपत्तयः सन्ति। बहवः एनं ख्रिष्टीयद्वितीये शतके स्थापितवन्तः। न्यायसूत्रेषु पूर्वपक्षत्वेन बौद्धमतानि समागच्छन्तीति तु तथ्यम्। तत्र शून्यवादोऽपि दृश्यते। परमयं शून्यवादः अपराणि च बौद्धमतानि न सर्वथा नागार्जुनग्रन्थानुसारीणीति कृत्वा ततः प्राचीनतराणीति मन्तव्यम्। अन्यच्च अचार्य नागार्जुनेन विग्रहव्यावर्तन्यां वैपुल्यसूत्रे च न्यायसूत्रतः न्यायभाष्याच्च शब्दानां विषयाणां च संग्रहः कृतः। प्रमाणविहेटने चानेन षोडशपदार्थवादो ऽक्षपादीयः खण्डित इति परिज्ञायते। अतो नागार्जुनादवरोऽक्षपादो गौतम इति वादो न युक्त इत्येव मन्तव्यम्।

अर्थशास्त्रकृत् कौटिल्यो विष्णुगुप्तो न्यायशास्त्रम् आन्वीक्षिकीशब्देन समुल्लिखितवानिति सुविज्ञातम्। परं तत्र आन्वीक्षिक्या विभागप्रदर्शनविधौ 'सांख्यं योगो लोकयतं चेति' त्रैविध्यमात्रस्योल्लेखात्, न्यायशास्त्रस्य च तत्राग्रहणात् न न्यायशास्त्रं कौटिल्यतः प्राचीनतरमिति न शोभनं मतम्। अत्र योग शब्देनैव कौटिल्येन न्यायशास्त्रं समुद्दिष्टम्। योगशब्देन यौगशब्देन च नैयायिकानां वैशेषिकाणां वा बाहुल्येन निर्देशदर्शनात्। स्वयं च न्यायभाष्यकारेण 'असदुत्पद्यते उत्पन्नं निरुध्यत' इति योगानामिति कण्ठतोऽसत्कार्यवादिनां योगपदवाच्यानां नैयायिकवैशेषिकाणां समुल्लेखो विहित इति दृश्यते। अत्रेदमवधेयम्। पातञ्जलयोगस्य सेश्वरसांख्यत्वेनैव प्राक् प्रसिद्धिरासीत्। नैयायिकानां योगशब्देनाभिधानं तेषां पाशुपतयोगानुसारित्वात् परमाणुसंयोगेभ्यो द्वचणुकादिक्रमेण क्षित्यादिसृष्टेर्वेति विशेषविदामाशयः।

अत्र कौटिल्यवचस्येवावधानं देयम्—''सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी, धर्माधर्मौ त्रय्यामर्थानर्थौ वार्त्तायाम्, नयानयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिरन्वीक्षमाणा लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति प्रज्ञावाक्यवैशारद्यं च करोति।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता'' ॥ इति

इयं प्रशंसा न्यायशास्त्रस्यैवेति संभाव्यते। वात्स्यायनेन कौटिल्यकृतस्य श्लोकस्यैव पदत्रयं समुद्धृतं विद्योद्देशप्रकारणादिति स्वकण्ठतः स्वीकृतम्। अतोऽस्माभिर्न्यायदर्शनस्य वर्तमानरूपप्राप्तिः बौद्धविप्लवादनन्तरं कौटिल्याच्च प्रागिति स्वीकर्तव्यम्।

अत्र संक्षिप्य न्यायशास्त्रप्रतिपाद्येषु षोडशपदार्थेषु सहैव संश्लिष्टेषु दार्शनिकसिद्धान्तेषु विहङ्गमदृष्टिर्देया। न्यायदृष्ट्या पदार्थतत्त्वज्ञानं निःश्रेयससाधनमिति सुविदितम्। तत्त्वज्ञानमेव प्रमितिशब्देन परिज्ञायते, प्रमितिसमुत्पत्तौ तस्या विषयोऽपेक्ष्यते। विषयश्चासौ प्रमेयपदवाच्यः। अपेक्ष्यते च कर्ता। स एव प्रमाता। प्रमातुश्च प्रमेयविषयिणी प्रमितिः प्रमाणानामनुग्रहादेव संभवतीति प्रमाणानामपि तत्रापेक्षा भवति। अस्मिन् शास्त्रे प्रमाणानां प्राधान्येन विवेचनात् प्रमाणशास्त्रमिदमिति प्रसिद्धिः। अत्राह भगवान् भाष्यकारः अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति। अन्यतमापायेऽर्थस्यानुपपत्तेरिति। प्रमाणेष्वपि अत्र अनुमानस्य प्रामुख्याद् आन्वीक्षिकीत्यपरमन्वर्थकं व्युत्पत्तिमूलकं नामधेयं शास्त्रस्य। तेनैव नाम्ना **मन्वादिशास्त्रेषु कौटिल्यादिभिश्चास्य** निर्देशो दृश्यते।

शास्त्रेऽस्मिन् प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क निर्णयवादजल्पवितण्डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानान्निः श्रेयसाधिगम इति आद्यं सूत्रम्। त्रिवधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणम् परीक्षा चेति। तत्रादिमे सूत्रे उद्देशः कृतः। समुद्दिष्टानां षोडश पदार्थानां लक्षणं प्रधान्येन प्रथमेऽध्याये। सति संम्भवे विभागश्च तत्र प्रदर्शितः। छलस्य तु परीक्षापि तत्रैव समायाता। द्वितीयतृतीयचतुर्थाध्यायेषु संशयस्य चतुर्णां प्रमाणानां द्वादशानां प्रमेयाणां च परीक्षणं समायाति। पञ्चमाध्याये जातिनिग्रहस्थानानां विभागपूर्वकं लक्षणं परीक्षणं च कृते। अत्र प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति ज्ञेयम्। न न्यूनानि न चाधिकानि। अन्यदर्शनदृष्टानामेष्वेवान्तर्भावः प्रदर्शितः शास्त्रकारेण। द्वादशप्रमेयेषु प्रमाता आत्मा अधिगन्तव्यो मोक्षश्च तेन सहोपादेयः। शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखरूपाणि च दश परिहेयानि।

न्यायवाक्यस्य पञ्चावयवोपपन्नस्य प्रयोगात् तत्वज्ञानं श्रोतृषु संक्रान्तं भवति। ततः पूर्वं संशयप्रयोजनदृष्टान्तानां ज्ञानमपेक्षितं भवति। जिज्ञासा ज्ञानस्य जननीति प्रसिद्धा। ऋते संशयं जिज्ञासायाः तत्वज्ञानस्य वोदयो न संभवति। अतो न्यायपूर्वाङ्गत्वेन संशयस्य पदार्थत्वं स्वीकृतम्। तथैव न्यायप्रवृत्तिहेतुत्वेन निर्दिष्टं प्रयोजनमनुद्दिश्य न प्रवृत्तिरिति प्रयोजनस्यापि पदार्थत्वं स्वीकृतम्। प्रतिबोध्यप्रतिबोधकयोः समानतया स्वीकृतस्य विषयस्य दृष्टान्त इति प्रसिद्धिः। स एवोभयोर्भिन्नमतयोः सिद्धान्तिनो विप्रतिपन्नस्य च साधारणी भूमिः, यदनुसारेण विप्रतिपत्तिं विदूरीकृत्य सिद्धान्तं स्थापयितुं शक्नोति कश्चिदपि। सिद्धान्तस्तु न्यायस्याश्रयः। स च कदाचित् सर्वतन्त्रस्वीकृतः न्यायपरिगृहीतश्च। कदाचित् समानतन्त्रसिद्धोऽपि परतन्त्रासिद्धः। कदाचित् पुनरेकवस्तुसिद्धयनुसारिणी तावदपरवस्तुसिद्धिः। इतरत्र पुनः प्रतिपक्षमतम्

विना परीक्षया स्वीकृत्य तत्रानुपपत्तिप्रदर्शनरूपः। इमे भेदाः सर्वतन्त्र-प्रतितन्त्राधिकरणाभ्युपगमसिद्धान्तनामभिः क्रमशः परिचीयन्ते।

मौले न्यायवाक्येऽक्षापादानुसारं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। अपरे च केचन जिज्ञासा संशयः शक्यप्राप्तिः प्रयोजनं संशयव्युदासश्चेति अपरानपि पञ्चावयवान् स्वीकुर्वन्ति स्म। प्रतिज्ञादिषु अर्थसाधकत्वमस्तीति तानेव अवयवत्वेन स्वीकरोति सूत्रकारः। जिज्ञासादिषु उपकारत्वे वर्तमानेऽपि न तेषु साधकत्वमिति। न्यायवाक्यस्याद्येषु चतुर्ष्ववयवेषु प्रमाणनां चतुर्णां समावेशः। तथा हि प्रतिज्ञायाम् आगमस्य, हेतौ अनुमानस्य, उदाहरणे प्रत्यक्षस्य, उपनये उपमानस्य समवायः। लौहशलाकाकल्पानां परस्परवियुक्तानां चतुर्णा-मेकार्थप्रतिपत्तौ नियोजनं पञ्चमस्यावयवस्य निगमनस्य कृत्यम्। प्रतिज्ञावाक्ये साध्यस्य निर्देशः। उदाहरणसाधर्म्यं वैधर्म्यं वादाय साध्यसाधनं हेतुः। साध्य-साधर्म्ययोगी साध्यवैधर्म्ययोगी वा दृष्टान्त उदाहरणम्। उदाहरणानुरूपं साध्य-साधर्म्यस्य तद् वैधर्म्यस्य वा समुपस्थापक उपनयः। हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्। न्यायोत्तराङ्गरूपेण तर्कस्य निर्णयस्य च ग्रहणम्। तत्राविज्ञात-तत्त्वेऽर्थे कारणोपपत्तितस्तत्वज्ञानार्थमूहस्तर्कः। **वरदराजेन पुनस्तार्किकरक्षायां—**

तर्कोऽनिष्टप्रसंगः स्यादनिष्टं द्विविधं स्मृतम्।
प्रामाणिकपरित्यागस्तथेतरपरिग्रहः ॥ इत्याभिदधता

आचार्योदयनानुसारम् आत्माश्रयेतरेतराश्रयचक्रकानवस्थानिष्टप्रसंगरूपाः पञ्च तर्कभेदाः स्वीकृताः। तर्को न प्रमाणसंगृहीतो न प्रमाणान्तरम्, प्रमाणानाम-नुग्राहकस्तत्त्वज्ञानाय कल्पत इति **भाष्यकारः**। न्यायशास्त्रे तर्कप्रयोगस्य प्राधान्याद् एतस्य तर्कशास्त्रमित्यभिधा संजाता।

संशय्य पक्षप्रतिपक्षाभ्यामर्थावधारणम् निर्णयः। सोऽयं विमर्शः पक्षप्रतिपक्षा-ववद्योत्य न्यायं प्रवर्तयत्युपादीयते। एतच्च विरुद्धयोरेकधर्मिस्थयोर्बोध्यमिति **भाष्यकाराः**।

अनन्तरं कथाप्रकरणम्। सेयं कथा त्रिधा भिद्यते, वादो जल्पो वितण्डा चेति। तत्त्वबुभुत्सुकथा वादः। अत्र चत्वारि प्रमाणानि तर्कश्च सिद्धान्तोपेतस्य साधनस्योपालम्भस्य वा हेतवो भवन्ति। वादिनोश्च पञ्चावयवैः पक्षप्रतिपक्षपरि-ग्रहः। जल्पकथायां साधनायोपालम्भाय वा छलजातिनिग्रहस्थानानां स्वीकार एव वादादस्या विशेषः। वितण्डायां पुनर्जल्पस्य सर्वे विशेषास्तिष्ठन्ति, ऋते प्रतिपक्षस्थापनम्।

अवयवानां प्रत्येकशो दोषसंभवे सत्यपि, **गौतमदृष्ट्या** सर्वेषां दोषाणां हेतु-दोषपर्यवसानात् हेत्वाभासोल्लेखेनैवान्यावयवाभासाश्चरितार्था भवन्ति।

अतएव च शास्त्रेऽस्मिन् मुनिना तत्त्वदर्शिना।
पक्षाभासादयो नोक्ता हेत्वाभासास्तु दर्शिताः॥

पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वासत्प्रतिपक्षितत्वाबाधितत्वानि पञ्च रूपाणि निर्धारितानि। तत्र पक्षसत्त्वाभावे साध्यसमः, सपक्षसत्त्वाभावे विरुद्धः, विपक्षासत्त्वाभावे सव्यभिचारः, असत्प्रतिपक्षितत्वाभावे प्रकरणसमः, अबाधितत्वाभावे च कालातीतो हेत्वाभासो भवति।

वादिप्रयुक्ते शब्देऽभीप्सितादर्थाद् विपरीतस्यार्थस्य स्वीकारेणार्थ दोषप्रदर्शनं छलम्। वाक्छलसमान्यच्छलोपचारच्छलभेदात् तस्य त्रैविध्यम्। साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् पञ्चमाध्याये जातिभेदाः चतुर्विंशति निग्रहस्थानभेदाश्च द्वाविंशतिः प्रदर्शिताः। परातिसन्धान-परयोर्जल्पवितण्डयोस्तदुपकारकाणां च छलजातिनिग्रहस्थानानां मोक्षशास्त्रेऽस्मिन् व्यवहारे स्ववाक्येषु तेषां परिवर्जनं परवाक्येषु चोद्भावनं प्रयोजनम्। उक्तं च 'तत्त्वसंरक्षणार्थं जल्पवितण्डे कण्टकशाखावरणवदिति'॥

(२)

एतेषां पदार्थानां विवेचनाविधौ प्रसंगवशाद् भगवता **अक्षपादेन** विभिन्नानां दार्शनिकसिद्धान्तानां समावेश इतस्ततः कृतः। अत्र द्वित्राणामेवोल्लेखः सुकरः। न्यायसूत्रे महर्षिणा तदत्यन्त 'विमोक्षोऽपवर्ग' इति मोक्षलक्षणं प्रदत्तम्। अत्र तच्छब्देन पूर्वोपात्तस्य दुःखस्यैव ग्रहणम्। मोक्षावस्थायाम् आनन्दानुभवो जायते न वा, स चानन्दो नित्य उतानित्य इति सूत्रतः स्पष्टं न परिज्ञायते। **वात्स्यायनेन** तु आनन्दमोक्षवादः युक्तिप्राग्भारेण पराकृतः। **वात्स्यायनात्** प्राक् आनन्दमोक्षवादो नैयायिकेषु केषुचित् स्वीकृत आसीदिति एतस्मादेवायाति। यत्र न्यायवैशेषिकयो मंतभेदस्तत्र न्यायमतं प्रागुपन्यस्य वैशेषिकमतमनन्तरं प्रदर्शयति **भाष्यकारः**। स्पष्टमेतद् अनुमानत्रैविध्यप्रतिष्ठाविधौ प्रमेयविभागविधौ च। आनन्दमोक्ष-वादखण्डने तु वैशेषिकपक्षकक्षीकार एव दृश्यते, न्यायपक्षान्तरं स्वातन्त्र्येण न व्याख्यातमिति विशेषः। वैशेषिकमतानुसारमात्मविशेषगुणोच्छेद एव मोक्ष इति सुविदितम्। न्यायाचार्यो **भासर्वज्ञ** आनन्दमोक्षवादमेव उररीकुरुते। तदनुयानिन-ष्टीकाकारा अपि अत्र **वात्स्यायन**विरोधिनः। **शङ्करदिग् विजये कुमारिलस्वामिपाद**-कृतायां **सौगतसूत्रव्याख्यानकारिकायां** च आनन्दमोक्षवाद **एवाक्षपादसम्मत** इति प्रथितम्।

गौतमानुसारं जगत्कर्ता ईश्वरः स्वीकृतो न वेत्यत्र दृष्टिर्देया। ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्। न पुरुषकर्माभावे फलानिष्पत्तेः। तत्कारितत्वा-दहेतुः (४।१।१९-२१) इत्यत्र सूत्रत्रितये ईश्वरचर्चा समायाति। पराक्रान्तं चात्र

टीकाकारैः प्रकरणकारैश्च । किं त्वयमीश्वरवादोऽक्षपादकालप्रचलितेषु प्रावादुकेषु प्रचलित आसीत् । संगृहीतोऽसौ परमतत्वेनैव **सूत्रकारेण । भाष्यकारादिभिः** पुनरयं **सूत्रकार**सम्मततया स्वीकृतः । **न्यायवार्त्तिककारेण** अतः परं प्रावादुकानां दर्शनान्युपन्यस्य कानिचित् प्रतिषिध्यन्ते कानिचिदभ्यनुज्ञायन्त इति कण्ठत उक्तमिति ध्येयम् ।

(३)

भट्टजयन्तेन न्यायशास्त्रस्य विवृद्धिविधौ बौद्धनैयायिकानां परोक्षमवदानं स्वीकृतम् । वस्तुतस्तु **अक्षपाद**प्रस्थानस्य उद्भवे विकासे च बौद्धप्रभावः सुदृढ़ आसीदित्यत्र न विद्यते सन्देहावसरः । **न्यायसूत्रेषु न्यायभाष्ये** च बौद्धमतानि सूचितानि खण्डितानि च । **न्यायभाष्ये** प्रमाणव्यवस्थाखण्डनपूर्वकं संप्लवपक्षस्वीकारः, शून्यवादखण्डनं, अवयविखण्डनपरिहारादिकं च प्राचीनबौद्धमतास्तित्वं द्योतयन्ति । किन्तु प्राचीनतराणां बौद्धग्रन्थानां विलोपात् अद्यत्वे **सूत्रकारस्य भाष्यकारस्य** वा समकालिकी बौद्धस्थितिर्दुर्निरूप्यैव । **दिग्नागेन** स्वकीये **प्रमाणसमुच्चये न्यायभाष्य**प्रतिपादितयुक्तीनां खण्डनं कृतम् । समुच्चयोऽयं भोटभाषायामुपलभ्यते । संस्कृतरूपमस्य लुप्तम्, अंशतश्च भोटभाषाधारेण पुनर्निर्मितमाधुनिकैः । **उद्द्योतकरेण** कुतार्किकाज्ञाननिवृत्तिहेतोः स्वकीयं **वार्त्तिकं** विनिर्मितम् । अत्र वार्त्तिकपर्यालोचनया **वाचस्पति**साक्ष्येण च **वसुबन्धुदिग्नागादय** एव **वार्त्तिककारेण** खण्डिता इति परिज्ञायते । अनन्तरं **दिग्नाग** प्रशिष्यो **धर्मकीर्तिः प्रमाणविनिश्चये प्रमाणवार्त्तिके च उद्द्योतकर** मतानि ध्वस्तानि । धर्मकीर्ति प्रभावेन सर्वाणि तावदास्तिकप्रस्थानानि स्तिमितानि बभूवुः । **वाचस्पतिमिश्रस्तु** टीका निर्माणेन प्रकरणरचनेन च सर्वतो **धर्मकीर्ति**कण्टकः समुद्धृतः । नैतावता बौद्धविरोधोऽवसितः । **ज्ञानश्रीमित्रेण रत्नकीर्तिना** च स्वस्वनिबन्धेषु **शङ्करभासर्वज्ञत्रिलोचनवाचस्पतिवित्तोकनरसिंहशतानन्द**प्रभृतीनां न्यायाचार्याणां मतानि सूक्ष्मेक्षिकयापाकृतानि । अनन्तरं च **न्यायाचार्येणोदयनेन आत्मतत्वविवेके कुसुमाञ्जलौ न्यायवार्त्तिकतात्पर्यपरिशुद्धौ** च **ज्ञानश्रियो रत्नकीर्त्तेश्च** मतानि सुदृढं खण्डितानि । यावनविप्लवेन बौद्धाचार्याणां विनाशेन बौद्धविद्यास्थानानां च विध्वंसनेन भारतक्षेत्रतो बौद्धसिद्धान्ताः समुन्मूलिता बभूवुः । का कथा तेषां परिवर्धनस्य ? किन्तु सर्वथा बौद्धग्रन्थानां विलोपो नाभूत् । केचन बौद्धाचार्याः मौलान् संस्कृतग्रन्थान् हैमवतप्रान्तेषु न्यस्तवन्तः । पूर्वत एव चैनिकभाषायां भोटभाषायां चैतेषामनुवादो विहितः यदनुसारं लुप्तमूलानां पुर्निर्माणमाधुनिकैः सुकरमभूत् । सन्ति केचन ग्रन्थाः येषां तादृशोऽनुवादो न संजातः । महापण्डितानां **राहुलसाङ्कृत्यायनपादानां** भगीरथप्रयत्नेन तादृशां मूलमेवाधुना समुपलभ्यत इति महान् हर्षस्य विषयः ।

एतेषां बौद्धग्रन्थानां समुपलम्भात् **अक्षपाद**प्रस्थानपरिशीलनविधौ सौकर्यविशेषः संप्राप्तः। पक्षप्रतिपक्षपरिग्रहेणैव न्यायशास्त्रस्य विवृद्धिरभूत्। वौद्धप्रतिपक्षे विलुप्ते नैयायिका वैदान्तिकान् मीमांसकांश्च प्रतिपक्षत्वेन स्वीचक्रुः। दृश्यते च **खण्डनखण्डखाद्ये, तत्वप्रदीपिकायां तत्वचिन्तामणिप्रभृतिषु** च नैयायिकानां पूर्वोत्तरमीमांसाविरोधः। परं विरोधोऽसौ विषम आसीदिति न्यायशास्त्रस्य सर्वाण्यङ्गानि **न** समं प्रचारं लभते स्म अर्वाचीने काले। **आत्मतत्त्वविवेकस्य** ज्ञानश्रीमित्रनिबन्धखण्डनात्मकस्य प्रचारो निरुद्धः संजातः। **यायकुसुमाञ्जलि**प्रकरणस्य तु चर्चा क्षीणापि वरीवर्त्ति प्रतिपक्षान्तरसद्भावात्। अधुना बौद्धग्रन्थानामाविष्कारेण, प्रकाशनेन च प्राचीनन्यायग्रन्थानां पुनः प्रारब्धमध्ययनं प्रकर्षं गतमिति परं हर्षस्थानं न्यायालोचकानाम्।

(४)

वात्स्यायनकृतं न्यायभाष्यम् उद्योतकरकृतं न्यायवार्त्तिकवाचस्पतिकृता न्यायवार्त्तिक**तात्पर्यटीका उदयनकृति**र्न्यायवर्तिकतात्पर्य**परिशुद्धिश्च** न्याय शास्त्रस्य मुख्या ग्रन्थाः न्यायचतुर्ग्रन्थिकेति नामधेयेन प्राचीनैः **शङ्करमिश्रद्वितीय वाचस्पतिमिश्रादिभि**ः सादरमभिहिताः। सूत्रैः साकमेतेषां पञ्चप्रस्थानन्यायतर्क इति प्रसिद्धिः। एतेषु न्यायभाष्यम् महामहोपाध्यायैः **फणिभूषणभट्टाचार्यैः** परिष्कृतं व्याख्यातं च वङ्गभाषायाम्। वार्त्तिकतात्पर्ये मुद्रिते उपलभ्येते। तुरीयस्य तु भग्नांशमात्रं मुद्रितमासीत्। अस्माभिः चतुर्णामिव ग्रन्थानां संस्करणं सहैवारब्धम्। तत्र प्रथमोऽध्यायः प्रकाशं गतः। शिष्टानां संस्कृतानाम् अध्यायानां मुद्रणमपेक्ष्यते आसादितस्माभिस्**तात्पर्यविवरणस्य अनिरुद्धकृतस्या**न्तिममध्यायचतुष्टयं प्रकाशितं च। तेन **वाचस्पतिमिश्रस्य** तद्गुरोश्च **त्रिलोचनस्य** मतानि बहूनि स्पष्टान्यभूवन् आसादितं खण्डितं **श्रीकण्ठटिप्पणकं** चतुर्ग्रन्थिकाव्याख्यात्मकम्। प्राप्तो **न्यायालङ्कारः** पञ्चप्रस्थानव्याख्याभूतो**ऽभयतिलकोपाध्याय**विरचितः प्रकाश्यमानश्चासौ वरोदाप्राच्यविद्यापीठतो वर्तते। प्रकाशितं च **न्यायभूषणं भासर्वज्ञस्य**। अपरिचितचराणां प्राचीननैयायिकाना**मविद्धकर्णाध्ययनविश्वरूपत्रिलोचनादीनां** ग्रन्थसन्दर्भा अपि विभिन्नेभ्य आकरेभ्यः संगृहीताः परीक्षिताश्च। एतावता प्राचीनन्यायसम्प्रदायस्यावदानमितिहासश्च पूर्वतोऽधिकं स्पष्टत्वं भजेते।

(५)

भासर्वज्ञस्य न्यायसारमवलब्य अपरः कश्चन न्यायसम्प्रदायः समुद्भूतोऽभूत्। **भासर्वज्ञकृते नयायसारे**ऽष्टादश टीकास्तासु मुख्या **न्यायभूषणाख्या** अधुना प्रकाशितेति उक्तचरम्। **न्यायभूषणस्यापि** व्याख्याद्वितयमासीदिति श्रूयते। न चोपलभ्यते। **अपरार्ककृता** न्यायसारटीका **आनन्दानुभवकृता** च संप्रति द्रविड़-

देशतः प्रकाशिता। **जयसिंहसूरिकृता वासुदेवसूरिकृता** च प्रकाशिते एवास्ताम्। **भट्टराघवकृता** च न्यायसारटीका आयुष्मता डा० उमारमण झा शर्मणा प्रकाशं नीता। एतावता **भासर्वज्ञ**प्रस्थानस्याध्ययनाय प्रचुरमुपकरणं संप्राप्तम्। सन्ति काश्चन अन्या अपि टीकाग्रन्था मातृकाबद्धा यासां प्रकाशनमत्यावश्यकं भाति। भासर्वज्ञेनानन्दमोक्षवाद ऊरीकृत इत्युक्तचरम्। वैशेषिकविद्वेषोऽस्य प्रसिद्धः। स च द्वित्वनिषेधे कर्मणः स्वतन्त्रपदार्थत्वास्वीकारेऽन्यत्र च प्रकटितः। अत्र स्मरणीया **न्यायलीलावतीकारस्य श्रीवल्लभस्यार्थ**बहुलोक्तिः तदियमनाम्ना तदा **भासर्वज्ञस्य**यदयमाचार्य मप्यवमन्यते। तथा हि तदनुयायिनस्तात्पर्याचार्य-सिंहनादः संविदेव भगवती वस्तूपगमे न शरणमिति। अत्राचार्यपदेनो**द्द्योतकरः** तात्पर्याचार्यशब्देन च तात्पर्यटीकाकृद्**वाचस्पतिमिश्रः** प्रदिष्टौ। द्वित्वाधिकारे **वाच स्पतिरुद्द्योतकर**मेवानुसरति प्रतिजानाति च संविदेवे तात्पर्यटीकायामिति द्रष्टव्यम्। (न्या. वा. ता. टी. २।१।३६) **उदयनेन** विशिष्य **भासर्वज्ञमतं किरणावलौ** खण्डितम्। **अत्रापरार्ककृतं भासर्वज्ञ**समर्थनं विदुषामालोचनमपेक्षते।

(६)

नव्यन्यायशास्त्रस्य **तत्वचिन्तामणिकर्तुर्महानैयायिकाद् गङ्गेशोपाध्यायादेव** प्रवृत्तिरिति बहुलोक्तिः। परं नैषा समचीना। यतो हि **गङ्गेशोपाध्यायतः प्रागेव न्यायसिद्धान्तदीपकारः शशधरः न्यायरत्नकारो मणिकण्ठः शिवादित्य-मिश्रश्च** नव्यन्यायसम्प्रदायस्य विशिष्टा आचार्या अभूवन्। ग्रन्थगाम्भीर्येण प्रतिपादननैपुण्येन चातिशेते **गङ्गेशोपाध्याय** एतेभ्य आचार्येभ्यः। अतएव चिन्तामणिसमक्षं तस्मात् प्राचीनतराणां ग्रन्थानां प्रचलनं न्यूनतां गतम्।

मिथिलायां नव्यन्यायप्रस्थानं प्रथमतः दर्पणकारस्य **वटेश्वरस्य चिन्ता-मणिकृत गङ्गेशोपाध्यायस्य** च पारस्परिकं शास्त्रीयविरोधमासाद्य द्वयो उप-सम्प्रदाययोः विभक्तम्। चिरकालिकेनानेन सारस्वतविरोधेन नव्यन्यायस्या-साधारणी श्रीवृद्धिरभवत्। मणिसम्प्रदायस्य प्रसिद्धतमो विद्वान् **मणेरालोकाख्य-व्याख्याकृत् पक्षधरः**, दर्पणसम्प्रदायस्य चान्तिमः कोविदः **यज्ञपत्युपाध्याय-श्चाभूताम्।**

पक्षधरमिश्रादनन्तरम् नैयायिकानां पारस्परिको मतभेदः नवीनं स्वरूप-मासादितवान्। एकस्मिन् पक्षे **रघुनाथशिरोमणि**प्रभृतयः **पक्षधरमिश्रस्य** गौडीय-शिष्या अपरस्मिँश्च पक्षे **रुचिदत्तभगीरथमधुसूदनठक्कुर**प्रमुखाः मैथिलास्तदीय-शिष्या आसन्। भारतस्य प्रत्येकं प्रान्तेषु नव्यन्यायस्य प्रचारः प्रसारश्च **पक्षधरेण** विहितः। ततः पश्चात् मैथिलसम्प्रदायः प्रायः ह्रासतां गतः। अद्यत्वे तु सम्पूर्णभारते

तत्त्वचिन्तामणेर्वङ्गीयैः पक्षधरशिष्यैर्विहिता व्याख्यैव समधिकमादरभाजनं विद्यते। शास्त्रस्य प्रगतावेतस्मात् महती क्षतिः सञ्जाता। मैथिलसम्प्रदाय-ग्रन्थानाम् **आलोकदर्पणकण्टकोद्धारप्रभृतीनां** प्रचाराभावेन नव्यन्यायस्य सङ्कोच एवाभवत्। नवद्वीपे तु नव्यन्यायस्य समुत्कर्षसमये कदाचित् पक्षधरादि कृतीनां विशेषेणालोचनं दीधित्यादिपरिष्कारैस्तुलनादिकं च जायमानमासीत्।

(७)

अत्र समुपह्रियते न्यायसूत्रतात्पर्यदीपिका प्रत्नन्यायरसिकेभ्यः। कर्त्ता चास्य **भट्टवागीश्वरः**। भिन्नोऽयं मानमनोहरन्यायलक्ष्मीविलासकर्तुर्**वादिवागीश्वरत** इत्याभाति। प्रस्तुतग्रन्थतो मानमनोहरस्य शैलीभेदात्। न्यायलक्ष्मीविलासस्यातिविस्तृतत्वं मानमनोहरे समुद्दिष्टम्। इयं तावद् वृत्तिरतिसंक्षिप्ता न विचारबहुला; न्यायभाष्यस्य, न्यायवार्त्तिकस्य न्यायवार्त्तिकतात्पर्यटीकायाश्च मितेन वचसा सारसंग्रह एवास्याः कृत्यम्। बह्वत्र शब्दैक्यमपि तैर्मूलग्रन्थैरत्रावलोक्यते येन खण्डितांशप्रपूरणेऽभूत् सौकर्यमायुष्मतः सम्पादकस्य। ग्रन्थस्यास्य एकैव मातृका समुपलब्धा दक्षिणप्रान्ततः। मद्रास गवर्नमेन्ट ओरियेण्टाल मैनुस्क्रिप्ट् लाइब्रेरीत्याख्यायां संस्थायामियं सुरक्षिता वर्तते। ततो लब्धप्रतिलिपिराधारोऽस्य संस्करणस्य। दक्षिणदेशतो मातृकाया उपलम्भाद् ग्रन्थकारोऽपि दाक्षिणात्य इत्यनुमातुं शक्यते। तात्पर्यटीकान्तस्य न्यायमूलग्रन्थत्रितयस्य व्यवहारोऽत्र भूयसा दृश्यते। नात्र न्यायनिबन्धस्य न वा तत्कर्तुराचार्यस्योदयनस्य परामर्शोऽप्यत्रायाति। एतवता उदयनादपि प्राग्भवत्वमस्य ग्रन्थकारस्येत्याभाति। न्यायनिबन्धस्य निर्माणादनन्तरं तात्पर्यटीकया साकमस्य प्रचारः सर्वत्र समानतयाऽभूत्। भाष्यवार्त्तिकतात्पर्यटीकापरिशुद्धीनां चतुर्ग्रन्थिकेत्याख्या प्राचीनप्रख्याता। सूत्रसहितानां तेषामेव पञ्चप्रस्थानत्वमपि सुविदितमेव। अत उदयनात्प्राग्भवत्वं **भट्टवागीश्वरस्य** संभाव्यते।

अर्वाचीना न्यायसूत्रवृत्तिग्रन्थाः प्रायशो नव्यन्यायसिद्धान्तैः समलङ्कृता दृश्यन्ते। स्वल्पाकारस्य प्राचीनमतसंकलनपरस्य सूत्रव्याख्याग्रन्थस्य प्रकाशो नाधुनापि संजात इति कृत्वा नूनमियं वृत्तिः प्रसादयिष्यति संक्षेपतः साम्प्रदायिकप्रत्नन्यायसूत्रार्थजिज्ञासून्।

ग्रन्थकारोऽयं ग्रन्थारम्भे त्रिभुवनोत्पत्तिस्थितिसंहारकारिणं निर्वाणप्रापणस्यैकहेतुभूतं वृषकेतनं महेश्वरं प्रणमति। अन्ते च शङ्करप्रशंसितो न्यायसूत्रकृद् गौतमोऽक्षपादः संस्तुतः।

अन्वीक्ष्यानुपदं भाष्यमप्यनुक्रम्य वार्त्तिकम्।
न्यायसूत्रार्थतात्पर्यदीपिकेयं विधास्यते॥

इति तस्य प्रतिज्ञा। पूरणं त्वस्याः साधु संपादितमिति दृश्यते। अध्यायान्तश्लोकेषु पुनर्न्यायवार्त्तिकरीत्या तत्र तत्र विवेचितविषयाणां सूचना प्रदत्ता। कुत्रचित् पुनरागामिनो विषयस्यापि परामर्शो दृश्यते। तथाहि प्रथमाध्यायान्ते

इति प्रमाणादिपदार्थसार्थ—
निर्देश उद्देशपुरस्सरोऽयम्।
समर्थितः संप्रति तत्परीक्षां
प्रचक्ष्महे वार्त्तिकसूत्रनेत्राः॥

द्वितीयाध्यायान्ते

इतीह सन्देहविचारपूर्वकं
प्रमाणसामान्यविशेषलक्षणम्।
संख्यानमेषां क्षणिकत्वमक्षरे
पदं पदार्थेन समं समीक्षितम्॥

तृतीयाध्यायान्ते

आत्मा शरीरं करणं तदर्थो
बुद्धिर्मनश्चेति पदार्थषट्कम्।
प्रमेयसूत्रात् क्रमशोऽमुष्य
विचारितं सूत्रकृतात्र सूत्रैः॥
अत्र क्रमशस्तृतीये इति पाठो विवेच्यः

तुरीयाध्यायान्ते

द्विधा प्रवृत्तिं त्रिविधांश्च दोषान्
संप्रत्यभावाः फलदुःखमोक्षाः।
मार्गश्च मोक्षस्य यथाप्रमाणं
परीक्षितं सर्वमिदं चतुर्थे॥

पञ्चमाध्याये प्रथमाह्निकान्ते

इतीह यत्नेन विपश्चितं मया
समस्तजात्युत्तरमुत्तरान्वितम्।
क्वचित्प्रयोगः फलमस्य वर्णनं
क्वचित्प्रयुक्तावनुयोग इत्यपि॥

द्वितीयाह्निकान्ते

एवं निग्रहवस्तुतत्त्वमखिलं निर्णीतमेतत्पुनः
ज्ञातं जल्पवितण्डयोर्बहुफलं सूते स्वयं वादिनाम्।
[सद्यो निग्रहजातिवाद] मुखरा जेतुं कथं वादिनः
शक्यन्ते कथमेवमात्मविषयं ज्ञानं कथं वोच्यते॥

इति जगति जनानामीशसायुज्यभाजाम्
अनुपजनित [दाक्ष्यं दित्सते] भाषणेषु
पशुपतिरपि यस्मै सस्मितः साधु साध्वि
त्वददवतु सोऽस्मानक्षपादो मुनीन्द्रः ॥

इति विषयसंसूचनम् ।

वृत्तावस्यामतिदुरूहस्य पञ्चमाध्यायस्य व्याख्यानं यत्नेन कृतमिति वैलक्षण्यमेतस्य। अन्तिमश्लोके अक्षपादं प्रति श्रीशङ्करकृतः साधुवादः समुद्दिष्टः। कवितार्किकेण भट्टजयन्तेनापि—

जयन्ति पुरजिद्दत्तसाधुवादपवित्रिताः।
निदानं न्यायरत्नानामक्षपादमुनेर्गिरः ॥

इत्यनेन श्लोकेन स एव विषयः समुद्घोषितः। परम्परेयमन्यत्र न दृष्टिपथमायाति ।

अत्र सूत्रपाठो विशेषतो द्रष्टव्यः। नानेन वृत्तिकृता वाचस्पतिमिश्रकृतो न्यायसूचीनिबन्धोऽनुसृतः। भाष्यस्थानां संक्षिप्तवचनानामपि सूत्रत्वेनात्र ग्रहणं दृष्टम्। रूपप्रत्यक्षपरस्य 'अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धिः।' [न्यायसूचीनिबन्धः पृः १६ ओरियेण्टल बुक एजेन्सी प्रकशितन्यायसूत्रपरिशिष्टभूतः] इत्यस्य न्यायसूत्रत्वमनेन न स्वीकृतम्। अन्येषामपि न्यायवृत्तिकृतां वंशधरादीनामपि संवादोऽस्मिन् विषये दृष्टः।


न्यायचतुर्ग्रन्थिकासंपादनविधावक्षपादसूत्राणां स्वरूपपरिज्ञानार्थमर्थनिर्णयार्थं संख्यानिर्धारणार्थं चास्माभिः कतिचन न्यायसूत्रव्याख्याग्रन्थाश्चर्चिताः। तेषु नव्यवाचस्पतिकृतो न्यायतत्त्वालोको वंशधरकृता न्यायसूत्रवृत्तिः केशवमिश्रकृतो गौतमीयसूत्रप्रकाशो भट्टवागीश्वरकृता न्यायतात्पर्यदीपिका चासन्। एतेषु केशवमिश्रभट्टवागीश्वरग्रन्थयोः परीक्षणावसरे आयुष्मान् **किशोरनाथो** महान्तं परिश्रमं मदर्थं स्वीकृतवान् मया प्रेरितोऽसावेतयोः सम्पादनकार्यं च सहर्षमुररीकृतवान्। गौतमीयसूत्रप्रकाशः प्रागेव प्रकाशमायातः।

अधुना न्यायसूत्रतात्पर्यदीपिका विदुषां पुरतः समुपस्थितेत्यस्माकं सन्तोषस्थानम्। मन्ये इयं प्रचीनानुगा स्वयं च प्राचीना वृत्तिः प्रमोदयिष्यति प्राचीन-

न्यायसमुपासकान् विदुषः। मातृकाप्रतिलिपिमात्रसहायेन सम्पादकेन ग्रन्थान्तरपरामर्शपुरःसरं यावच्छक्यं मातृकात्रुटिः परिहृता। सन्त्यथापि कानिचनापूरितस्थलानि येषां परिपूरणं सहृदयानां न्यायविदामनुग्रहेण क्रमशो भविष्यतीत्याशास्माकं वरीवर्ति इति।

विजयादशमी
१९०० शकाब्दीया
दरभंगा

विदुषां विधेयस्य
अनन्तलालठाकुरस्य


विद्यापीठ-सुमङ्गल-

विषयसूची

विषयः | पृष्ठसंख्या

विषयः पृष्ठसंख्या

[द्वितीयाध्याये द्वितीयाह्निकम् ४८-७०]

[तृतीयाध्याये प्रथमाह्निकम् ७१-९०]

[तृतीयाध्याये द्वितीयाह्निकम् ९१-११०]

[चतुर्थाध्याये प्रथाह्निकम् १११-१२८]

———

॥ श्रीः ॥

भट्टवागीश्वरप्रणीता
न्यायसूत्रतात्पर्यदीपिका ।

[मङ्गलाचरणम्]

नमस्त्रिभुवनोत्पत्तिस्थितिसंहारकारिणे ।
निर्वाणप्रापणस्यैकहेतवे वृषकेतवे ॥
अन्वीक्ष्यानुपदं भाष्यमप्यनुक्रम्य वार्त्तिकम् ।
न्यायसूत्रार्थतात्पर्यदीपिकेयं विधास्यते ॥

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । १।१।१।

[प्रयोजनाभिधेय संबन्धप्रकरणम्]

तत्त्वं ज्ञायतेऽनेनेति तत्त्वज्ञानं शास्त्रम् । तस्मात् प्रमाणादिपदार्थतत्त्वावगमावान्तरव्यापारात् निःश्रेयसस्याधिगमः प्राप्तिर्भवतीति शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावप्रतिपादनार्थं सूत्रम् । एवं च सति प्रमाणादिपदार्थशास्त्रयोर्ज्ञाप्यज्ञापकभावः । प्रमाणादिपदार्थतत्त्वज्ञानयोः कार्यकारणभावलक्षणश्च संबन्धः सूचितो भवति, विषघ्नमन्त्रवत् स्वरूपेणाविवक्षितार्थस्य शास्त्रस्य निःश्रेयसहेतुत्वानभ्युपगमात् ।

अथ प्रमितिसाधनानि प्रत्यक्षादीनि प्रमाणानि । यद्विषयं मिथ्याज्ञानं संसारं तनोति, यद्विषयं च सम्यग्ज्ञानं तन्निवर्तयति तन्मुमुक्षुणा प्रकर्षेण ज्ञेयमात्मादिद्वादशविधं प्रमेयम् । अनवधारणात्मकः प्रत्ययः संशयः । यदर्थाध्यवसायात् पुरुषः प्रवर्तते तत् प्रयोजनम् । वादिप्रतिवादिनोर्बुद्धिसाम्यविषयोऽर्थो दृष्टान्तः । प्रमाणमूलाभ्युपगमव्यवस्था सिद्धान्तः । परार्थानुमानमूलवाक्यैकदेशाः प्रतिज्ञादयोऽवयवाः । सामान्यतोऽवगते विशेषतश्चानवगते विशेषावधारणार्थं कारणोपपत्त्योहः प्रवर्तते स तर्कः । विचारपूर्वकान्यतरपक्षावधारणं निर्णयः । नानाप्रवक्तृको

विचारवस्तुविषयो वाक्यसन्दर्भविशेषस्तत्त्वज्ञानफलको वादः । स एव छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः । स प्रतिपक्षस्थापनाहीनो वितण्डा । अन्यतमलिङ्गधर्मानुविधानेन प्रवर्तमाना अहेतवः सन्तो हेतुवदाभासमाना हेत्वाभासाः । सामान्यशब्दस्यानेकार्थत्वे सत्यविवक्षितार्थाध्यारोपेण वचनविघातो यः क्रियते तच्छलम् । साधर्म्यवैधर्म्ययोरन्यतरेण प्रतीपमवस्थानं जातिः । विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् । इति पदार्थानां व्युत्पत्तिः ।

यद्यपि संशयादीनां पदार्थानां प्रमाणप्रमेययोरेव यथासंभवमन्तर्भावस्तथापि आत्मविषयमननज्ञानजननसमर्थपदार्थानुमानापरपर्यायस्य परीक्षाविधेस्तन्मूलत्वात् तेन तेनाकारेण ते ज्ञाता विद्याप्रस्थानस्य भेदका इति तेषां पृथग्वचनम् ।१।१।१।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।१।१।२।

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावात् । तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तौ तन्मूलानां दोषाणां निवृत्तिः । तन्निवृत्तौ तन्मूलायाः प्रवृत्तेर्निवृत्तिः । प्रवृत्तिनिवृत्तौ निकायविशिष्टपूर्वपूर्वेन्द्रियशरीरवेदनादिसंबन्धलक्षणस्य जन्मनो निवृत्तिः । तन्निवृत्तावनागतसकलदुःखनिवृत्तिः ।

अयं पुनरनागतदुःखनिवृत्तिलक्षणो मोक्षः तत्त्वज्ञानानन्तरमेव मिथ्याज्ञानादिनिवृत्तिक्रमेण भवति । उत्पन्नतत्त्वज्ञानस्य प्राप्तपरनिःश्रेयसस्य मुनेरवस्थानसंभवात् शास्त्रसम्प्रदायाविच्छेदः, तत्त्वज्ञानस्य निःश्रेयसहेतुत्वं चानिषिद्धमिति तदनुपपत्त्या प्रथमसूत्रे प्रतिपादितसंबन्धविघातोऽनेन परिह्रियत इति तत्त्वपरीक्षणमस्यार्थः । उत्तरोत्तरापाय इति पाठापेक्षया । अनादिभवपरम्परोपात्तानन्तानियतविपाकसमयप्राचीनकर्मविनाशः प्रसंख्यानपरिपाकात् तदुपभो[यो]गिवहुविधशरीरनिर्माणद्वारेणेति वेदितव्यम्, न तत्त्वज्ञानमात्रादुपभोगात् प्रक्षय इति । अस्मिन् पक्षे आगमानुमानलक्षणस्य प्रमाणद्वितयस्य विद्यमानत्वात् ।१।१।२।

[प्रमाणलक्षणप्रकरणम्]

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ।१।१।३।

प्रमितिसाधनं प्रमाणमिति प्रमाणसामान्यलक्षणसूचनद्वारेण प्रत्यक्षादीनां विभागोद्देशार्थं सूत्रम् । विभागश्च नियमार्थः । नियमश्च न्यूनाधिकनिवृत्त्यर्थः । अक्षमक्षं प्रति वर्तत इति प्रत्यक्षम् । अनु पश्चात् मानमनुमानम् । उपमीयते येन तदुपमानम् । आप्तस्य परप्रयोजनार्थं यद् वचनं स शब्दः । एभिरेव चतुर्भिः प्रमाणैर्देवमनुष्यतिरश्चां व्यवहाराः प्रवर्तन्ते । नातोऽन्यथेति । विभागस्य विशेषोद्देशरूपत्वात् न शास्त्रप्रवृत्तेस्त्रैविध्यविरोधः ।।१।१।३।।

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।१।१।४।

इन्द्रियार्थसन्निकर्षोत्पन्नमपि ज्ञानमव्यभिचारि यतो भवति तत् प्रत्यक्षमिति फलविशेषणपक्षमास्थाय लक्षणम् । न कारणपक्षम्, तस्य विशेषणवत्त्वानुपपत्तेः । सन्निकर्षः पुनः षोढा । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।

तत् पुनः प्रत्यक्षं द्विविधम्, सविकल्पकं निर्विकल्पकं चेति । तत्र वस्तुस्वरूपमात्रावभासकं निर्विकल्पकम् । यथा प्रथमाक्षसन्निपातजं ज्ञानम् । विशेषणविशेष्यभावावगाहि ज्ञानं सविकल्पकम् । यथा गौः शुक्लः परिस्पन्दते विषाणीति ।

ननु तर्हि अव्यपदेश्यं व्यवसायात्मकमिति पदद्वयं किमर्थम् ? विप्रतिपत्तिनिरासार्थम् । तथा हि, नामादिरहितमविकल्पकं नास्तीति यन्मतं तन्निरासार्थमव्यपदेश्यमिति । व्यपदेश्यं विशेषणमुपलक्षणं वा जात्यादि । यच्चाव्यपदेश्यमविकल्पकं ज्ञानं तदपि प्रत्यक्षमिति । तथा व्यवसायो विनिश्चयो विकल्प इत्यनर्थान्तरम् । तदात्मकं ज्ञानं सविकल्पकम् । तदपि प्रत्यक्षं विविधकल्पनायोगेन विशेषणविशेष्यभावावगाहिज्ञानत्वात् । शब्दाध्यासक्षणिकत्वपक्षप्रतिक्षेपेण उभयोर्निर्विकल्पकसविकल्पकज्ञानयोरव्यभिचारित्वे सति इन्द्रियार्थसन्निकर्षोत्पन्नत्वात् प्रत्यक्षत्वं युक्तमेव । विपर्ययसंशयज्ञानयोरिन्द्रियार्थसन्निकर्षाव्यभिचारिपदद्वयादेव यथासंख्यं निरासो द्रष्टव्यः ।१।१।४।

[अथ] तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टं च ।१।१।५।

तत्पूर्वकमित्यत्र तच्छब्देन लिङ्गलिङ्गिनोः संबन्धदर्शनं द्वितीयलिङ्गदर्शनं संबन्धस्मरणं चाभिसंबध्यते । तथा च सति लिङ्गलिङ्गिसंबन्धदर्शनद्वितीयलिङ्गदर्शनसंबन्धस्मरणपूर्वकं तृतीयलिङ्गदर्शनं शेषार्थपरिच्छित्तिफलकमनुमानमित्युक्तं भवति ।

तदिदमनुमानं देशकालनरावस्थाभेदेनानेकमप्यनेन रूपेण त्रिविधम्, पूर्ववच्छेषवत् सामान्यतो दृष्टं चेति । तत्र पूर्वं कारणं विद्यते यस्य तत् पूर्ववदिति कारणेन कार्यानुमानम् । यथा मेघोन्नत्या भविष्यति वृष्टिरिति । कार्यं कारणस्योपयुक्तत्वात् । तद् विद्यते यस्य तच्छेषवदिति कार्यात् कारणानुमानम् । यथा नदीपूरेण वृष्टिरिति । सामान्यतो दृष्टमित्यकार्यकारणानुमानम् । यथा बलाकया सलिलानुमानमिति ।

अथवा पूर्ववच्छेषवत् सामान्यतो दृष्टं चेति केवलान्वयी केवलव्यतिरेकी अन्वयव्यतिरेकी चेति लक्षणतो हेतुत्रयप्रतिपादनार्थम्। तत्राविद्यमानविपक्षः पक्षसपक्षयोरेव यथान्यायं वर्तमानो हेतुः केवलान्वयी। यथा विवादास्पदीभूता-न्यदृष्टादीनि कस्यचित् प्रत्यक्षाणि प्रमेयत्वात् करतलवदिति। अविद्यमानसपक्षो विपक्षाद् व्यावृत्तः पक्ष एव व्याप्त्या वर्तमानो हेतुः केवलव्यतिरेकी। [यथा] सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वात्। यत् सर्ववित्कर्तृपूर्वकं न भवति, तत् कादाचित्कमपि न भवति यथाकाशमिति। पक्षधर्मतया युक्तः सपक्षे साकल्येनैकदेशेन वा वर्तमानो विपक्षादतीव व्यावृत्तो हेतुरन्वयव्यतिरेकी। [यथा] अनित्यः शब्दः कृतकत्वाद् घटवदिति। पूर्ववदित्यन्वयिनो ग्रहणम्, अन्वयस्य पूर्वं गृह्यमाणत्वेन पूर्वशब्दाभिधेयत्वात्। शेषवदिति व्यतिरेकिणो ग्रहणम्, अन्वयस्य पूर्वं गृहीतत्वेन शिष्टस्य व्यतिरेकस्य शेषशब्दाभिधेयत्वात्। सामान्यतो दृष्टमित्यन्वयव्यतिरेकिणो ग्रहणम्, पक्षे सामान्येनान्वयस्य सपक्षे दृष्टत्वाददृष्टत्वाच्च विपक्षे। तदेवमवधारणाकारप्रश्लेषाभ्यां हेतुत्रयपरत्वेन पदत्रयं योजनीयम्।

संबन्धस्मरणमित्यत्र संबन्धोऽविनाभावो विवक्षितः। स पुनर्लिङ्गलिङ्गिनो-रनौपाधिकः। सदेषो (?) भूयोदर्शनसंस्कारसध्रीचीनेन संबन्धग्राहिणा प्रमाणेन यत्र येन ज्ञातः, तत्र तस्यानुमानं लिङ्गमिति बोद्धव्यम्, त्रैकाल्यग्रहणात् न केवलं लक्षणतः। किं तर्हि ? विषयभेदादप्यनुमानं प्रत्यक्षभिन्नं त्रिकालविषयत्वात्। वर्तमानैकविषयं [प्रत्यक्षं] त्रिकालविषयमनुमानमिति सूत्रार्थः ।१।१।५।

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ।१।१।६।

प्रसिद्धं साधर्म्यं यस्य येन वा सोऽयं प्रसिद्धसाधर्म्यो गवयः। तस्मात् प्रसिद्धसाधर्म्यात्। प्रसिद्धिश्चोभयी। प्रत्यक्षमय्यनुमानमयी च। साध्यस्य संज्ञासंज्ञिसंबन्धस्य साधनं प्रतिपत्तिर्यतो भवति तदुपमानम्। अतिदेशवाक्यस्मरण-सव्यपेक्षं संज्ञासंज्ञिसंबन्धप्रमितिफलकं प्रत्यक्षजनितधर्मिज्ञानमुपमानमिति तात्प-र्यार्थः ।१।१।६।

आप्तोपदेशः शब्दः ।१।१।७।

आप्तस्य यथावद् दृष्टार्थस्य तथैवोपदेष्टुः परप्रयोजनवत् वचनमुपदेशः शब्दलक्षणं प्रमाणमिति सूत्रार्थः ।१।१।७।

स द्विविधो दृष्टादृष्टार्थत्वात् ।१।१।८।

दृष्टोऽर्थो येन यस्य वा सोऽयं दृष्टार्थः। अदृष्टोऽनुमितो येन यस्य वा सोऽयमदृष्टार्थः। दृष्टादृष्टार्थत्वाभ्यां स चायमागमो द्विविधः। यथा कारीरीं

निर्वपेद् वृष्टिकामः। यथा वाग्निहोत्रं जुहुयात् स्वर्गकाम इति। ननु किमर्थं द्वैविध्यकथनम् ? उच्यते, दृष्टार्थसाधारण्याददृष्टार्थस्यापि प्रामाण्यमनुमातुं शक्यमिति कथनार्थम् ।१।१।८।

[प्रमेयलक्षणप्रकरणम्]

अथ प्रमेयम् ।

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ।१।१।९।

यद्विषयं मिथ्याज्ञानं संसारं तनोति, यद्विषयं च सम्यग्ज्ञानं तन्निवर्तयति तदिदं मुमुक्षुणा प्रकर्षेण बोध्यं द्वादशविधं प्रमेयमिति सूत्रार्थः ।१।१।९।

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ।१।१।१०।

यज्जातीयस्य सन्निकर्षात् सुखमात्मोपलब्धवान् तज्जातीयमर्थं पश्यन्नादातुमिच्छति। तद्विपरीतं पश्यन् द्वेष्टि। तदुभयमाप्तुं हातुं च प्रयतते । सुखदुःखस्मृतौ च तत्साधनमाददानः सुखमुपलभे दुःखमुपलभ इति सुखदुःखे चैते बुभुत्समानः खल्वयं विमृशति । विमृशंश्च जानीते । तदेवमिच्छादीनि ज्ञानान्तानि स्मृत्या सहैककर्तृत्वेन प्रतिसन्धीयमानत्वादात्मनो लिङ्गं भवन्ति। लिङ्गं चात्मनो लक्षणमिति सूत्रार्थः ।

ननु कथमिच्छादीनां स्मृत्या सहैककर्तृत्वेन प्रतिसन्धानम् ? उच्यते, प्रथमं तावत् कदलीफलज्ञानसमनन्तरमेतज्जातीयं मम सुखसाधनत्वेन दृष्टमिति स्मृतिः । पश्चादिदमपि तथाभूतमिति परामर्शानुभवः । तदनन्तरमुपादानेच्छा। सेयमिच्छा पूर्वापरप्रत्ययाभ्यां स्मृत्या सहैककर्तृत्वेन प्रतिसन्धीयते यस्य ममेच्छा तस्य प्रथमानुभवः। यस्य प्रथमानुभवः तस्य सुखसाधनत्वस्मृतिः। यस्य स्मृतिः तस्य परामर्शानुभवः । यस्य परामर्शानुभवः तस्येच्छेति । एवं द्वेषप्रयत्नादिष्वपि योज्यम्।

तदेवमिच्छादीनि ज्ञानान्तानि पूर्वापरप्रत्ययाभ्यां स्मृत्या सहैककर्तृकत्वेन प्रतिसन्धीयमानत्वात् शरीरेन्द्रियवेदनाव्यतिरिक्तमात्मानमनुमापयन्ति । यज्ञदत्तस्येच्छादीनि तत्पूर्वापरप्रत्ययाभ्यां स्मृत्या सहैकर्तृकाणि ताभ्यां तया सहैककर्तृकत्वेन प्रतिसन्धीयन्ते, यथा देवदत्तस्येच्छादीनि यज्ञदत्तप्रत्ययस्मृत्यादिभिः । न च तथैतानि। तस्मादुक्तसाध्यानि । न चेन्द्रियैक्यात् शरीरैक्याद् वा प्रतिसन्धानं भवति, इन्द्रियान्तरशरीरान्तरानुभूतेष्वपि प्रतिसन्धानादर्शनात्। यथा मातुलुङ्गफलदर्शनाद् रसनेन्द्रियविकारो दन्तोदकसंप्लवलक्षणस्तत्र प्रतिसन्धानम्, तथा

बाल्ये दृष्टस्य कुमारवृद्धावस्थयोः प्रतिसन्धानमिदमनुभूतमिति। न च तत्रावस्थाभेद एव, न शरीरभेद इति वाच्यम्, परिणामभेदस्याश्रयभेदहेतुत्वेन घटपटादाविवावश्याश्रयणीयत्वात्। तदैक्यप्रत्यभिज्ञानस्य सादृश्यवशेन पुनर्जातनखकेशादिष्विव संभवात्। न च कार्यकारणभावाद् बुद्धित एव प्रतिसन्धानम्, नात्मवशादिति वाच्यम्। सत्यभावादसति च भावात्। अस्ति खलूपाध्यायविज्ञानात् शिष्यज्ञानोत्पत्तिः। न च तत्र प्रतिसन्धानमिति। समनन्तरप्रत्ययत्वाभावादिति चेत्? समश्चासावनन्तरप्रत्ययश्चेति समनन्तरप्रत्ययः। यथा रसज्ञानाद् रसज्ञानम्। उपाध्यायज्ञानं पुनरधिपतिप्रत्ययः। अतश्च न प्रतिसन्धानमिति। मैवम्, उपाध्यायज्ञानस्यापि समनन्तरप्रत्ययत्वसंभवात्। यथा रसोपदेशाद् रसज्ञानोत्पत्ताविति। अथैकस्मिन् सन्ताने यः सदृशप्रत्ययः स समनन्तरप्रत्ययः। न सन्तानान्तर इति चेत्? तर्हि सन्तानैक्यकृतोऽयमनुसन्धानप्रत्ययो न समनन्तरप्रत्ययमात्रकृत इति स्वसिद्धान्तव्याकोपः। तथैकस्मिन् प्रदेशेऽवस्थितस्यामलकीफलस्यापनये तत्सदृशफलान्तरसंस्थापने तदेवेदं यन्मयानुभूतमामलकीफलमित्यनुसन्धानं दृष्टम्। न च तत्र कार्यकारणभावः। अतश्च कर्त्रैक्यकृतोऽयमनुसन्धानप्रत्ययो न कार्यकारणभावनिबन्धन इति सिद्धं देहेन्द्रियवेदनाव्यतिरिक्त आत्मेच्छादिभिरनुमेय इति ।१।१।१०।

चेष्टेन्द्रियार्थाश्रयः शरीरम् ।१।१।११।

असमूर्तान्तरप्रत्यययोगे सति हिताहितप्राप्तिपरिहारलक्षणपरिस्पन्दाश्रितत्वात्, इन्द्रियानुग्राहकत्वात्, अर्थोपकारकत्वाच्च शरीरं तस्माद् भिद्यत इत्यर्थः। किं पुनरिन्द्रियानुग्राहकत्वमर्थोपकारकत्वं वा शरीरस्य? तदुच्यते। स्वोपघातानुपघातानुविधानं स्वाधीनप्रयोजनसिद्धिश्च, शरीरोपघातेनोपहन्यन्ते तदनुपघातेन स्वविषयग्रहणसमर्थानि भवन्तीन्द्रियाणि। तथा रूपरसादयोऽर्थाः शरीरमाश्रित्य स्वप्रयोजनसुखदुःखसंवेदननिमित्तत्वं भजन्ते। नातोऽन्यथा। अतः शरीरोपघातानुविधानं शरीरस्येन्द्रियानुग्राहकत्वम्। रूपाद्यर्थकृतसुखदुःखवेदननिमित्तत्वं च शरीरस्यार्थाश्रितत्वम्। न पुनश्चेष्टावदिन्द्रियार्थसमवायः, इन्द्रियारम्भकपरमाणुषु व्यभिचारादिति ।१।१।११।

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ।१।१।१२।

यच्छरीरसंयुक्तं संस्कारदोषव्यतिरिक्तं साक्षात् प्रमितिसाधनं तदिन्द्रियमिति सामान्यलक्षणसूचनद्वारेण जिघ्रत्यनेनेत्यादिसमाख्यासामर्थ्यात् स्वविषयग्रहणैः पञ्च बाह्येन्द्रियाणि लक्ष्यन्त इति सूत्रार्थः। घ्राणमितरस्माद् भिद्यते इन्द्रियत्वे सति रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्। यत्तु न भिद्यते न तदिन्द्रियत्वे सति रूपादिषु मध्ये गन्धस्यैव व्यञ्जकं, यथा रसनेन्द्रियम्। न तथेदं तदितरस्माद्

भिद्यत इति। तदस्तित्वे किं प्रमाणमिति चेत्? अनुमानं प्रमाणम्। यथा हिं गन्धोपलब्धिः करणकार्या क्रियात्वात्।, छेदनक्रियावत्। तच्च करणं पार्थिवम्, रूपादिषु मध्ये नियमेन गन्धस्यैव व्यञ्जकत्वात्, अभिभूतचन्दनगन्धोद्बोधककस्तूरिकाद्रव्यवत्। एवमिन्द्रियान्तरेष्वपि योजनीयम्। तल्लक्षणं चेन्द्रियाणां भौतिकत्वे संभवति, नाहङ्कारिकत्व इति ज्ञापनार्थं भूतेभ्य इति पदम्। आहङ्कारिकत्वे तदेककारकत्वादिति नियतभूतगुणग्रहणसामर्थ्यमिन्द्रियाणां न संभवति।१।१।१२।

पृथिव्यप्तेजोवायुराकाशमिति भूतानि।१।१।१३।

एतानि इन्द्रियकारणानीति सूत्रार्थः।१।१।१३।

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः।१।१।१४।

तेषामिन्द्रियाणामर्थास्तदर्थाः। इन्द्रियैरर्थ्यमानत्वमर्थानां लक्षणम्। अन्यत् सर्वं सुहृद्भावेनेति मन्तव्यम्। पृथिव्यादीनि तद्गुणाश्चेति द्वन्द्वः। गन्धादिष्विन्द्रियनियमज्ञापनार्थं गन्धादिग्रहणम्।१।१।१४।

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्।१।१।१५।

बुद्ध्यादिशब्दवाच्यत्वं बुद्धेर्लक्षणम्, सार्वजनीनसङ्केतत्वादिति। बुद्धिरितरस्माद् भिद्यते, तद्वाचकत्वेन सर्वलोकप्रद्धिबुद्ध्यादिपर्यायशब्दवाच्यत्वात्। यत्तु न भिद्यते, तन्न तथा, यथा मन आदीनि।१।१।१५।

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।१।१।१६।

रूपादिग्रहणानि चक्षुरादिव्यतिरेकेणाधिष्ठायकान्तरापेक्षाणि, तेषु सत्स्वप्ययुगपदुत्पद्यमानत्वात्। यानि येषु सत्स्वपि युगपन्नोत्पद्यन्ते, तानि तद्व्यतिरेकेणाधिष्ठायकान्तरापेक्षाणि। यथानेकशिल्पाभिज्ञपुरुषेण क्रियमाणानि रथादीनि वास्यादिषु करणेषु सत्सु। सति चानेकशिल्पाभिज्ञे तस्मिन् पुरुषे क्रमभावितद्धस्तसंयोगापेक्षाणि युगपन्नोत्पद्यन्ते। तथा चैतानि रूपादिज्ञानानि। तस्मात् तद्व्यतिरेकेणाधिष्ठायकान्तरापेक्षाणीति। तथा, अबाह्येन्द्रियनिमित्ताः स्मृत्यादयः क्रियाविशेषाः कारकान्तरनिमित्ताः क्रियात्वात् छिदिक्रियावदिति मनोऽनुमीयते। तल्लिङ्गत्वं च मनसो न लक्षणमिति सूत्रार्थः।१।१।१६।

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः।१।१।१७।

वाचा ज्ञानोत्पादनद्वारेण बुद्ध्या मनसा शरीरेण वा य आरम्भः सा प्रवृत्तिरिति सूत्रार्थः। बुद्धिशब्देन मनोऽत्र विवक्षितम्। सेयं प्रवृत्तिर्द्विधा पुण्यापुण्या च। तत्र

पुण्या दशविधा, शरीरेण दानं परिचरणं परित्राणम्, वाचा च सत्यं प्रियं हितं मितम् । मनसा दया अस्पृहा श्रद्धा चेति । सेयं प्रवृत्तिरेवं लक्षमाणा निर्वेदायावक्ल्पत इति ।१।१।१७।

प्रवर्त्तनालक्षण दोषाः ।१।१।१८।

प्रवर्तना प्रवृत्तिहेतुत्वम् । तच्च मोहैकार्थसमवायः । कथम् ? प्रवर्तमानः खल्व [त्र रागद्वेषाभ्यां] प्रवर्तते । तौ प्रवर्तयन्तौ यस्मिन्नात्मनि समवेतौ मिथ्याज्ञानेन सह तमेव प्रवर्तयतः, नामूढं मिथ्याज्ञानरहितम् । अतस्तयोः प्रवर्तना, मोहस्यापि तदेकार्थसमवायः । तया प्रवर्तनया ये लक्ष्यन्ते रागद्वेषमोहाः, ते दोषा इति सूत्रार्थः ।१।१।१८।

पुनरुत्पत्तिः प्रेत्यभावः ।१।१।१९।

शरीरादिपरित्यागादन्यशरीराद्युपसम्पत्तिर्या सेयमात्मन उत्पत्तिः । सा प्रेत्यभावः संसार इति सूत्रार्थः । तस्य संसारस्या [नादित्वज्ञापनार्थं] पुनर्ग्रहणम् । १।१।१९।

प्रवृत्तिदोषजनितोऽर्थः फलम्[1] ।१।१।२०।

शरीरादिकं फलं सर्वम्, प्रवृत्तिजन्यत्वात् । अर्थग्रहणं गौणमुख्यलक्षणावधार [णार्थम् । मुख्यं] दुःखसंवेदनम्, गौणमन्यत् सर्वमिति । दोषग्रहणं प्रवृत्तिजननद्वारेण सुखदुःखहेतुत्वं दोषाणामिति सूचयितुम् । [यद्यपि सुखदुःख] व्यतिरिक्तं फलं नास्ति, तथापि प्रवृत्तिदोषजनितत्वद्वारेण विज्ञातं तदेव शरीरेन्द्रियादि सन्निर्वेदायावकल्पत इति पृथगु [पन्यासः] । प्रवृत्तेर्धर्माधर्मजननद्वारेण संसारहेतुत्वप्रतिषेधार्थं वा दोषग्रहणम्, दोषसलिलावसिक्त[या]मात्मभूमौ प्रवृत्तिजनिते धर्माधर्म [बीजे सुखदुःखे समुत्पा] दयतः, नेतरत्रेति[2] ।१।१।२०।

बाधनालक्षणं दुःखम् ।१।१।२१।

एतदेव शरीरादि बाधनया दुःखेन लक्षितमनुषक्तं दुःखं विषसम्पृक्तान्नव [त् ।] एवं सति सर्वं दुःखमिति भाव [न] ाद् विरज्यते, विरक्तो मुच्यत इति ।१।१।२१।

तदत्यन्तविमोक्षोऽपवर्गः ।१।१।२२।

तेन शरीरादिना दुःखेनात्यन्तिको वियोग [:] । शरीराद्यन्तरस्य वा

---

१. प्रवृत्तिजनितदोषोऽर्थफलमिति मातृकापाठः ॥

२. द्र० तात्पर्यटीका ।१।१।२०।

पुनरुत्पादाभावः। ननु तस्मिन् सति किं भवति ? उत्पन्नैरुत्पद्यमानैरशेषविशेषगुणैर्वियुक्त आत्मा स्वरूपेण [तिष्ठति। विज्ञानमानन्दं ब्रह्मेति सामानाधिकरण्यश्रुतिप्रा]माण्यात् पूर्वमनाविर्भूतस्यानन्दस्यात्मा[1]वस्थायामाविर्भाव इति केचित्। तदयुक्तम्, तदानन्दसद्भावस्य प्रमाणबाधितत्वेन, श्रुतिगतानन्द[स्यं चात्यन्तिकदुःखाभाव]विषयत्वात्। दृष्टश्च दुःखाभावेऽप्यमानन्दशब्दो भाराक्रान्तस्य वाहकस्य तदपाय इति। किं तद्बाधकं प्रमाणम् ? [आनन्दवत्तदनुभवस्य नित्य]त्वे मुक्तसंसारावस्थयोरविशेषप्रसङ्गः। न च शरीरादीनां प्रतिबन्धकत्वम्, भोगसाधनत्वात् तेषाम्। अनित्यत्वे तु [तदुत्पत्तौ] कारणाभावः। न चात्ममनःसंयोगस्य योगजधर्मसापेक्षस्य तु कारणत्वं भवति। शरीरादिसंबन्धसापेक्षस्य तस्य[ानुभ]वस्य दर्शनात्, मोक्षावस्थायां तदभाव इति। तदुक्तं तदभावश्चापवर्ग इति।१।१।२२।

[न्यायपूर्वाङ्गप्रकरणम्]

समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः।१।१।२३।

समानधर्मोपपत्तेरनेकधर्मोपपत्तेर्विप्रतिपत्तेश्चेति त्रिविध एव संशय इतरदविशेषणाद् भव [तीति सूत्रार्थः। तत्र विषय]स्वरूपानवधारणप्रत्ययः संशय इति सामान्यलक्षणम्। विशेषलक्षणानि त्रीणि। तथा हि समानः सदृशो धर्मो यस्य सोऽयं समानधर्मा [तस्यो]पलब्धेः। तस्याः किं केवलायाः ? न, किं तूपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति साधकबाधकप्रमाणाभावाच्च विशेषापेक्षायाश्च गृह्यमाण विशेषस्मरणाच्च संशयः। स्थाणुर्वा पुरुषो वेति। अनेकोऽसाधारणो धर्मोऽस्य सोऽयमनेकधर्मा तस्योपलब्धेश्च संशयः। पूर्ववद् विशेषणं बोद्धव्यम्। उदाहरणं तु, सत्वे सति विभागजननात् किं द्रव्यं गुणः कर्म वा शब्द इति। विप्रतिपत्तेश्चेति, व्याहतार्थप्रवादो विप्रतिपत्तिशब्दस्यार्थः। व्याहतार्थप्रवादमुपलभमानस्य, उपलब्ध्यनुपलब्ध्यव्यवस्थाने सति तद्गतविशेषानुस्मृतौ च सत्यां संशयो भवति, किं भौतिकानीन्द्रियाणि, उताभौतिकानीति।१।१।२३।

यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्।१।१।२४।

ससाधनौ सुखदुःखप्राप्तिपरिहारौ प्रयोजनम्, तदधिकृत्य प्रवर्तनात्। यस्मादयं पुरुषः प्रवर्तमानः ससाधनौ सुखदुःखप्राप्तिपरिहारावधिकृत्य विनिश्चित्य प्रवर्तते सुखमास्यामि, दुखं हास्यामीति। तस्मात् तौ तस्य प्रयोजनमिति सूत्रार्थः।१।१।२४।

---

१. मोक्षावस्थायामिति मातृकापाठः।

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ।१।१।२५।

[बुद्धिसाम्यविषयो दृष्टान्तः ।] तस्माल्लौकिकपरीक्षकग्रहणेन वादिप्रतिवादिनोर्विवक्षितत्वम् । अन्यथा त्वाकाशपरमाण्वादेरदृष्टान्तता स्यादिति सूत्रार्थः । १।१।२५।

[न्यायाश्रयसिद्धान्तप्रकरणम्]

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ।१।१।२६।

तन्त्रं प्रमाणमधिकरणं येषामर्थानां ते तन्त्राधिकरणाः । तेषामभ्युपगमसंस्थितिः इत्थम्भावव्यवस्था सिद्धान्त इति सूत्रार्थः । आभिमानिकं प्रमाण[त्वमधि]करणत्वम् । अन्यथा वस्तुनो वैरूप्यप्रसङ्गादिति । सर्वतन्त्रसिद्धान्ते तु यथासम्भवं व्यवस्था योजनीया ।१।१।२६।

स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् १।१।२७।

सिद्धान्तश्चतुर्विधः, सर्वतन्त्रसिद्धान्तः प्रतितन्त्रसिद्धान्तोऽधिकरणसिद्धान्तोऽभ्युपगमसिद्धान्तश्चेति । कुतः ? सर्वतन्त्रप्रतितन्त्रा [धिकरणा]भ्युपगमसंस्थितीनामर्थान्तरभावात् परस्परं विलक्षणत्वादिति सूत्रार्थः ।१।१।२७।

सर्वतन्त्रप्रसिद्धोऽर्थः[1] सर्वतन्त्रसिद्धान्तः ।१।१।२८।

सर्वेषां संप्रतिपत्तिविषयोऽर्थः सर्वतन्त्रसिद्धान्त इति सूत्रार्थः । यथा प्रमाणैः प्रमेयस्याधिगम इति ।१।१।२८।

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ।१।१।२९।

एकस्मिंस्तन्त्रे सिद्धस्य तन्त्रान्तरेष्वसिद्धस्याभ्युपमः प्रतितन्त्रसिद्धान्त इति सूत्रार्थः । यथा नासत उत्पत्तिः, सत आत्मलाभ[2] इति सांख्यस्य ।१।१।२९।

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ।१।१।३०।

यस्यार्थस्य साध्यस्य हेतोर्वा सिद्धिविषये तदनुषङ्गिणोऽर्थाः तदन्तर्भाविण

---

१. सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतोऽर्थः इति प्रथितः पाठः ।

२. आत्मानमिति मातृका ।

गम्यन्ते, सोऽर्थः साक्षादविक्रियमाणस्तदनुषङ्गिणां चाधारोऽनेन रूपेणाधिकरणसिद्धान्त इति सूत्रार्थः। यथा कार्यानुमाने सर्वज्ञत्वादिसिद्धिः[1]। यथा वा प्रतिसन्धानानुमान इन्द्रियनानात्वसिद्धिरिति ।१।१।३०।

अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ।१।१।३१।

योऽर्थः सूत्रेषु नोपनिबद्धः शास्त्रे चाभ्युपगतः सोऽभ्युपगमसिद्धान्त इति सूत्रार्थः। यथा नैयायिकानां मनस इन्द्रियत्वमिति ।१।१।३१।

[न्यायस्वरूपप्रकरणम्]

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ।१।१।३२।

यस्य प्रतिज्ञादिभिरुपक्तस्य विशेषावस्था[प]नमर्थः, तद् वाक्यमिति सामान्यलक्षणसूचनद्वारेणावयवानां विभागोद्देशार्थं सूत्रमित्यर्थः ।१।१।३२।

साध्यनिर्देशः प्रतिज्ञा ।१।१।३३।

प्रज्ञापनीयधर्मविशिष्टो धर्मी साध्यः। तस्य निर्देशः परिग्रहवचनं प्रतिज्ञेति सूत्रार्थः। यथा अनित्यः शब्द इति ।१।१।३३।

उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः ।१।१।३४।

अनेन सूत्रेण हेतुसामान्यलक्षणं व्यतिरेकिविशेषलक्षणं च प्रतिपाद्येते। तथा हि, अवयवत्वे सति पारोक्ष्यापन्नसाध्यसाधनवचनत्वं सामान्यलक्षणं साध्यसाधनपदात् सूचितम्। उदाहरणेनैव सपक्षेणैव साध्यसाधनं यत् तस्मादुत्थाय स्वरूपसाध्यसाधनवचनत्वं सति विपक्षेऽन्वयव्यतिरेकिणो लक्षणम्। असति विपक्षे तदेवान्वयिनोऽपि लक्षणमिति। तत्रोदाहरणम्, अनित्यः शब्दः उत्पत्तिधर्मकत्वात् पटवदिति। सपक्षव्यापकस्य जातिमत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वादिति। तस्य सर्वानित्यत्ववादिनोऽनित्यः शब्दः प्रमेयत्वादिति। सपक्षव्यापकस्यान्वयिनः प्रत्यक्षत्वादित्यन्यस्य ।१।१।३४।

तथा वैधर्म्यात् १।१।३५।

सतां विपक्षेणैव वैधर्म्यमेव यत् तस्मात् समुत्थाय स्वरूपसाध्यस्य साधनवचनत्वं

---

१. द्रष्टव्यम् "पक्षस्तावद् विवादाध्यासितमुपलब्धिमत्कारणमुत्पत्तिमत्त्वाद् वस्त्रादिवदिति। अनेन हि पृथिव्यादिगतेनोत्पत्तिमत्त्वेनोपलब्धिमत्पूर्वकत्वं तद्गतं साध्यमानं स्वसिद्ध्यन्तर्गतानुषङ्गिसर्वज्ञत्वाद्युपेतमेव सिद्ध्यति, नान्यथेहोपलब्धिमत्पूर्वकत्वसिद्धिरिति"। ता टी. ।१।१।३०।

सति सपक्षे व्यतिरेकिणो लक्षणमिति सूत्रार्थः। यथा नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गात् लोष्टवत् इति ।१।१।३५।

साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् ।१।१।३६।

व्याप्यव्यापकभावज्ञापकदृष्टान्तवचनमुदाहरणमिति सामान्यलक्षणसूचनद्वारेणान्वयोदाहरणसूचनार्थं सूत्रम् । तथा हि साध्येनैव साधर्म्यमेव यत् तस्मात् साधनसाधर्म्यात् प्रयो[जनात्मकात्]तस्यैव धर्मिणः प्रयोज्यो यो धर्मः स एव भावः। सोऽस्यास्तीति तद्धर्मभावी । एतदुक्तं भवति—साधनधर्मभावप्रयुक्तसाध्यधर्मभावज्ञापनदृष्ट[ान्त]वचनमन्वयोदाहरणमिति । यथा यदुत्पत्तिधर्मकं तत्सर्व[मनित्यं] यथा घट इति ।१।१।३६।

तद्विपर्ययाद् विपरीतम् ।१।१।३७।

साध्यधर्माभावप्रयुक्त[साधन]धर्माभावज्ञापकदृष्टान्तवचनं व्यतिरेकोदाहरणमित्यनेन प्रतिपाद्यत इत्यर्थः। यथा यन्निरात्मकं तत्सर्वमप्राणादिमद् दृष्टम्। यथा लोष्टादिरिति ।१।१।३७।

उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः १।१।३८।

उदाहरणापेक्षः साध्यस्य व्याप्तिहेतुमत्तया उपसंहार उपनय इति सामान्यलक्षणम्। तथा न तथेति सामान्यलक्षणापेक्षेणेत्यर्थः। स्वस्येव परस्यापि परामर्शज्ञानोत्पादनार्थमुपनयवचनम्। अन्यथा प्रथमलिङ्गदर्शनद्वितीयलिङ्गदर्शनसंबन्धस्मृतीनां परस्परवार्तानभिज्ञत्वेन एककार्यकरणत्वायोगादिति । तथा चोत्पत्तिधर्मकः शब्द इति अन्वयोपनयस्योदाहरणम्। तथा अप्राणादिमन् न भवति जीवच्छरीरमिति व्यतिरेक [स्येति] ।१।१।३८।

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ।१।१।३९।

हेत्वपदेशात् सहेतुकं प्रतिज्ञायाः पुनर्वचनं निगमनमिति सूत्रार्थः। तस्माद् उत्पत्तिधर्मकत्वात् अनित्यः शब्द इति । यस्य पूर्वं साध्यत्वं तस्यैव सिद्धत्वमिदानीमित्यवस्थाद्वयवन्तमेतमाश्रित्य पुनर्वचनं बोद्धव्यम्। अन्यथा निगमनस्यावयवान्तरत्वाभावप्रसङ्गादित्यबाधितविषयत्वासत्प्रतिपक्षत्वलक्षणरूपद्वयसमर्थ[नं न स्यादिति ।] १।१।३९।

[न्यायोत्तराङ्गलक्षणप्रकरणम्]

अविज्ञायमानतत्त्वेऽर्थे[1] कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः ।१।१।४०।

अविज्ञायमानतत्त्वेऽर्थे कारणोपपत्तितः सम्भवत्यस्मिन्न[र्थे प्रमाणमिति संभावना] द्वारेण तत्त्वज्ञानार्थं य ऊहः प्रवर्तते स तर्कः । न पुनरूहमात्रमिति सूत्रार्थः । उदाहरणं तु यद्यत्र तदानी [मुपलभ्येत, न चोपलभ्यते] । तस्मात् नास्तितया भवितव्यम् । सोऽयं तर्कः, प्रमाणविषयविवेचनात् प्रमाणानुग्राहको न पुनः स्वयं प्रमाणम्, अनिश्चायकत्वात् । न च प्र[ष्टव्यम्]······किं प्रमाणानुग्रहेण, अयमेव निश्चायकः कस्मात् न भवतीति साम्प्रतं, तस्य प्रसङ्गतया पारतन्त्र्येण स्वयमबाध ···········द्यमानत्वयोर्व्याप्तिलक्षणं पुनः प्रसङ्गहेतुः सत्त्वं तदुपलब्धिर्वा । तस्मान्न प्रमाणं प्रमाणानुग्राहकस्तु भवतीति ।१।१।४०।

[विमृश्य] पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ।१।१।४१।

विमृश्य सन्देहं कृत्वा पक्षप्रतिपक्षाभ्यां यदन्यतरपक्षे अर्थावधारणं भवति स निर्णय इति परीक्षाविषयस्य निर्णयस्येदं लक्षणम् । न पुनर्निर्णयमात्रस्य प्रत्यक्षादिप्रमाणफलस्य । तस्य न्यायप्रवृत्त्यनङ्गत्वादिति सूत्रार्थः ।१।१।४१।

इति न्यायसूत्रतात्पर्यदीपिकायां प्रथमाध्यायस्य
प्रथमाह्निकं समाप्तम्

१—अविज्ञाततत्त्वेऽर्थे इति प्रथितः पाठः ।

प्रथमोऽध्यायः

द्वितीयाह्निकम्

[कथाप्रकरणम्]

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ।१।२।१।

नानाप्रवक्तृका विचारविषया वाक्यसंदृब्धिः कथेति सामान्यलक्षणसूचनद्वारेण वादस्य विशेषलक्षणमनेन प्रतिपाद्यते । तथा हि वस्तुविशेषावेकाधिकरणौ विरुद्धावेकतत्त्वानवसितौ पक्षप्रतिपक्षौ । तयोः परिग्रह इत्थंभावनियमः । एवंधर्मा अयं धर्मी नैवंधर्मेति । स चायं वादः किंविशिष्टः प्रमाणतर्कसाधनोपालम्भः प्रमाणमूलैरेवावयवैः तर्केण च साधनश्चोपालम्भश्चास्मिन् क्रियत इति तथोक्तः । आभिप्रायिकं प्रमाणमूलत्वं वेदितव्यम् ।

तदेवंलक्षणके वादे तत्त्वनिर्णयफलके उपालम्भग्रहणात् सर्वं निग्रहस्थानं प्राप्नोतीति [नियत]निग्रहस्थानस्वीकारार्थं सिद्धान्ताविरुद्धः पञ्चावयवोपपन्न इति पदद्वयम् । कथम् ? सिद्धान्ताविरुद्ध इति अपसिद्धान्ताविरुद्ध इति अपसिद्धान्तस्वीकारः, पञ्चग्रहणात् न्यूनाधिकयोः, अवयवग्रहणात् तदाभासानामित्येतदुक्तं भवति । वस्तुविशेषयोरेकाधिकरणयोर्विरुद्धयोरेककालेऽनवस्थितयोः परिग्रहवचनं वादिप्रतिवाद्यभिप्रायकल्पितप्रामाण्ययुक्तप्रमाणमूलावयवैस्तर्केण च स्वपक्षसाधनयुक्तं तथाभूतैरवयवैस्तर्केण न्यूनाधिकापसिद्धान्तावयवाभासविलक्षणैः प्रतिपक्षसाधन [दूषणोपेतं] कथासामान्यलक्षणेन विशेषितं वाद इति ।१।२।१।

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ।१।२।२।

[यथोक्तो]पपन्न इत्यर्थलभ्याभिप्रायनिग्रहस्थाननियमलक्ष्यपदव्यतिरिक्तोऽन्यवादलक्षणोपपन्नो यः स ज[ल्पः] । जातिनिग्रहस्थानैरपि साधनं साधनस्योपालम्भश्चास्मिन् भवतीति तथोक्तः । सोऽयमेवंभूतः पक्षप्रतिपक्षपरिग्रहो जल्प इति ।१।२।२।

[स प्रतिपक्ष]स्थापनाहीनो वितण्डा ।१।२।३।

सति प्रथमे पक्षे द्वितीयपक्षस्य प्रति[पक्ष]त्वं संभवति इति प्रतिपक्षशब्देन द्वितीयपक्ष उच्यते । तथा सति स एव ज[ल्पो यदा प्रतिपक्षस्थापना]हीनो भवति तदा वितण्डेति सूत्रार्थः ।१।२।३।

[हेत्वाभासप्रकरणम्]

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ।१।२।४।

अन्यलिङ्गधर्मानुविधानेन प्रवर्तमाना अहेतवः सन्तो हेतुवदवभासमानाः हेत्वाभासा इति सामान्यलक्षणसूचनद्वारेण हेत्वाभासानां विभागोद्देशार्थं सूत्रम्। अनेकधा प्रवृत्तोऽपि हेत्वाभासभेदः सव्यभिचारादिरूपेण पञ्चधा भवति। प्रस्तारस्तु वार्तिके ।१।२।४।

अनैकान्तिकः सव्यभिचारः । १।२।५।

एकस्मिन्नन्ते नियत ऐकान्तिकस्तद्विपर्ययात् अनैकान्तिकः। अन्वयेन व्यतिरेकेण वा यः सपक्षविपक्षगामी स सव्यभिचार इति सूत्रार्थः। यथा नित्यः शब्दः प्रमेयत्वादित्यन्वयेन। उभयपक्षगामिना यस्मात् प्रयेयत्वस्यान्वयः सपक्षे गगनादौ विपक्षे घटादावप्यस्ति। अतः सपक्षविपक्षगाम्यन्वयत्वात् साधारणानैकान्तिको भवति। तथा नित्यः शब्दः सामान्यवत्त्वे सति श्रावणत्वात् इति व्यतिरेकेण उभयपक्षगामिनोऽस्यापि व्यतिरेकः सपक्षे घटादौ चास्ति। अतः सपक्षविपक्षवृत्तिव्यतिरेकत्वादसावसाधारणानैकान्तिको भवतीति १।२।५।

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ।१।२।६।

सव्यभिचारलक्षणानाक्रान्तत्वे सति अभ्युपगतार्थं विरुणद्धि विरुद्धचते वा येन सोऽयं विरुद्धो हेत्वाभास इति सूत्रार्थः। यथा नित्यः शब्द उत्पत्तिधर्मकत्वात् गगनवदिति। अत्र नित्यत्वस्य साध्यधर्मस्योत्पत्तिधर्मकत्वेन साधनधर्मेण सह व्याप्तौ जिज्ञासितायां नित्यत्वविपरीतधर्मेणानित्यत्वेन व्याप्तस्योत्पत्तिधर्मक[त्व]स्य प्रथमं प्रतीतत्वात् तेन नित्यत्वं, नित्यत्वेन वा तद्विरुद्धमिति भवत्येव विरुद्धो हेत्वाभास इति। विकारः शब्दो व्यक्तेरात्मलाभादपैति नश्यति नाशित्वाच्चोत्पत्तिमान् तन्नित्यत्वप्रतिज्ञाने व्यक्तेरपेतस्याप्यस्तित्वमभ्युपेयते। तदिदं नित्यत्वमुत्पत्तिधर्मा विरुणद्धीति भाष्यगमनिकावक्षिप्तम् १।२।६।

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ।१।२।७।

यस्मात् तत्त्वानुपलब्धिलक्षणाद्विशेषादर्शनात् अर्थात् प्रकरणचिन्ता प्रक्रियमाणस्यार्थस्य चिन्ता। विमर्शात् प्रभृति यावन्निर्णयं प्रस्तुतार्थनिरूपणं प्रवर्तते, स एव विशेषादर्शनलक्षणोऽर्थो यद्येकतो निर्णयाय अपदिश्यते तदा प्रतिपक्षेऽपि

समानत्वात् प्रकरणसमो भवति। स प्रतिपक्षो हेतुः प्रकरणसम इति तात्पर्यार्थः। यथा नित्यः शब्दः अनुपलभ्यमानानित्यधर्मकत्वात् गगनवदिति। अत्र यदा प्रतिवादी अनित्यत्वविशेषानुपलब्धिवत् नित्यत्वविशेषानुपलब्धिरप्यस्तीति। अनित्यः शब्दः अनुपलभ्यमाननित्यधर्मकत्वात् घटवदिति प्रत्यवतिष्ठते। तथा [दा] प्रथमस्य साधनस्य स[त्]प्रतिपक्षतया प्रकरणसमत्वम्। द्वितीयस्य तु प्रथमसाधनसत्प्रतिपक्षतारूपप्रकटनार्थत्वान्नेदं दूषणमपि तु दूषणान्तरमूहनीयमिति न प्रकरणसमस्योदाहरणं भवतीति ।१।२।७।

साध्याविशिष्टः साध्यत्वात् साध्यसमः ।१।२।८।

साध्येनाविशिष्टो यः साधनधर्मा सोऽयमसिद्धत्वात् साध्यसमो हेत्वाभास इति। यथा द्रव्यं छाया गतिमत्त्वादिति ।१।२।८।

कालात्ययापदिष्टः कालातीतः ।१।२।९।

हेत्वपदेशस्य सन्देहविशिष्टः कालो यः पुनः प्रत्यक्षादिना प्रमाणेन विपरीतनिर्णये सति साध्यसन्देहविशिष्टं कालमतिपतति सोऽयं कालस्यात्ययेऽपदिश्यमानः कालातीत इति सूत्रार्थः। यथा अनुष्णोऽग्निरवयवी कृतकत्वादित्यादि। अत्र ह्यनुष्णत्वकृतकत्वयोः व्याप्तिग्रहणार्थमुष्णत्वं क्वचिद्धर्मिणि दृष्टं प्रतिषेद्धव्यम्। अन्यथाऽनुष्णत्वस्योष्णप्रतिषेधात्मकस्यैवाप्रतीतेः। नचैतदुष्णत्वं तेजोऽवयविव्यतिरिक्ते धर्मिणि दृष्टमिष्टं वा। अतः प्रथमं विपरीतार्थनिश्चये सति सद्विपरीतार्थनिश्चयाय प्रवर्तमानं तन्मूलप्रमाणापेक्षं कृतकत्वसाधनं सन्दिग्धधर्मिणि निर्देशलक्षणहेत्वपदेशकालस्यात्ययेन अपदिष्टत्वात् कालातीतो भवतीति ।१।२।९।

[छलप्रकरणम्]

वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ।१।२।१०।

अर्थविकल्पोपपत्त्ये[त्य]र्थस्य विविधः कल्पो विकल्पः, तस्योपपत्तिः संभवः, तया अर्थविकल्पोपपत्त्या। एतदुक्तं भवति, सामान्यशब्दस्य अनेकविशेषसंबन्धित्वे सति अविवक्षितार्थाध्यारोपेण वचनविघातो यः क्रियते तच्छलमिति सूत्रार्थः ।१।२।१०।

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्च ।१।२।११।

तदिदं छलं देशकालावस्थाभेदेनानेकधा भिन्नमप्यनेन रूपेण त्रिविधमिति सूत्रार्थः ।१।२।११।

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ।१।२।१२।

अविशेषेणाभिहिते वाक्ये पदे वा वक्तुरभिप्रायात् यदर्थान्तरं क्रियते प्रतिषेधार्थं तदर्थविषये तद्वाङ्निमित्तं छलं वाक्छलमिति सूत्रार्थः । यथा नवकम्बलोऽयं माणवक इत्यत्र नूतनकम्बलत्वं वक्तुरभिप्रेतं विहाय कुतोऽस्य नव कम्बला इति संख्याविवक्षया प्रतिषेधः । एवं पदेऽपि बोद्धव्यमश्व इत्यादौ । तदेतदयुक्तम् । उभयार्थप्रतिभासनं सम्भवदर्थपरित्यागेन असम्भवदर्थकल्पनाया अयोगादिति ।१।२।१२।

सम्भवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम् १।२।१३।

केनचिद्विशेषणेन विशिष्टितया सम्भवतोऽर्थस्य अतिसामान्ययोगात् तद्विशेषण-रहितव्यक्तिव्यापिसामान्ययोगादसद्भूतार्थकल्पनया अविवक्षितहेतुकल्पनया य प्रतिषेधः क्रियते वाक्ये तत्सामान्यनिमित्तं छलं सामान्यच्छलमिति सूत्रार्थः । अहो नु खल्वसौ ब्राह्मणश्चतुर्वेदाभिज्ञ इत्युक्ते छलवाद्याह न ब्राह्मणत्वं चतुर्वेदाभिज्ञत्वे हेतुः, व्रात्येनानैकान्तादिति । तदेतदयुक्तम् । अविवक्षितहेतुके वाक्ये हेत्वयोगात् । अस्य वाक्यस्य ब्राह्मणप्रशंसापरस्य विशिष्टब्राह्मणविषयताया अभिप्रेतत्वा-दिति ।१।२।१३।

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेध उपचारच्छलम् १।२।१४।

धर्मः प्रयोगस्तस्य विकल्पो द्वैविध्यं गुणप्रधानभावेन निर्देशः । एतदुक्तं भवति । गुणप्रधानभावेन लोके शब्दप्रयोगे सिद्धेऽपि गौणप्रयोगे अर्थसंभवेन यः प्रतिषेधस्तदुपचारविषयं छलं उपचारच्छलमिति सूत्रार्थः । मञ्चाः क्रोशन्तीति उक्ते छलवाद्याह न मञ्चाः क्रोशन्ति किन्तु मञ्चस्थाः पुरुषा इति । नैतद्युक्तं, उभयथाऽपि लोके प्रयोगदर्शनादिति ।१।२।१४।

परीक्षापर्वणः सान्निध्यात्तदर्थमात्मनः सामर्थ्यमालोचयन् सूत्रकारश्छलं लक्षण-पर्वण्यपि परीक्षते—

वाक्छलमेवोपचारच्छलं तदविशेषात् ।१।२।१५।

तस्या अर्थान्तरकल्पनाया अविशेषात् तत्राप्यर्थान्तरकल्पनमिहाप्यर्थान्तर-कल्पनमिति वाक्छलोपचारच्छलयोर्निमित्तभूतस्यार्थान्तरकल्पनालक्षणस्यार्थस्य

फार्म — ३

उभयत्राविशेषात्, एकत्वाद्वाक्छलमेवोपचारच्छलं न तस्माद्विलक्षणमिति सूत्रार्थः ।१।२।१५।

न तदर्थान्तरभावात् १।२।१६।

तस्योपचारच्छलनिमित्तस्य अर्थसद्भावप्रतिषेधस्य वाक्छलनिमित्तादर्थान्तरकल्पनातोऽर्थान्तरभावात् । धर्मप्रतिषेधात् धर्मिप्रतिषेधस्य विलक्षणत्वात् "तदविशेषादिति" पूर्वसूत्रोक्तमभेदसाधनं न युक्तमिति सूत्रार्थः ।१।२।१६।

अविशेषेण किञ्चित्साधर्म्यादेकछलत्वप्रसङ्गः ।१।२।१७।

यदि किञ्चित्साधर्म्यादर्थान्तरकल्पनस्याविशेषात् वाक्छलोपचारच्छलयोरेकत्वेन छलद्वित्वमभ्यनुज्ञायते । तर्हि तस्मादेव किञ्चित्साधर्म्याद्वचनविघातादिलक्षणात् केनचिन्न्यायवाद्याह—किमत्राश्चर्यं, संभवति हि ब्राह्मणे चतुर्वेदाभिज्ञत्वमिति । अत्र सर्वं छलमेकं प्राप्नोतीति छलद्वित्वमभ्यनुज्ञातं यत्त्वया तन्निवर्तत इति सूत्रार्थः । १।२।१७।

[पुरुषाशक्तिलिङ्गप्रकरणम्]

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ।१।२।१८।

प्रयुक्ते हेतौ तदाभासे वा समीकरणाभिप्रायेण साधर्म्यवैधर्म्यमात्रयोरन्यतरेण यत्प्रतीपमवस्थानं सा जातिरिति सूत्रार्थः । तदेतज्जातिसामान्यलक्षणम् । चतुर्विंशति प्रभेदभिन्नासु सर्वासु जातिष्वस्तीति यथाकथञ्चिदूहनीयम् । येन केनचित्साधर्म्यस्य येन केन चिद्वैधर्म्यस्य वा सर्वत्र सम्भाव्यमानत्वात् ।१।२।१८।

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ।१।२।१९।

अन्यथाभिहितस्यार्थस्य अन्यथाप्रतिपत्तिः विप्रतिपत्तिः । स्वपरार्थोत्तरासंवित्तिरप्रतिपत्तिः । एतदुभयं निग्रहस्थानं पराजयनिमित्तत्वात् । पराजयनिमित्तं खलु निग्रहस्थानम् । तदनयोरन्यतरस्मिन् पर्यवस्यतीति सूत्रार्थः ।१।२।१९।

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ।१।२।२०।

तस्य साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य विकल्पात्तयोः विप्रतिपत्त्यप्रतिपत्त्योः विकल्पात् बह्व्यो जातयो बहुनि निग्रहस्थानानीति सूत्रार्थः । तदेतज्जातिनिग्रहस्थानविकल्पानां बहूनां विविच्य विशेषलक्षणाभिधानं पञ्चमे अध्याये भविष्यतीति नेह प्रतन्यते । यदि पुनरत्रैव तेषां विशेषलक्षणं प्रवर्तते तदा शास्त्रप्रधानप्रति-

पाद्यस्यात्मादेः प्रमेयजातस्य उद्देशमात्रादुपजातं तत्त्वज्ञानं तिरोधीयते । अत एव च तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वमिति सूत्रमपि सप्रयोजनम् । तद्विलम्बप्रतिपादनार्थत्वादस्येति ।१।२।२०।

इति प्रमाणादिपदार्थसार्थनिर्द्देश उद्देशपुरस्सरोऽयम् ।
समर्थितः संप्रति तत्परीक्षां प्रचक्ष्महे वार्तिकसूत्रनेत्राः ।

इति भट्टवागीश्वर विरचितायां न्यायसूत्रतात्पर्यदीपिकायां प्रथमोऽध्यायः ।

—**—

द्वितीयोऽध्यायः

प्रथमाह्निकम् ।

[संशयपरीक्षाप्रकरणम्]

अतः ऊर्ध्वं प्रमाणादिपरीक्षा

तत्र यथोद्देशं यथालक्षणं परीक्षेति प्रमाणलक्षणमेव प्रथमं परीक्षितुं युक्तम् । तथापि न तत् प्रथमं परीक्षितम् । तस्माद्"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय [इत्युक्ततया]" ? [१।१।४१।] समस्तप्रमाणादिपदार्थसार्थपरीक्षापरपर्यायस्य विचारस्य विमर्शपूर्वकत्वनियमात् । अतस्तदुल्लङ्घ्य विमर्शलक्षणमेव प्रथमं युक्तमिति **सूत्रकारः** तल्लक्षणं तावत्परीक्षते—

समानानेकधर्माध्यवसायाद्वा[1] **न संशयः** ।२।१।१।

समानधर्माध्यवसायादनेकधर्माध्यवसायाद्वा संशयः, न पुनः समानधर्ममात्रात् अनेकधर्ममात्राद्वा स्वाध्यवसायरहितात् । किञ्चान्यतरधर्मोऽनेकधर्मः तदध्यवसायात् न संशयः । अनेकधर्मस्य अवधारणहेतुत्वेन तद्दर्शनस्यान्यतरनिश्चयहेतुत्वादिति सूत्रार्थः ।२।१।१।

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ।२।१।२।

न विप्रतिपत्तिमात्रादव्यवस्थामात्राद्वा संशयः । किन्तु विप्रतिपत्तिमव्यवस्थां चोपालभमानस्येति सूत्रार्थः ।२।१।२।

विप्रतिपत्तौ च संप्रतिपत्तेः ।२।१।३।

विप्रतिपत्तौ विप्रतिपत्तिस्वरूपे यदि विप्रतिपत्तिरित्यनेनाकारेण **संप्रतिपत्तिः** [त्तेः]स्वरूपविरोधान्न विप्रतिपत्तिरिति सूत्रार्थः ।२।१।३।

अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः ।२।१।४।

अव्यवस्थात्मनि अव्यवस्थास्वरूपे यद्यव्यवस्थेत्यनेनाकारेण व्यवस्था स्यात्तर्हि स्वरूपविरोधान्नाव्यवस्था स्यादिति सूत्रार्थः ।२।१।४।

तथात्यन्तसंशयस्तद्धर्मसातत्योपपत्तेः ।२।१।५।

यदि समानधर्मादिभ्यः स्वाध्यवसायरहितेभ्यः कारणेभ्यः संशयः स्यात् । तदा तेषां समानधर्मादीनां कारणानां सातत्योपपत्तेर्नित्यं संशयः स्यादिति सूत्रार्थः । २।१।५।

---

१. वन्यतरधर्माध्यवसायाद्वेति अधिकं पठति न्यायसूचीनिबन्धे वाचस्पतिमिश्रः ।

तदेतत्सर्वं संशयलक्षणसूत्र[२।१।२३]गतोपपत्तिशब्दस्य उपलब्धिपर्यायत्वमजानानस्य चोद्यमिति द्रष्टव्यम् । तत्परत्वे तु नैतद् दूषणमित्यनेनाभिप्रायेण परिहारमाह—

यथोक्ताध्यवसायादेव तद्विशेषापेक्षात्संशये नासंशयोऽत्यन्तसंशयो वा ।२।१।६।

यदि निर्विशेषणं समानधर्मादिकं संशयकारणमुच्यते । ततः पूर्वं कारणात् पश्चादपि न कुर्यादित्यसंशयः । पूर्वं वा कारणात्पश्चादपि कुर्यादित्यत्यन्तसंशयः । न त्वेतन्निर्विशेषणं संशयकारणमपि तूपलब्धं सद्विशेषस्मृत्यादिसहितमिति नासंशयो नाप्यत्यन्तसंशयः । कथं पुनरेतत्सूत्रपदेषूपलभ्यते, विशेषणापेक्ष[1] इति वचनात् । सामान्येनोपलब्धे विशेषापेक्षा भवति । न पुनरतीवोपलब्धेरनुपलब्धेर्वा । अतो विशेषापेक्ष इति[२।१।२३।]वचनादुपपत्तिशब्देनोपलब्धिः सूत्रकारेण विवक्षितेति न कश्चिद्विरोधः । यत्पुनरन्यतरधर्मोऽसाधारणधर्मस्तस्य दर्शनादन्यतरावधारणं भवतीति । एतदपि नास्तीति । असाधारणधर्मस्य व्यतिरेकमुखेन न व्यभिचारत्वेन अव्यभिचारिविशेषरूपत्वाभावात् । यच्चोक्तं "विप्रतिपत्तौ च संप्रतिपत्तेः । अव्यवस्थात्मनि व्यवस्थितत्वाच्चाव्यवस्थायाः"[२।१।३-४]इति । तदयुक्तम् । निमित्तान्तरात् संज्ञान्तरकारणेन वस्तुतथाभावस्य प्रतिषेद्धुमशक्यत्वात् । विषयान्तरापेक्षया खल्वियं विप्रतिपत्तिरव्यवस्था च । न पुनः स्वरूपापेक्षया । संप्रतिपत्तिर्व्यवस्थेति संज्ञान्तरकरणेन विषयापेक्षितया 'अवस्थितस्य विप्रतिपत्त्यव्यवस्थात्मकस्य अर्थतथाभावस्य प्रतिषेधो न युक्तः । न चाव्यवस्था पृथक् संशयकारणम् । पूर्वस्मादविशेषादित्युक्तम् । तस्मात् संशयलक्षणं यथोक्तमेवोपपन्नमिति ।२।१।६।

यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्गः ।२।१।७।

यत्र यत्र संशयपूर्विका परीक्षा शास्त्रे कथायां वा, तत्र तत्र परेण संशये प्रतिषिद्धेऽपि समाधानहेतुभिरेभिः समाधेयम् । पुनरेते समाधानत एतल्लक्षणनियता एवेति शिष्यशिक्षा सूत्रार्थः ।२।१।७।

[प्रमाणसामान्यलक्षणपरीक्षा]

अथेदानीमवसरप्राप्तानि प्रमाणानि परीक्षमाणः सामान्यलक्षणपूर्वकत्वात् विशेषलक्षणानां, प्रथमं तावत् प्रमाणसामान्यलक्षणं परीक्षते—

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ।२।१।८।

प्रमितिसाधनं प्रमाणमिति प्रमाणसामान्यलक्षणम् । तदिदं प्रमितिसाधनत्वलक्षणप्रामाण्यं प्रत्यक्षादीनां न सिद्ध्यति । कुतः, त्रैकाल्यासिद्धेः । त्रिकाल[स्य]भावस्त्रै-

१. विशेषापेक्ष इति समुचितः पाठः

काल्यं तत्रासिद्धेः। प्रमाणप्रमेययोः पूर्वापरसहभावानुपपत्त्या प्रत्यक्षादीनां प्रमाणानां प्रमितिसाधनत्वायोगादिति सूत्रार्थः ।२।१।८।

तत्र ज्ञानप्रामाण्यपक्षमवलम्ब्य प्रमेयात्पूर्वं प्रमाणसिद्धौ दोषमाह—

पूर्वं हि प्रमाणसिद्धौ नेन्द्रियार्थसन्निकर्षात्प्रत्यक्षोपपत्तिः[1] ।२।१।९।

ज्ञानं हि नाम प्रमाणं तद्यदि पूर्वं प्रमेयादवधार्यमाणादर्थादुच्येत, तत्र पूर्वं नासौ प्रमेयलक्षणार्थः सिद्ध इति। "इन्द्रियार्थसन्निकर्षोत्पन्नमिति" [१।१।४।] प्रत्यक्ष-लक्षणसूत्रव्याघात इति सूत्रार्थः ।२।१।९।

अथ पश्चात् प्रमेयात् प्रमाणसिद्धिस्तत्रापि दोषमाह—

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ।२।१।१०।

प्रमेयत्वं नाम वस्तुनः स्वरूपं प्रमाणसंबन्धनिबन्धनं तच्चेत् प्रमाणं [णात्] पूर्वं सिद्धं पश्चात् प्रमाणसिद्धिस्तर्हि प्रमाणयोगनिबन्धनं प्रमेयत्वं न स्यादिति सूत्रार्थः। २।१।१०।

युगपत् सिद्धौ दोषमाह—

युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावो बुद्धीनाम् ।२।१।११।

रूपरसगन्धस्पर्शादयः प्रमेयभूता अर्था युगपत्कालसंबन्धिनो दृष्टाः। तद्विषयाणि च ज्ञानानि तैः सह तस्मिन्नेव काले यदा सिद्धानि तदा "युगपत् ज्ञानानुत्पत्ति-र्मनसो लिङ्गमिति" [१।१।१६]सूत्रव्याघातः। चक्षुरादिभिः क्रमेणोत्पद्यमानानां तेषां दृष्टव्याघातश्चेति सूत्रार्थः।

ज्ञानप्रामाण्यनिरूपणाधीननिरूपणत्वादिन्द्रियादिप्रामाण्यानाम्। तत्प्रामाण्य-दूषणवशादेव तेषामपि प्रामाण्यदूषणं भवतीति न पृथक्कृत्य सूत्रेण दूषणमुक्तमिति बोद्धव्यम्।

तदनेन सूत्रचतुष्टयेन संक्षेपविस्तराभ्यां प्रत्यक्षादीनि नैव प्रमाणत्वेन व्यवहर्त-व्यानि। कालत्रयेऽपि अर्थापत्तिप्रतिपादकत्वात्। यदेवंविधं तत् प्रमाणत्वेन न व्यवह्रियते। यथा शशविषाणम्। तथा चैतानि, तस्मात्तथेति। पराभ्युपगतप्रमाणानां परस्परविरोधेन यद्विलयनमुक्तं माध्यमिकेन तदुपन्यस्तं वेदितव्यम् ।२।१।११।

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ।२।१।१२।

"प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेरिति" [२।१।८।] प्रमाणप्रतिषेधं कुर्वन्माध्यमिकः।प्रष्टायः। अयं खलु प्रतिषेधः किं प्रतिषेध्यात् पूर्वं, पश्चात् सह वेति।

---

१. ०"क्षोत्पत्तिः" इति प्रथितः पाठः।

यत्र यदि पूर्वं, तदानीमसति प्रतिषेध्ये किमनेन प्रतिषिद्ध्येत। अथ पश्चात् प्रतिषेधो, न र्तीह प्रतिषेधाधीना प्रतिषेध्यसिद्धिः। तद्व्यतिरेकेण प्रतिषेध्यस्य प्रथममेव सिद्धत्वात्। अथ युगपत् प्रतिषेध्यप्रतिषेधयोः सिद्धिः, तदा प्रतिषेध्यस्य प्रामाण्यस्य सद्भावाभ्यनुज्ञानादनर्थकः प्रतिषेधस्तदेवं स्ववचनविरोधेन स्वप्रतिपादितानुमानस्य आत्मलाभाभावात् प्रत्यक्षादीनां प्रामाण्यमिति सूत्रार्थः।२।१।१२।

सर्वप्रमाणतिषेधाच्च प्रतिषेधानुपपत्तिः ।२।१।१३।

प्रत्यक्षादीनि न प्रमाणत्वेन व्यवहर्तव्यानि इत्यादि प्रतिषेधलक्षणे वाक्ये वाक्याङ्गभूतान्युदाहरणादीनि परेणोपादीयन्ते न वा। यद्युपादीयेरन् तदोदाहरणादि विषयैः सर्वैः प्रमाणैः विप्रतिषेधाद्विरोधात् बाधितत्वादनुपपन्नः प्रतिषेधः। अथ नोपादीयेरन् तदोदाहरणादिरहितत्वेन असिद्धव्याप्तिकल्पकत्वात् अनुमानस्यानर्थकः प्रतिषेधोऽभिमतार्थासिद्धेरिति सूत्रार्थः।२।१।१३।

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ।२।१।१४।

अथाभिमतार्थसिद्ध्यर्थं तेषां प्रतिषेधवाक्यावयवाश्रितानां प्रमाणानां प्रामाण्यमभ्यनुज्ञायेत तदा न सर्वप्रमाणविप्रतिषेधः। केषाञ्चित् तत्प्रतिषेधवाक्यावयवानाश्रितानां प्रतिषेधस्तदाश्रितानाञ्च न प्रतिषेधः प्रामाण्याभ्यनुज्ञेति पक्षपातो **माध्यनिकस्य** स्यादिति सूत्रार्थः।२।१।१४।

त्रैकाल्याप्रतिषेधश्च शब्दादातोद्यसिद्धिवत्तत्सिद्धेः ।१।२।१५।

कालत्रयार्थाप्रतिपादकत्वादिति हेतोरसिद्धतोद्भावनमस्यार्थः। तथाहि पूर्वं सिद्धमातोद्यं पश्चा[त्।] तदुत्थेन शब्देन यथानुमीयते वीणा वाद्यते, वेणुः पूर्यत इति। यथा वा पूर्वं सिद्धेन सावित्रप्रकाशेन पश्चादविरोधोत्पन्नं वस्त्रादि वस्तु गृह्यते। यथा वा सहसिद्धौ वह्निः सहसिद्धेन धूमेनानुमीयते। तथा क्वचित् पूर्वं सिद्धेन प्रमाणेन प्रमेयमवधार्यते। क्वचित् पश्चात्सिद्धेन क्वचित् युगपत्सिद्धेनेति सिद्धम्। प्रत्यक्षादीनां कालत्रयेऽप्यनियमेनार्थप्रमितिसाधनत्वम्। कुतः प्रमाणत्वसामान्यस्य अनेकव्यक्तिनिष्ठत्वेन कदाचित् कस्याश्चिद्व्यक्तेः तत्साधनत्वसम्भवादसाधारणस्वरूपयोग्यतामात्रवशादेव पाचकादिशब्दवत् प्रमाणप्रमेयशब्दयोर्लोकत एवाकुवर्दवस्थायामपि प्रवृत्तिसिद्धेर्नेन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिसूत्र [१।१।४]विरोधः। तथैव प्रयोगदर्शनादिति ।२।१।१५।

संप्रति प्रकारान्तरेण सामान्यमाक्षिप्य समाधीयते। तथाहि प्रत्यक्षादीनां प्रमाणानामुपलब्धिरस्ति वा न वा? यदि नास्ति। तदा स्वोपलब्धिरहितैः प्रत्यक्षादिभिः प्रमाणैर्यथा संव्यवहारसिद्धिः। तथा स्वोपलब्धिरहितैरेव

घटशकटादिभिः प्रमेयैः संव्यवहारसिद्धेः । तत्सिद्धिसाधनानां प्रमाणानामभाव-प्रसङ्गः । अथोपलब्धिरस्ति तदोपलब्धिविषयत्वात् प्रमेयत्वमुपलब्धिसाधनत्वात् प्रमाणत्वमित्यनियतानेकरूपसंबन्धित्वेनासत्त्वप्रसङ्गः । यदुक्तं तदनियतं तदपरमार्थ-सत् । यथा रज्ज्वामारोपितं सर्पत्वम् । तथा च प्रमाणप्रमेयभावः । तस्मादस-दिति तत्रोपलब्धिर्नास्तीति पक्षस्वीकाराभावादेव प्रतिक्षिप्तिः । पक्षान्तरे अनियतानेकरूपसंबन्धित्वेनासत्त्वप्रसङ्ग इत्युक्तमिति चेत्तत्राह—

प्रमेया च तुलाप्रामाण्यवत् ।२।१।१६।

गुरुत्वपरिमाणज्ञानसाधनं तुलाद्रव्यं प्रमाणं सुवर्णादीनां, तुलान्तरपरिच्छिन्न-परिमाणेन द्रव्येण यदा प्रमीयते तदा प्रमेयम् । क्षणभङ्गपरिणामनिरासे सति स्वरूपेणावस्थितस्य पदार्थस्य तत्तद्धर्मयोगेन तद्रूपेण परमार्थसत्त्वे सति विरोधा-भावात् । यथा स्वप्रामाण्ये । प्रमेया च तुला तथा सर्वमपि प्रमाणजातं स्वप्रामाण्ये प्रमेयं वस्त्वन्तरपरिच्छेदे तु प्रमाणमिति न काल्पनिकत्वेन रज्ज्वा-मारोपितसर्पत्वत् असत्त्वप्रसङ्ग इति सूत्रार्थः ।२।१।१६।

ननु प्रत्यक्षादीनामुपलब्धिरस्तीत्युक्तम् । सेयमुपलब्धिः, ससाधना निःसाधना वा ? यदा ससाधना तदा प्रत्यक्षादिजन्या प्रमाणान्तरजन्या वा ? यदा प्रत्यक्षादि-जन्या तदा या एका व्यक्तिः तयैव किं व्यक्त्यन्तरेणेति ? तत्र तयैव व्यक्त्येति पक्षः स्वात्मनि वृत्तिविरोधादेव दूषितः । पक्षान्तरे दोषमाह—

प्रमाणतः सिद्धेः [प्रमाणानां] प्रमाणान्तरसिद्धिप्रसङ्गः ।२।१।१७।

प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तरस्वीकारपक्षे विभागसूत्रव्याघातोऽनवस्था-पातश्च । अन्यतमव्यक्त्यन्तरग्रहणपक्षे त्वनवस्थापात एवेति सूत्रार्थः ।२।१।१७।

निःसाधनपक्षे तु दोषमाह—

तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः ।२।१।१८।

तस्य प्रत्यक्षादिप्रमाणविषयप्रतिपत्तिसाधनस्य निवृत्ते निवर्तनात् प्रमाण-सिद्धिवत् प्रमेयसिद्धिः । यथा प्रत्यक्षादिप्रमाणविषया सिद्धिरुपलब्धिः निःसाधना तथा घटशकटादिप्रमेयविषया सिद्धिरपि निःसाधना भविष्यतीति प्रमाणमात्राभाव-प्रसङ्ग इति सूत्रार्थः ।२।१।१८।

तदेतत्सूत्रद्वयोपढौकितं पूर्वपक्षं प्रतिक्षिपन् अर्थभेदमाह—

न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ।२।१।१९।

यथा दीपप्रकाशः प्रमाणावयवः सँश्चक्षुरादिना प्रत्यक्षविशेषेण कदाचिद् गृह्यते कदाचिदाप्तोपदेशेन, कदाचिन्मानान्तरेण । न च प्रत्यक्षादिव्यतिरिक्तप्रमाणान्तरेण वा प्रमाणं, न तयैव व्यक्त्या वा। तथाऽन्येषामपि प्रत्यक्षादीनां प्रमाणानां प्रत्यक्षादि-प्रमाणमध्यवर्तिना व्यक्त्यन्तरेण व्यक्त्यन्तरस्य ग्रहणे न विभागसूत्रव्याघातो नाप्यनवस्थापातः । न च निःसाधना प्रमाणोपलब्धिरिति । न च स्वज्ञानेनैव सर्वत्र प्रमाणानां स्वकार्यकारणत्वं, चक्षुरादिष्वदर्शनात् । स्वज्ञानेनैव स्वकार्यं कुर्वतां धूमादीनामपि चक्षुरादिषु निष्ठालाभेनानवस्थापातः । न च प्रामाण्यज्ञानपुरस्सरा प्रवृत्तिः प्रवर्तमानस्य फलप्राप्त्या पश्चात् प्रामाण्यविनिश्चयसंभवादभ्यासदशापन्नेषु तज्जातीयत्वलिङ्गेन झटिति प्रामाण्यविनिश्चयवशादेव प्रवृत्तिसिद्धेः । तज्जातीयत्व-लिङ्गग्राहिणोऽपि ज्ञानस्य अभ्यासानभ्यासदशापन्नविज्ञानवर्गद्वयमध्यवर्तित्वेन बीजाङ्कुरवद्वर्तेन न्यायेन कालभेदेन प्रामाण्यग्रहणे सति अनादित्वेनानवस्था-भावात् । सर्वत्र संशयमापादयतः तद्धेतुनिश्चयाभावेन तस्यैवाभावप्रसङ्गात् । तस्मात् प्रमाणसामान्यमस्तीति सूत्रार्थः ।२।१।१९।

ननु यथा प्रदीपप्रकाशः प्रदीपान्तरमन्तरेण गृह्यते तथा प्रमाणान्यपि प्रमाणान्तरमन्तरेण ग्रहीष्यन्त इत्ययमर्थः पूर्वसूणात्रेभिहित इति व्याख्यानं कस्मान्नेष्यते इत्याशङ्क्याह—

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ।२।१।२०।

क्वचित् प्रदीपान्तरे ग्राह्ये ग्राहकस्य प्रदीपस्य निवृत्तिदर्शनात्, क्वचित् घटादौ ग्राह्ये तस्यैव ग्राहकस्यानिवृत्तिदर्शनात्, प्रदीपव्यतिरेकेण गृह्यमाण-प्रदीपान्तरवत् प्रमाणव्यतिरेकेणापि प्रमाणानि ग्रहीष्यन्ते । प्रदीपप्रमाणयोः ग्राह्य-त्वाविशेषादित्ययं हेतुरनेकान्तः । किं कारणं, प्रदीपदृष्टान्त एव ग्राह्यो न घट-दृष्टान्त इति विशेषहेत्वभावात् । अथ प्रदीपदृष्टान्तस्य प्रमाणवत् प्रकाशकत्वात् तदेव विशेषहेतुस्तद् दृष्टान्त इति चेत् तथाहि प्रकाशः सन् प्रदीपः प्रकाशकान्तरनिरपेक्षो दृष्टः, स्वप्रकाशेन प्रकाश्यः, न घट ईदृश इति । तदयुक्तं, तस्यापि प्रकाशकस्य सतः प्रदीपस्य स्वप्रकाशे चक्षुरादिप्रकाश-कान्तरसापेक्षत्वात् ।

समानजातीयप्रकाशकप्रदीपान्तरनिरपेक्षत्वमिह विवक्षितं, न पुनः प्रकाशमात्रनिरपेक्षत्वमिति चेत् ? तदप्यसारम् । विकल्पानुपपत्तेः । तथाहि किमत्यन्तसजातीयनिवृत्तिः प्रदीपे कथञ्चित् समानजातीयनिवृत्तिर्वा ? यद्यत्यन्त-समानजातीयनिवृत्तिः, सा तर्ह्यस्त्येव । ज्ञानेऽपि घटविषयज्ञानस्य घटविषय-ज्ञानान्तरमन्तरेण गृह्यमाणत्वात् । केन तर्हि गृह्यत इति चेत् घटविषयज्ञानं घटविषयज्ञानविषयज्ञानेनेति ब्रूमः । अथ कथञ्चित् समानजातीयनिवृत्तिरिति यः

४

कल्पः, सोऽप्यनुमितस्तैजसत्वादिना कथञ्चित् समानजातीयेन चक्षुरादिना ग्राह्यत्वात्। तस्माद्विशेषहेत्वभावात् ग्राह्यत्वाविशेषात्प्रदीपवत्प्रमाणानि प्रमाणान्तरनिरपेक्षाणीत्याचार्यैकदेशीयानां व्याख्यानमप्य[प]व्याख्यानमिति सूत्रार्थः।२।१।२०।

कथञ्चित समानजातीयेन चक्षुरादिना गृह्यमाणप्रदीपवत् प्रामाण्यान्यपि कथञ्चित् समानजातीयेन च प्रमाणान्तरेण ग्रहीष्यन्त इत्यस्मदीयव्याख्याने विशेषहेतुपरिग्रहस्य विद्यमानत्वान्नायमभिप्रेतदोष इत्याह—

[1]उपसंहारा[भ्य]नुज्ञानादप्रतिषेधात् [धः] ।२।१।२१।

तैजसत्वादिना कथञ्चित्समानजातीयेन चक्षुरादिना प्रदीपो गृह्यत इति विशेषहेतुपरिग्रहेण स्वपक्षे प्रदीपदृष्टान्तस्योपसंहारस्य अभ्यनुज्ञानादभ्युपगमात्-प्रतिषेधो न संभवतीति सूत्रार्थः।२।१।२१।

[प्रत्यक्षपरीक्षाप्रकरणम्।]

अथेदानीं प्रमाणविशेषं परीक्षमाणः प्रत्यक्षस्य प्राधान्येन प्रथममुद्दिष्टत्वात् तल्लक्षणं तावत्परीक्ष्यते—

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात् ।२।१।२२।

तत्रे"न्द्रियार्थसन्निकर्षोत्पन्न"मिति [१।१।४।] सूत्रेण प्रत्यक्षलक्षणं वोच्यते प्रत्यक्षकारणं वा? न तावल्लक्षणम्। इन्द्रियार्थसन्निकर्षोत्पन्नमित्यस्य कारणापदेशत्वात्। नहि कारणापदेशो लक्षणं भवति। न खलु मृद्दण्डचक्रसूत्रादयः कारणं घटस्येत्युक्ते घट उपलक्षितो भवति। तस्मान्न युक्तो लक्षणपक्षः। अथ कारणमनेनोच्यते। तदप्ययुक्तम्, अलक्षणत्वात् कारणापदेशस्य। नहि कारणापदेशः लक्षणं भवतीत्युक्तमेव। भवतु कारणपक्षाश्रयणं तथाप्ययुक्तं, असमग्रवचनत्वात्। सन्ति चान्यान्यपि कारणानि प्रत्यक्षज्ञानस्य। नहीन्द्रियार्थसन्निकर्षमात्रात् प्रत्यक्षज्ञानं जायते, अपि त्वालोकादिभिरपीति। तस्मात्प्रत्यक्षलक्षणस्य वा कारणस्य वानुपपत्तिः प्रत्यक्षलक्षणानुपपत्तिः, लक्षणपक्षे कारणपक्षे चोभयत्र। तस्य सूत्रस्यासमग्रवचनत्वादिति सूत्रार्थः।२।१।२२।

ननु कारणपक्षे असमग्रवचनत्वमसिद्धमिति चेत् तत्राह--

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ।२।१।२३।

ज्ञानं हि नाम संयोगजो गुणो नासंयुक्ते द्रव्ये संयोगजस्य गुणस्योत्पत्तिरिति। आत्ममनःसंयोगः कारणम्। अनन्यथासिद्धान्वयव्यतिरेकत्वात्। तथाहि शरीरसंबन्धादात्मप्रदेशे मनःसंयोगे सति ज्ञानं जायते। असति तु तस्मिन् न

१—भाष्यपंक्तिरिह सूत्रतया परिगृहीता।

जायत इति। तथेन्द्रियमनःसंयोगाभावे ज्ञानं न जायते। सति तु तस्मिन् जायत इति। तस्याप्यन्वयव्यतिरेकवत्त्वेन कारणत्वम्। अन्यथा युगपज्ज्ञानोत्पत्तिप्रसङ्गात्। तस्मादात्ममनः इन्द्रिय[अर्थ]सन्निकर्षयोः संयोगयोरभावेन प्रत्यक्षज्ञानस्योत्पत्तिरित्यसमग्रवचनत्वं तत्र सिद्धमिति सूत्रार्थः।२।१।२३।

नन्वनन्यथासिद्धार्थान्वयत्वेन कारणत्वं किमित्युच्यते? यावता सति भावमात्रेण कारणत्वं किमिति नेष्यत इति येषां पक्षस्तेषां मते दोषमाह—

दिग्देशकालाकाशेष्वप्येवं प्रसङ्गः।२।१।२४।

दिग्देशकालाकाशादीनां नित्यविभुत्वाभ्यां संन्निधेरवर्जनीयत्वे सति भावमात्रस्य विद्यमानत्वात्। तेषामपि कारणत्वप्रसङ्ग एवं भवतीति सूत्रार्थः।२।१।२३।

यत्तावदात्ममनःसन्निकर्षस्य प्रत्यक्षलक्षण [१।१।४] सूत्रे पाठादसमग्रवचनत्वं कारणपक्षेऽभ्यधायि तत्र परिहारमाह—

ज्ञानलिङ्गत्वादात्मनो नानवरोधः।२।१।२५।

ज्ञानलिङ्गत्वं तावदात्मन इच्छादिसूत्रे [१।१।१०] ज्ञानपदात् स्थितम्। तेन हि ज्ञानपदेनाभिधीयमानं कार्यमनित्यत्वात् कार्यत्वे सति विभुद्रव्यसमवायाद्गुणतश्च। तस्य च गुणस्य कार्यभूतस्य यदुपादानकारणं स आत्मा। तदन्यस्य तदुपादानकारणत्वासम्भवात्। तदेवमात्माश्रयत्वे सिद्धे ज्ञानगुणस्य संयोगजत्वात्संयोगान्तरस्य चासंभवादात्ममनःसंयोग एव कारणत्वेनार्थात्सिद्धो भवति। सिद्धे पुनरात्ममनःसंयोगे तस्य संयोगस्य ज्ञानकारणभूतस्य प्रत्यक्षलक्षणसूत्रेऽनवरोध इत्येतन्नास्ति। ज्ञानलिङ्गत्वादात्मनो लक्षणसूत्रस्थितज्ञानपदमात्रादेव सर्वस्य पदार्थस्यानभिधानेऽपि सामर्थ्यलभ्यत्वादिति सूत्रार्थः।२।१।२५।

नन्वनभिधीयमानमपि यदि कारणभूतेन्द्रियात्ममनस्संयोगादि ज्ञानपदसामर्थ्याल्लभ्यते। तस्मिन् इन्द्रियार्थसन्निकर्षोऽपि नाभिधातव्यः। ज्ञानपदसामर्थ्यादेव लभ्यमानत्वादित्याशङ्क्याह—

[१]प्रत्यक्षनिमित्तायौगपद्यलिङ्गत्वाच्च न मनसः।२।१।२६।

यत्पुनरिन्द्रियमनःसंयोगस्यानभिधानेनासमग्रवचनत्वमुक्तम्। तदपि नास्ति। कुतस्तदयौगपद्यलिङ्गत्वात्। तस्य ज्ञानस्यायौगपद्यं युगपदनुत्पत्तिस्तल्लिङ्गं मनः। "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्ग"मिति[१।१।१६] वचनात्। ततश्च ज्ञानपदस्वीकारसामर्थ्यादेवेन्द्रियमनःसंयोगेऽपि कारणत्वेन तत्र [तत्] लभ्यत एवेति सूत्रार्थः।२।१।२६।

१—तदयौगपद्येत्यादिः प्रथितः पाठः।

१ तत्त्वाच्चेन्द्रियार्थसन्निकर्षस्य ।२।१।२७।

यस्मादिन्द्रियार्थयोः संनिकर्षः प्रत्यक्षस्यैव निमित्तं नान्यस्यात्ममनःसन्निकर्षादिवत् । अतस्तस्याभिधानं कर्तव्यम् । एतदुक्तं भवति । कारणपक्षे तदेव कारणं वक्तव्यम्, यदसाधारणत्वेन प्रत्यक्षज्ञानमखिलमितरस्मात् व्यवच्छिनत्ति । अन्यथा लक्षणकरणे प्रवृत्तस्य सूत्रकारस्य कारणमात्रकथनेन अप्रस्तुताभिधायित्वप्रसङ्गात् । अनभिधाने च प्रत्यक्षस्यालक्षितत्त्वापत्तेः । न चेदृशमसाधारणत्वमात्ममनःसंयोगस्येन्द्रियमनःसंयोगस्यालोकादेरन्यस्य वा सम्भवति । एकस्य साधारण्यादितरेषामव्यापकत्वात् । तस्मादिन्द्रियार्थयोः सन्निकर्षः सकलप्रत्यक्षव्यापित्वेन लक्षणत्वादभिधातव्यः । कारणपक्षेऽपीति । एतेनेन्द्रियार्थसन्निकर्षोत्पन्नमित्यस्य कारणापदेशत्वेनालक्षणत्वात् । लक्षणपक्षाश्रयणमयुक्तमिति यदुक्तं तदपि निरस्तं भवति । नन्वसाधारणकारणकथनं यदि लक्षणं संभवति तर्हि कारणपक्षावलम्बनं व्यर्थमकारणस्यापि लक्षणत्वेन व्यवस्थाप्यमानत्वात् । एवं तथापि प्रौढ़िवादि[द]तया तत्सूत्रकारेण कृतं न तु परमसिद्धान्तत्वेन [इति] बोद्धव्यम् । यत्खलु कारणमकारणं वा प्रत्यक्षस्य समानासमानव्यवच्छेदकं भवति । तदेव वक्तव्यं नान्यत् । तथापि कारणमुखेन तदुक्तमित्येतावानेव विशेष इत्यभिसन्धिः **सूत्रकारस्येति** सूत्रार्थः ।२।१।२७।

प्रत्यक्षज्ञानकारणेषु मध्ये लक्षणार्थमिन्द्रियार्थसन्निकर्षस्यैव ग्रहणं कार्यं नात्ममनःसंयोगादेः । कुतः ? तस्यैव प्राधान्यादित्याह—

सुप्तव्यासक्तमनसां चेन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात् ।२।१।२८।

सुप्तानां व्यासक्तमनसाञ्च तीव्रध्वनिस्पर्शादिना प्रबोधज्ञाने सहसोपस्थितविषयान्तरविज्ञाने चेन्द्रियार्थसन्निकर्षस्य प्राधान्यनिमित्तत्वात्तस्यैव ग्रहणं कार्यं नान्यस्य । तथाहि यथा खल्वयमर्धरात्रे मयोत्थातव्यमिति सङ्कल्प्य सुप्तस्तीव्रध्वनिस्पर्शवशात् तस्मिन्नेवार्धरात्रे प्रबुध्यते तदा तस्य तीव्रध्वनिस्पर्शविषयं प्रबोधज्ञानमुपजायमानमिन्द्रियार्थसन्निकर्षादेवोपजायते । नात्ममनःसङ्कल्पाभ्याम् । तयोस्तदानीमसम्भवात् । तथा च यदि कस्मिंश्चिद्विषयान्तरे व्यासक्तः प्रयत्नप्रेरितं मन इन्द्रियार्थेन संयोज्य विषयान्तरं जानानः स्तिमितता झटित्युपस्थापिततीव्रध्वनिस्पर्शादिविषयान्तरविषयं विज्ञानमुपजायमानं नात्ममनःसङ्कल्पप्रयत्नाभ्यां जायते । किन्तर्हि ? इन्द्रियार्थसन्निकर्षादेव । तयोरन्यत्र व्यापृतत्वादतः प्रत्यक्षज्ञानकारणेषु मध्य इन्द्रियार्थसन्निकर्षस्यैव प्राधान्यं नान्यस्य । नन्वात्ममनःसङ्कल्पप्रयत्नयोरभावे मनसः क्रियाकारणाभावात्

१—प्रत्यक्षनिमित्तत्वाच्चेन्द्रियार्थयोः सन्निकर्षस्येति स्वशब्देन वचनम् । इति न्यायसूचीनिबन्धधृतपाठः ।

आत्ममनःसंयोगस्याप्रधानत्वेनापि कारणभूतस्य तदानीमसंभवात्। सुप्त-व्यासक्तमनसोः पुरुषयोरुत्पद्यमानं प्रबोधज्ञानं नोत्पद्येत । सत्यमेव, तथापि अवसर्पणोपसर्पणन्यायेनादृष्टवशादुत्पन्नक्रियं मन आत्मना संयुज्यते । तेन चात्म-मनः संयोगेन सहकृत इन्द्रियार्थसन्निकर्षः प्राधान्येन प्रबोधज्ञानं जनयतीत्यदोष इति सूत्रार्थः ।२।१।२८।

इतोऽपि प्राधान्यमित्याह—

तैश्चापदेशो ज्ञानविशेषाणाम् ।२।१।२९।

येष्वयमिन्द्रियार्थसन्निकर्षस्तैरिन्द्रियैरर्थैश्चापदेशो ज्ञानविशेषाणाम् । गन्ध-विज्ञानं रूपविज्ञानं रसविज्ञानं घ्राणविज्ञानं चक्षुर्विज्ञानमित्यादि । न पुनरेव-मन्यत्रात्मादिषु व्यपदेशस्तस्मादस्यैव प्राधान्यमिति सूत्रार्थः ।२।१।२९।

इन्द्रियार्थसन्निकर्षस्य प्राधान्यकथनेनान्यस्यान्यस्य कारणत्वमुक्तमिति मन्यमानश्चोदयति—

व्याहतत्वादहेतुः ।२।१।३०।

इन्द्रियार्थसन्निकर्षमात्रादेव यदा प्रत्यक्षज्ञानं जायते तदा व्याहतं भवति । कस्मादात्ममनः संयोगादिषु सत्सु प्रत्यक्षज्ञानोत्पत्तेरसंभवात् । तस्मात् सूत्रत्रितये-नान्येषामकारणत्वे यो हेतुरुक्तः न स युक्त इति सूत्रार्थः ।२।१।३०।

परिहरति—

नार्थविशेषप्राबल्यात् ।२।१।३१।

अर्थविशेषस्तीव्रध्वनिस्पर्शादिः । तेन **प्राबल्यं** प्राधान्यमिन्द्रियार्थ-सन्निकर्षस्य । तस्मादर्थविशेषप्राबल्यादेतदुक्तं भवति । न मयात्ममनःसंयोगादेः प्रत्यक्षकारणत्वं प्रतिषिध्यते । किं तर्हि ? इन्द्रियार्थसन्निकर्षस्यानन्तरोक्तन्यायेन प्राधान्यात् प्रत्यक्षसूत्रे [१।१।४।] समानासमानजातीयस्य व्यवच्छेदार्थमुपादानं कृतमिति । अतो व्याहतत्वादहेतुः [२।१।३०।] इति यदुक्तं तन्न [युक्तमिति] सूत्रार्थः ।२।१।३१।

[प्रत्यक्षस्यानुमानत्वपरीक्षाप्रकरणम्]

इदानीं लक्ष्यासम्भवमुखेन लक्षणं दूषयितुमाह—

प्रत्यक्षमनुमानमेकदेशग्रहणादुपलब्धेः ।२।१।३२।

यदिन्द्रियार्थसन्निकर्षादुत्पद्यते [ज्ञानम् अयं वृक्ष] इति । एतत्किल प्रत्यक्षं तत्त्वनुमानमेव । कस्मात् ? एकदेशग्रहणादुपलब्धेरेकदेशमवयवं गृहीत्वा तेन

तत्सहचरितान्येकदेशान्तराणि अनुमाय पश्चात्प्रतिसन्धानेन वृक्ष इत्युपलभते। यथा आसन्दिकैकदेशं दृष्ट्वा तदेकदेशान्तरमनुमिनोति। एतदुक्तं भवति, न तावदवयवी नाम कश्चिदस्ति पदार्थः। तत्सद्भावे प्रमाणाभावात्। अपि त्ववयवा एव परमार्थसन्तः कथञ्चित्सङ्गताः। तेषु कतिपयानवयवान् गृहीत्वा तत्सहचरितावयवाननुमाय प्रतिसन्धानजेयं वृक्षबुद्धिः तानेवावयवानालम्बमानानुमानमिति प्रत्यक्षस्यानुमानेऽन्तर्भावेन पृथग्लक्ष्यासंभवाद्विभागसूत्रे न्यून[ाधिक] संख्याव्यवच्छेदस्तल्लक्षणकथनञ्चेति द्वितयमनुपपन्नमिति सूत्रार्थः।२।१।३२।

लक्ष्यासंभवात् प्रत्यक्षस्य यदिदमनुमानेऽन्तर्भावकथनं तन्न संभवतीत्याह—

न प्रत्यक्षेण यावत्तावदप्युपलम्भात्।२।१।३३।

प्रत्यक्षमनुमानमेकदेशग्रहणादित्यत्र [२।१।३२] सूत्रे यावदेकदेशस्य ग्रहणमवयवान्तरानुमानार्थमङ्गीक्रियते तावदेकदेशस्य ग्रहणं प्रत्यक्षेण स्वीक्रियते न वा? यदि स्वीक्रियते, तर्हि तावतः प्रत्यक्षत्वेन लक्ष्यसिद्धेः, विरुद्धो हेतुः। किं कारणं, न प्रत्यक्षेण यावत्तावदप्युपलम्भात्। यावन्तमेकदेशं गृहीत्वा यमेकदेशमेकदेशान्तरं वा एकदेशत्वात्पूर्वोपलब्धैकदेशवदित्यनुमिनोति। तावतोऽनुमापकस्यैकदेशस्य प्रत्यक्षेणोपलम्भात्। अथ न स्वीक्रियते तर्ह्यसिद्धो हेतुः, अनुमापकस्यैकदेशस्याग्रहणादासन्दिकाङ्गे चोक्तदोषस्य समानत्वादिति सूत्रार्थः।२।१।३३।

ननु गृह्यमाणस्यानुमान ········ग्रहणं मा भूत् प्रत्यक्षेणानुमानेन मानान्तरेण वा भवतु। को दोष इति चेत्तत्राह।

[1]नानुमानप्रसङ्गस्तत्पूर्वकत्वात्।२।१।३४।

[अन्यथापि च प्रत्यक्षस्य नानुमानत्वप्रसङ्गः] कुतः? तत् पूर्वकत्वात्। प्रत्यक्षं पूर्वं यस्य तदिदं तत्पूर्वकम्, तस्य भावस्तत्पूर्वकत्वं तस्मात्तत्पूर्वकत्वादिति। अनुमानप्रसङ्ग इत्युपलक्षणं प्रसङ्ग इत्यपि द्रष्टव्यम्। समानन्यायत्वादेतदुक्तं भवति। न तावदनुमानस्यानुमानान्तरेण, तेनैव वानुमानेन तद्व्याप्तिग्रहणं सम्भवति। एकत्रानवस्थापातादितरत्रेतरेतराश्रयत्वप्रसङ्गात्। अतः सुदूरमपि गत्वा लिङ्गलिङ्गिसंबन्धदर्शनं द्वितीयलिङ्गिदर्शनं चाद्यात् प्रत्यक्षत इति वक्तव्यम्। तथा च सति तद्विषयस्य प्रत्यक्षस्य लक्ष्यत्वेन सिद्धेः विरुद्धं तदवस्थमेवेति सूत्रार्थः। एवमुपमानशब्दयोरपि तत्पूर्वकत्वनियमो बोद्धव्यः।२।१।३४।

तदेवं परपक्षावलम्बनमुखेन दूषणमुक्तं सूत्रकारेण। साम्प्रतं स्वपक्षसिद्धं दूषणमाह—

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता।

नचैकदेशोपलब्धिरवयविसद्भावात् ।२।१।३५।

अवयविनोऽसत्त्वं मन्यमानेन त्वयैकदेशमात्रोपलब्ध्या प्रत्यक्षबुद्धेरनुमानत्वमुक्तम्। नत्वियमेकदेशोपलब्धिः। अपि तु तस्य तत्सहचरितस्यावयविनश्चोपलब्धिः। किं कारणमवयविसद्भावात्। अवयविनोऽप्यवयववदुपलब्धिलक्षणप्राप्तत्वेन गृह्यमाण[ा]विशेषत्वात्। का पुनरियमुपलब्धिलक्षणप्राप्तिः ? महत्त्वानेकद्रव्यरूपविशेषसमवाया। न चैवमुपलब्धिलक्षणप्राप्तत्वेनोपलभ्यमानस्य असति बाधके नास्तित्वं प्रतिपादयितुं शक्यम्।

ननु वृत्तिविकल्पादि बाधकं प्रमाणमस्तीति चेत् ? तथाहि किमवयव्यवयवेषु वर्तमान एकदेशेन वर्तते कार्त्स्न्येन वा ? न तावदेकदेशेन वर्तते। वर्तमानैकदेशव्यतिरेकेण एकदेशान्तराभावात्। न च कार्त्स्न्येनैकत्र कृत्स्नसमाप्तस्यान्यत्र वृत्त्यसम्भवादेकद्रव्यस्य कारणविभागासम्भवेन नित्यत्वप्रसङ्गाच्च। न च गत्यन्तरेण वृत्तिरस्ति। अतो विद्यमानवृत्तिकत्वाद्वाजिविषाणवत् असत्त्वमेवावयविन इति। तथा विरुद्धधर्मसंसर्गश्चावयव्यभ्युपगमे दुर्वारः। किं कारणमेकस्यावयवस्य रागे कम्पे ग्रहणे आवरणे च सति तत्स्थानस्यावयविनो रागकम्पग्रहणावरणसंभवेनावयवान्तरावस्थितस्यापि तस्याभेदेन तथाभावप्रसङ्गात्। कम्परागग्रहणावरणप्रत्यया भवेयुः। न चैतद् दृष्टमिष्टं वा। अथवा अवयवस्य रागादयो नावयविन इति चेत्तर्हि रक्तावयवस्थानस्यापि तस्यारक्तत्वं पृथग्गतिमत्त्वेन युतसिद्धत्वेन गृहीतावयवस्थानस्याप्यग्रहणमावृतावयवस्थानस्यानावरणमिति दोषाः प्रादुर्भवेयुस्तस्मान्नास्त्यवयवीति।

तदयुक्तम्। एकस्मिन् कृत्स्नैकदेशविकल्पासम्भवात्। तथाहि एकमवयविनमनेकावयवेषु वर्तमानमङ्गीकृत्य त्वया कृत्स्नैकदेशविकल्पः कृतः। किमेकदेशेन वर्तते कार्त्स्न्येन वेति ? तत्र यदैकदेशेन वर्तते तदा तस्यावयविन एकदेशा एकदेशेषु वर्तन्ते इति स्यान्न पुनरेकमनेकत्रेति। यथा कार्त्स्न्येनेत्युक्ते सर्वत्रावयवेषु प्रत्येकमवयविनः परिसमाप्तेरनेकमनेकत्र वर्तत इति स्यान्न पुनरेकमनेकत्रेति।

तस्माद्यदनुयोगाधिकरणे व्याघातो मा भूदित्यवयव्यवयवेषु वर्तत इत्येतावदेव वक्तव्यं नान्यत्। ततश्चाविद्यमानवृत्तिकत्वाद्वाजिविषाणवदसत्त्वमिति रिक्ता वाचोयुक्तिः। स्वरूपेण वृत्तेरभ्युपगमात्। यत्पुनर्विरुद्धधर्मसंसर्ग इति दूषणमुक्तम्। तत्रैकावयवरागेऽवयविनो राग इति एतन्नास्ति। रागस्यान्यधर्मत्वात्। रागः खलु कुसुम्भादिद्रव्यसंबन्धी नावयवस्य तन्तोस्तदवयविनः पटस्य वा। पटो रक्तस्तन्तू रक्त इति तु कुसुम्भादिद्रव्यवशात् भ्रमः। न चावयवे तन्ताविव तदवयविनि पटे सर्वत्र रागभ्रान्त्या भ्रमितव्यम्। कुसुम्भादिद्रव्यसंबन्धस्य भ्रान्तिहेतोरव्याप्यवृत्तित्वात्। तस्मान्न रक्तारक्तलक्षणविरुद्धधर्मसंसर्गात् पटस्य पूर्वरूपेणावस्थानात्। नाप्यवयविकम्पानभ्युपगमे पृथग्गतिमत्त्वेनयुतसिद्धिदोषः। किं कारणं, युतसिद्धिर्नाम तत्संबन्धस्याविद्यमानता।

नचावयवावयविनोः पृथग्गतिमत्त्वेऽपि अवयवसंबन्धस्यावयविनि विद्यमानता समस्ति । तत्संबन्धस्यैव तदुत्पत्तिरूपत्वात् जातः संबन्धश्चेत्येकः कल्प इति । तस्मान्न कम्पाकम्पप्रसङ्गः । नापि ग्रहणाग्रहणविरोधः सम्भवति । गृहीतावयवस्थानस्यावयविनो गृहीतत्वात् । न च वह्न्यवयवस्थानस्य ग्रहणवत् स्थौल्योपलम्भेन भवितव्यमिति वाच्यम् । स्थौल्यस्य परिमाणविशेषत्वेन सामग्र्यन्तरग्राह्यत्वात् । नहि सामग्र्यन्तरग्राह्यस्य तदाश्रयस्य द्रव्यस्य ग्रहणं सम्भवतीति । एतेनावृतानावृतत्वविरोधोऽपि परिहृतः । कतिपयावयवावरणेऽपि अनावृतावयवैः सार्धं ग्रहणात् । तदेवं वृत्तिविकल्पादिबाधकविरुद्धधर्मसंसर्गयोरभावादवयविसिद्धेः । नैकदेशीयग्रहणमात्रेण प्रत्यक्षसिद्धिः । किन्त्ववयविग्रहणादपि तत्सिद्धिरिति सूत्रार्थः ।२।१।३५।

[प्रासङ्गिकमवयविपरीक्षाप्रकरणम्]

साध्यत्वादवयविनि सन्देहः ।२।१।३६।

अन्त[स्तु]तावदवयविनः [°यवी] स्वरूपेण नास्तीति साध्यत्वं न संभवति । धर्मिणोऽप्रसिद्धत्वेन हेतोराश्रयासिद्धत्वप्रसङ्गात् । नाप्यवयवव्यतिरिक्तोऽवयवी तद्व्यतिरेकोऽन्यानवयवित्वादित्यादिभिः साधनैरव्यतिरिक्तत्वेन साध्यत्वम् । तत्रापि भिन्नाभिन्नयोः सपक्षविपक्षयोरभावेन हेतूनामसाधारणत्वादसिद्ध्यादिदूषणान्तरदूषितत्वाच्च । अतः परपक्षासिद्धत्वमेवावयविनः साध्यत्वमभिप्रेतमिति वक्तव्यम् । तदपि न स्वरूपेण संशयकारणम् । संशयहेतुषु समानधर्मादिष्वपाठात् । अतः परपक्षासिद्धत्वेनापि विप्रतिपत्तिर्लक्षिता । कार्ये कारणशब्दोपचारात् । एवञ्च सति साध्यत्वाद्वादिप्रतिवादिनोः **नैयायिकबौद्धयोः** सिद्धासिद्धत्वेन व्याहतप्रवादविषयत्वेन विप्रतिपत्तेरवयविनि संशय समीपस्थस्य स्यात् । ततश्चावयविसद्भावादिति [२।१।३५] अवयविनः सिद्धवन्निर्देशः पूर्वसूत्रे न संभवतीति सूत्रार्थः ।२।१।३६।

अवयविसद्भावप्रतिपादकप्रमाणोपन्यासात् प्रागेव **सूत्रकारः** तत्प्रवेशमार्गसाधनाय तर्कापरनामानं प्रसङ्गमाह—

सर्वाग्रहणमवयव्यसिद्धेः ।२।१।३७।

प्रत्यक्षादिभिः प्रमाणः सर्वेषां द्रव्यगुणकर्मसामान्यादीनामग्रहणम् । यद्यवयवी नाम न स्यात् पदार्थस्तदा सर्वेषां द्रव्यगुणकर्मसामान्यविशेषाभावानाम् [अग्रहणं प्रसज्येत] । सर्वैः प्रत्यक्षादिभिः प्रमाणैर्यदिदं ग्रहणमिष्टं पटः शुक्लः परिस्पन्दते स चास्ति । तदारम्भाः परमाणवो व्यापृताः । तत्र गुणादयो वर्तन्ते । स चान्यत्रास्तीति तन्न स्यात् । किं कारणं, निराश्रयत्वेन रूपादीनामनुपलब्धेः । निरवयवविषयस्य प्रत्यक्षस्यासम्भवेन तन्मूलानामनुमानादीनाम-

संभवाच्च । न च रूपादिपरमाणूनां स्वतन्त्राणां ग्रहणमिति वाच्यम् । परमाणूनामतीन्द्रियत्वेन स्थूलोपलम्भाभावस्याग्रे वक्ष्यमाणत्वात् । अतोऽवश्यमस्ति नावयविना [?] भवितव्यमिति सूत्रार्थः ।२।१।३७।

तदेवं प्रमाणानुग्राहकं प्रसङ्गं प्रतिपाद्य तदनुग्राह्यं प्रमाणमाह—

धारणाकर्षणोपपत्तेश्च ।२।१।३८।

न केवलमिदमेकं द्रव्यमिति स्थूलोपलम्भलक्षणप्रत्यक्षादवयविसिद्धिः । किं तर्हि ? धारणाकर्षणोपपत्तेर्धारणाकर्षणोपपत्तिलक्षणानुमानाच्चेति । प्रमाणद्वयसमुच्चयार्थश्चकारः । तत्र धारणं नामैकदेशसाहचर्ये सत्यवयविनो देशान्तरप्राप्तिप्रतिषेधः । आकर्षणञ्चैकदेशसाहचर्ये सत्यवयविनो देशान्तरप्रापणम् । एते धारणाकर्षणे विज्ञानाकाशादावदर्शनादवयविनं साधयतः । तथाहि योऽसौ दृश्यमानो घटादिरर्थोऽवयवी परिमाण [परमाणु] सञ्चयरूपेण विवादाध्यासितः नासावनवयवः धारणाकर्षणवत्त्वात् । यः पुनर्निरवयवः, न चासौ धारणाकर्षणवान् । यथा विज्ञानाकाशादि । न च घटादिरर्थस्तस्मान्नावयवीति ।

ननु जत्वादिद्रव्यसंग्रहकारिते धारणाकर्षणे नावयविकारिते इति चेत् तदयुक्तं, जत्वादिद्रव्यसंग्रहकारितयोरपि तयोरवयविन्येव दृष्टत्वात् । न खलु जतुसंगृहीताः तृणोपलकाष्ठादयो धार्यमाणा आकृष्यमाणा वा निरवयवा भवन्ति । अतो धारणाकर्षणवत्त्वादस्त्यवयवीति । तथेदमेकद्रव्यमिति स्थूलवस्तूपलम्भ ऐन्द्रियको दृष्टः । नचासावुपलम्भः परमाणुमात्रविषय इति वक्तुं शक्यम् । परमाणूनामतीन्द्रियत्वेन तद्विषयत्वाभावात् । तथाहि परमाणवः किं प्रत्येकं द्वितीयभावं भजेरन् सञ्चिता वा ? न तावत् प्रत्येकं स्थौल्यानवभासप्रसङ्गात् । अतोन्द्रियत्वाच्च । न च प्रतिभासधर्मस्थौल्यमर्थधर्मतया बहिष्ट्वेन प्रतिभासमानत्वात् । नापि सञ्चिताः, एकत्वप्रतिभासाभावप्रसङ्गात् । न खलु बहुषु परमाणुषु एकत्वप्रतिभासो युक्तः । अनेकेषु एकप्रत्ययस्यादृष्टत्वात् । सञ्चितत्वेऽप्यतीन्द्रियत्वापायाच्च । नत्वालोकमनस्काराद्यर्थान्तरादिसंबन्धा [द्वा] एव परमाणवः समुत्पद्यन्ते । ते सातिशयाः सञ्चिता इत्युच्यन्ते । न पुनर्यत्र तत्रोत्पन्नाः । अतो यत्र तत्रोत्पन्नानामणूनामतीन्द्रियत्वेऽपि सातिशयानामैन्द्रियकत्वे न कश्चिद्विरोध इति चेत्, तदयुक्तम् । मध्यपरभागावस्थितानामप्यणूनां सातिशयत्वाविशेषेण अर्वाग्भागवदैन्द्रियकत्वप्रसङ्गाएकप्रत्ययाभावप्रसङ्गाच्च । तस्मादनेकत्वात् तीन्द्रियत्वाभ्यां सातिशयाः परमाणव इमामेकप्रत्यक्षज्ञानस्य न विषयतामासादयन्ति । न चायं प्रत्यक्षो निर्विषयः निरालम्बनज्ञानस्याग्रे निराकरिष्यमाणत्वात् । अतो यस्तस्य प्रत्यक्षज्ञानस्य विषयः सोऽस्त्यवयवीति सूत्रार्थः ।२।१।३८।

सेना [वन] वद्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ।२।१।३९।

नन्वारादगृह्यमाणपृथक्त्वेषु अनेकेषु हस्त्यश्वरथादिषु यथा सेनेत्येकः प्रत्ययो यथा वा नानाजातीयेषु आरादगृह्यमाणपृथक्त्वेषु धवखदिरादिषु वनमित्येकः प्रत्ययस्तथा सातिशयेषु परमाणुषु प्रत्येकमगृह्यमाणपृथक्त्वेषु एकमिदं द्रव्यमित्येकत्वप्रत्ययो भविष्यतीति चेन्नातीन्द्रियत्वात् । पूर्वोक्तन्यायेन सर्वदा परमाणूनामतीन्द्रियत्वेन कदाचिदपि स्वरूपेण पृथग्रूपेण वा योग्यत्वाभावात् । तस्मात्सेनावनवद्ग्रहणमिति विषमो दृष्टान्त इति सूत्रार्थः ।२।१।३९।

[अनुमानपरीक्षाप्रकरणम्]

अथेदानीमवसर प्राप्तमनुमानं परीक्ष्यते—

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ।२।१।४०।

रुध्यतेऽनेनेति रोधो वाय्वभ्रसंयोगादिर्वर्षप्रतिबन्धः । तस्मिन्सति परिदृष्टाऽपि मेघोन्नतिर्न वृष्टिमुत्पादयति । **उपघातो** नाम पिपीलकानां नीडावस्थितानामण्डादीनां त्रासनम् । **सादृश्यं** नाम धूमसदृशे वाष्पादौ धूमज्ञानम् । तथाहि मेघोन्नत्या भविष्यति वृष्टिरिति पूर्ववत् तत् । कारणेन कार्यानुमानस्योदाहरणमुक्तम् । कस्मात् दृष्ट्वाऽपि मेघोन्नतिं क्वापि प्रतिबन्धेन वर्षानुत्पत्तिदर्शनात् । तथापि पिपीलकानामण्डसंचारेण अवान्तरकार्येण वर्षहेतुभूतः संक्षोभोऽनुमीयते । तस्माद् भूतसंक्षोभाद् भौमेनोष्मणा क्वाथ्यमाना पिपीलिका स्वाण्डान्युपरिष्टान्नयन्ति । तत् खलु शेषवतः कार्यात् कारणानुमानस्योदाहरणम् । तदपि व्यभिचरति तस्मात् नीडोपघातादपि त्रस्तानां पिपीलिकाण्डसंचारदर्शनात् । तथा स्वकारणादुत्पन्नेन धूमेन स्वसंयुक्तो वह्निरनुमीयते तत्खलु सामान्यतो दृष्टस्योदाहरणं भवति । कार्यकारणरूपविशेषस्यापि विवक्षितत्वात् तदपि व्यभिचरति । क्वचिद्बहुलवाष्पधूलीपटलादौ धूमबुद्धिसंभवेन वह्न्यभावेऽपि वह्न्यनुमानसंभवात् । तदेतेभ्यो हेतुभ्यः पूर्ववदाद्युदाहरणेषु व्यभिचारसम्भवेन लक्ष्यासिद्धेरनुमानलक्षणमसङ्गतमिति सूत्रार्थः । अत्र खलु सूत्रे **भाष्यवार्तिक**मार्गानुसरणं यदीषत् मया कृतं तदनुमानलक्षणपरीक्षासूत्रव्याख्यानसामञ्जस्यायेति मन्तव्यमिति ।२।१।४०।

तदेतत्परिहरति—

नैकदेशत्राससादृश्येभ्योऽर्थान्तरभावात् ।२।१।४१।

अप्रतिबद्धायां सत्यां खलु मेघोन्नतौ वृष्टिरवश्यम्भाविनी । सा मेघोन्नतिवर्षलिङ्गत्वेन विवक्षिता नोन्नतिमात्रम् । उन्नतिमात्रं तु लिङ्गैकदेशः । तथा भूयिष्ठानामत्रस्थानां पिपीलिकानां भूयिष्ठेषु स्थानेषु प्रवाहेणाण्डसञ्चारणं वर्षहेतुभूतसंक्षोभस्य लिङ्गं नाण्डसञ्चारणमात्रम् । तथा सातत्यं बहुलत्वादिगुणवि-

शिष्टं च धूमदर्शनं वह्नेरनुमापकं न धूमवस्तूद्गममात्रं तत्खलु सादृश्यान्मिथ्येति कारणं लिङ्गज्ञाने प्रतिपत्तृनैपुण्यस्य विवक्षितत्वादेतदुक्तं भवति **एकदेशत्रास-सादृश्येभ्यः** मेघोन्नत्यण्डसंचारधूमवस्तूद्गममात्रेभ्योऽनुमापकानां विशिष्टोन्नति-प्रभृतीनां विशिष्टप्रतिपत्तृदृष्टानामर्थान्तरभावाद्विलक्षणत्वाल्लक्ष्यसम्भवेनानुमान-लक्षणं सङ्गतमिति यदुक्तं तन्नेति सूत्रार्थः ।२।१।४१।

[वर्तमानपरीक्षाप्रकरणम्]

त्रैकाल्यग्रहणादित्यनेन सूत्रेण [भाष्येण ।१।१।५।] त्रिकालविषयमनुमान-मित्युक्तं, तत्र दूषणमाह—

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ।२।१।४२।

अत्र **वर्तमानाभाव** इति विशेषप्रतिषेध एव दिग्देशनियमानपेक्षपरापर-व्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रत्ययानामनन्यनिमित्तत्वेन कालस्वरूपसिद्धि-सुव्यक्त[:, क्ते]मिति मन्वानः **सूत्रकारस्तत्**परीक्षामुपेक्ष्य कालविशेषपरीक्षामेव कृतवानिति सूचयति । ततश्चास्य सूत्रस्यायमर्थः । न तावत् क्रियाव्यङ्ग्यः कालः । तस्याः साध्यत्वेन कालाव्यञ्जकत्वात् । किं तर्हि, कारकव्यङ्ग्यः । तस्य सिद्धत्वेन कालव्यक्तिः [क्ति] प्रति हेतुत्वसंभवात् । एवञ्च वर्तमानकालस्या-संभवात् । किं कारणं वृन्तात्पततः फलस्य पतितपतितव्यकालोपपत्तेः । पतितव्यपतिता स्वलक्षणकारकद्वयव्यज्यमानयोः पतितव्यपतितकालयोरेवोप-पत्तिसम्भावना न च मध्ये कश्चिदध्वा विद्यते । येन तेनाभिव्यज्यमानो वर्तमानः कालो गृह्यते । तस्माद्वर्तमानकालाभावात् त्रिकालविषयमनुमान-मित्ययुक्तमिति ।२।१।४२।

तयोरप्यभावो वर्तमानाभावे तदपेक्षत्वात् ।२।१।४३।

फलति[?] पतितानां गतौ काले भवताभ्युपगतौ तयोरप्यभावः प्रसज्यते । **वर्तमानाभावे** वर्तमानकालानभ्युपगमे सति । **कुतस्तदपेक्षत्वात्** तस्य वर्तमान-कालस्यापेक्षा विद्यते ययोरतीतानागतयोस्तौ तदपेक्षौ तयोर्भावस्तदपेक्षत्वं तस्मात् तदपेक्षत्वात् । तथाहि न तावदध्वलक्षणः कारकव्यङ्ग्यः कालः । तस्य स्वरूपेण भेदाभावात् । किं तर्हि, पतनक्रियाव्यङ्ग्यः । तस्या विनष्टोत्पन्ना-नुत्पन्नत्वलक्षणभेदस्य विद्यमानत्वात् । तत्र विद्यमानपतनक्रियाविशिष्टं फलं यदा पश्यति तदा पतति फलमिति, वर्तमानकालसंबन्धित्वेन व्यपदिशति क्रियाश्रयम् । यदोपरतक्रियाफलं पश्यति तदाऽपतत् क्रियाफलमित्यतीतकाल-विशिष्टम् । यदानुत्पन्नक्रियं क्रियाकारण[क]युक्तं पश्यति तदा पतिष्यति फलमिति अनागतकालविशिष्टतापेता[ष्टो पेता] भवति । ना[तीता] नागत-

कालव्यपदेशौ वर्तमानकालक्रियापेक्षौ। अन्यथा कस्य विनाशानुत्पत्त्यपेक्षातीतानागतव्यपदेशौ भवतः। कस्य वा कारणमफलाश्रयः गुरुत्वगुणः कस्य वा फलभूतिसंयोगः कार्यः। तस्मात् क्रियाद्वारेण वर्तमानकालापेक्षत्वात् अतीतानागतयोर्वर्तमानकालः। स च तदपेक्षस्यापि सिद्धेरस्ति वर्तमानकाल इति। वर्तमानकालाभावेन त्रिकालविषयस्य त्वनुमानस्य न संभव इति यदुक्तं पूर्वसूत्रेण तदयुक्तमिति सूत्रार्थः।२।१।४३।

नातीतानागतयोरितरेतरापेक्षासिद्धेः।२।१।४४।

ननु परत्वापरत्वयोः ह्रस्वदीर्घत्वयोरिवातीतानागतयोरपि परस्परापेक्षासिद्धिर्भविष्यतीति कृतं वर्तमानकालेन तदपेक्षेणेति चेत् तन्न इतरेतरापेक्षासिद्धेरेव हेतोरुभयासिद्धिप्रसङ्गात्। यत्रेतरेतरापेक्षवस्तुद्वयसिद्धिः। तत्रोभयसिद्धिरवश्यं भाविनीति अतीतानागतयोरपि असिद्धिप्रसङ्गात्। न च परत्वापरत्वादीनामपि सिद्धिः, परस्परापेक्षासन्निकृष्टविप्रकृष्टबुद्ध्यादिभिः न कारणजन्यत्वेन परस्परापेक्षत्वात्। तस्मादतीतानागताभ्यां स्वसिद्ध्यर्थमपेक्षितव्योऽस्ति वर्तमानकाल इति सूत्रार्थः।२।१।४४।

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः।२।१।४५।

वर्तमानकालानभ्युपगमे प्रत्यक्षस्य वर्तमानसाधारणस्यानुपपत्त्या तन्मूलानामपि मानान्तराणामनुपपत्तेः। सर्वस्य द्रव्यगुणकर्मादिपदार्थस्याग्रहणादान्ध्यमशेषस्य जगतः प्राप्स्यतीत्यतोऽप्यस्ति वर्तमानः काल इति सूत्रार्थः।२।१।४५।

क्रियमाणे कृतताकर्तव्यतोपपत्तेस्तूभयथा ग्रहणम्।२।१।४६।

उभयप्रकारेण ग्रहणं भवति। कथमतीतानागताभ्यां संपृक्तासंपृक्तश्चेति। तत्र यथा [दा] पचति छिनत्तीत्यादिक्रियासन्तानव्यङ्ग्यः तदा संपृक्तः। किं कारणं क्रियमाणे कृतताकर्तव्यतोपपत्तेस्तु। यच्चेदं पच्यमानं छिद्यमानं वा वस्तु तत्क्रियमाणं तस्मिन् क्रियमाणे कृतताकर्तव्यतोपपत्तेः। पूर्वापरीभावोपपत्तेः। यस्मात् काश्चन क्रिया अतीताः काश्चन वर्तमानाः काश्चनानागता इति। यदा पुनर्विद्यत इति क्रियामात्रव्यङ्ग्यस्तदा असंपृक्तो गृह्यते। तत्र पूर्वापरीभावानुपपत्तेरिति। सूत्रगतस्तु शब्दः क्रियामात्रव्यङ्ग्यात् क्रियासन्तानव्यङ्ग्यस्य व्यवच्छेदमाह। अतीतानागताभ्यामसंपृक्तः शुद्धो वर्तमानः कालः। स तु पुनरशुद्धोऽतीतानागताभ्यां संपृक्त इति। तदिदं संपृक्तासंपृक्तभेदेन वर्तमानकालस्य उभयथाग्रहणकथनं संपृक्तपक्षे कालान्तराभ्युपगमेन कालापह्नव इति प्रतिपादनमशक्यमिति नासंपृक्तपक्ष इति ज्ञानार्थमिति मन्तव्यम्।२।१।४६।

[उपमानपरीक्षाप्रकरणम्]

अथोपमानपरीक्षा—

किं पुनरुपमानं, वाक्यार्थस्मरणसहकारि प्रत्यक्षजनितधर्मज्ञानं संज्ञासंज्ञिसंबन्धप्रतीतिफलकमुपमानमित्युक्तं पुरस्तात्। लक्षणसूत्र[१।१।६।]गतस्य साधर्म्यशब्दस्य धर्मोपलक्षणत्वेन व्याख्यानात्। तत्र दूषणमाह—

अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः ।२।१।४७।

अत्यन्तसाधर्म्यात् सर्वथा साधर्म्यात् **प्रायः साधर्म्यात्** भूयोऽवयवसाधर्म्यात् **एकदेशसाधर्म्यात्** एकदेशमात्रसाधर्म्याद्वो**पमानासिद्धिः** उपमानस्य सिद्धिर्नास्तीति। किं कारणं अत्यन्तादिसाधर्म्येषु उपमानवाक्यप्रयोगस्यादर्शनात्। न खलु यथा गौरयं गौरिति वा। यथानड्वानेवं महिष इति वा। यथा मेरुस्तथा सर्षप इति वा प्रयोगो दृष्टः। न च प्रकारान्तरेणोपमानं वर्तते। तस्मादुपमानासिद्धिरिति सूत्रार्थः।

अत्रापि साधर्म्यशब्दस्योपलक्षणत्वात् अखिलधर्मोपदेशस्याशक्यत्वात् अल्पधर्मोपदेश एकधर्मोपदेशः। एकधर्मोपदेशे चातिप्रसङ्गात्। करभादिसारूप्यव्यतिरेकेण धर्ममात्रेणाप्रवर्तमानमप्युपमानं न सम्भवतीत्यपि द्रष्टव्यम् ।२।१।४७।

परिहरति—

प्रसिद्धसाधर्म्यादुपमानसिद्धेर्यथोक्तदोषानुपपत्तिः ।२।१।४८।

प्रकरणाद्यपेक्षं हि वाक्यमर्थस्य प्रतिपादकं न वाक्यमात्रम्। ततश्च यादृशं साधर्म्यमत्यन्तं प्रायो वाल्पं वा प्रकरणापेक्षेण वाक्येन प्रथमसिद्धिः। पश्चात् प्रत्यक्षेण प्रसिद्ध्यति। तस्मात् प्रसिद्ध एव साधर्म्यात् संज्ञासंज्ञिसंबन्धप्रतिपत्तिसिद्ध्योपमानप्रमाणप्रसिद्धेः **यथोक्तदोषानुपपत्तिः**। यथोक्तस्य दोषस्य साधर्म्यस्य कृत्स्नप्रायाल्पतामाश्रित्य नोपमानं प्रवर्तत इत्युक्तस्य दोषस्यानुपपत्तिः। यथोक्तस्य साधर्म्यस्य कृत्स्नप्रायाल्पतामाश्रित्य नोपमानम्। कुतः येन केनचित् साधर्म्येणापि प्रमाणद्वयसिद्धेन संज्ञासमर्थनद्वारेणोपमानसिद्धेरिति सूत्रार्थः ।२।१।४८।

करभादिषु धर्ममात्रविषयोपमानेऽपि प्रकरणादिपरोपनीतप्रसिद्धधर्मिविषया प्रमाणसिद्धिर्बोद्धव्येति, न तत्रानुपपत्तिरित्यपि द्रष्टव्यम्। तदेवमुपपन्नस्योपमानस्यानुमानेऽन्तर्भावमाह—

उपमानमनुमानं प्रत्यक्षेणाप्रत्यक्षसिद्धेः ।२।१।४९।

यथा प्रत्यक्षेण धूमेनाप्रत्यक्षस्य वह्नेः सिद्धिरनुमानम्। तथा प्रत्यक्षेण गोसादृश्येन गवयस्थेन अप्रत्यक्षस्य संज्ञासंज्ञिसंबन्धस्य सिद्धेरुपमानमनुमानमिति सूत्रार्थः ।२।१।४९।

ननु यथा गौस्तथा गवय इतीदमप्युपमानैकदेशत्वादुपमानम्। तच्च परार्थं तेन श्रोतुरेव प्रतिपत्तिसिद्धेः। अनुमानन्तु तथा न भवति। अनुमानादात्मप्रतिपत्तेरपि सिद्धेरित्यनयोर्भेदं मन्यते सिद्धान्तवादी। तमाशङ्क्य परिहरति—

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्याम इति ।२।१।५०।

परार्थमुपमानमिति चेन्न स्वयमध्यवसायात्। एवमुक्तप्रकारेण परार्थमुपमानमिति चेन्मन्यसे सिद्धान्तवादिंस्तन्न स्वयमध्यवसायात्। तस्माद् यथा गौस्तथा गवय इति वाक्यात् श्रोतुरिवोच्चरितुरपि अध्यवसायो भवति। तस्मादुपमानैकदेशस्य अतिदेशवाक्यस्य परार्थत्वादुपमानस्यानुमानाद्भेदो नास्तीति। किं तर्हि, प्रत्यक्षेणाप्रत्यक्षसिद्धेरिति पूर्वोक्तेन न्यायेन अनुमानादुपमानस्याभेद एवेति सूत्रार्थः ।२।१।५०।

तमिममनुमानान्तर्भावपक्षं तत्सामग्रीत्वेन दूषयति —

तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः ।२।१।५१।

तथेति सादृश्याभिधानमुपसंहारोऽत्र स्थितस्यान्यत्रातिदेशः। तस्मात्तथेत्युपसंहारादेतदुक्तं भवति। यथा गौस्तथा गवय इति वाक्यात् गोसादृश्यविशिष्टं किञ्चिद्वस्तु प्रथममवगम्य पश्चात् तदन्वेषणार्थमटवीमटन् कदाचित्तादृशं पिण्डं प्रत्यक्षेण प्रतिपद्यते स्म इति वातिदेशवाक्यात् अनुभूतार्थम्। अनन्तरं च वाक्यार्थसहकारिणा तेन प्रत्यक्षेण गवयनामाऽयमिति संज्ञासंज्ञिसंबन्धं प्रतिपद्यते। तदीदृशमुपमानं लिङ्गलिङ्गिसंबन्धदर्शनद्वितीयलिङ्गिदर्शनव्याप्तिस्मरणपूर्वकं तृतीयलिङ्गदर्शनरूपादनुमानादत्यन्तं भिन्नमित्यनेन कारणेन तथेत्युपसंहारादुपमानसिद्धेर्नाविशेषः। अनुमानोपमानयोरविशेषो नास्ति किंतु विशेष एवेति। न च वाक्यार्थमात्रात् संज्ञासंज्ञिसंबन्धप्रतिपत्तिसिद्धिः। संज्ञिनो गवयस्याप्रतीतेः।

न च गवयशब्दमात्रात् संज्ञिनो गवयस्य प्रतीतिः। तदानीमगृहीतसंबन्धत्वात्। गवयशब्दस्य वाक्येन च संबन्धग्रहणे त्वितरेतराश्रयत्वप्रसङ्गात्। न च यो हि यत्र प्रयुज्यते सोऽसति बाधके तस्य वाचकः। यथा गोशब्दो गोत्वे प्रयुक्तश्चायं गवय शब्दो गवयत्वेऽतो वाचकत्वमनुमातुं शक्यम्। संबन्धग्रहणात् प्राक् संज्ञिनि गवयत्वे प्रयुक्तोऽयं गवयशब्द इति विनिश्चयाभावेनात्र प्रयुक्तत्वादिति हेतोरसिद्धत्वात्। वाक्येन संज्ञिसमर्पणे चेतरेतराश्रयत्वप्रसङ्गात्। संज्ञिसमर्पणे सति तत्र प्रयुक्तत्वेन तद्वाचकत्वसिद्धिरनुमानात्। तत्सिद्धौ च तत्पदसहिताद् वाक्यात् संज्ञिसमर्पणमिति।

न च गवयपदव्यतिरिक्तात् वाक्यात् प्रतीयमानं सादृश्यमेव संज्ञि गवयशब्दस्यानेकार्थत्वप्रसङ्गात्। अजातिशब्दत्वप्रसङ्गाच्च। तस्मात् नातिदेशवाक्यात् संज्ञासंज्ञिसंबन्धप्रतिपत्तिः। नापि सादृश्यप्रत्यक्षमात्रात् संज्ञासंज्ञि-

संबन्धात् प्रतिपत्तिरिति वाच्यम्। अश्रुतातिदेशवाक्यस्य सादृश्यप्रत्यक्षेऽपि संज्ञासंज्ञिसंबन्धप्रतिपत्तेरभावात्।

तस्मादागमादाहितसंस्कारस्मृत्यपेक्षं प्रत्यक्षजनितधर्मज्ञानं संज्ञासंज्ञिसंबन्धप्रतिपत्तिं कुर्वदितरप्रमाणविलक्षणत्वात् विलक्षणप्रमाणजनकत्वाच्चोपमानं पृथक् प्रमाणमिति सिद्धम् ।२।१।५१।

[शब्दलक्षणपरीक्षाप्रकरणम्]

अथेदानीमवसरप्राप्तं शब्दलक्षणं परीक्षमाणः **सूत्रकारः** प्रमाणभावोऽस्य न परीक्षणीयः। शब्दात्मना वा विवक्षासूचनेन वा वक्त्रभिप्रायज्ञापनेन वा अनुमानात्मना वा परम्परया स्पष्टप्रतिपत्तिसाधनत्वेन वा सर्ववादिसम्मततया प्रसिद्धत्वेन शिष्यैरेव स्वयमवगन्तुं शक्यत्वादिति प्रमाणाभावपरीक्षामुपेक्ष्यानन्तरप्रकरणसङ्गतामनुमानान्तर्गतिमेव परीक्षते—

शब्दोऽनुमानमर्थस्यानुपलब्धेरनुमेयत्वात् ।२।१।५२।

शब्दोऽनुमानमपृथक् प्रमाणम्। कस्मादर्थस्य प्रत्यक्षेणानुपलब्धेर्हेतोरनुमेयत्वात्। यत्र प्रत्यक्षेण अनुपलब्धोऽर्थः पश्चान्मितेन लिङ्गेनानुमीयते। तत्रानुमानत्वं दृष्टम्। यथा धूमादग्निज्ञाने। तथा च शब्दे। तस्मात् प्रत्यक्षेणानुपलभ्यमानार्थविषयत्वादनुमानं शब्द इति सूत्रार्थः ।२।१।५२।

इतश्चानुमानं शब्दः—

उपलब्धेरद्विप्रवृत्तित्वात् ।२।१।५३।

ययोः प्रमाणयोर्भेदः कार्यभूतोपलब्धिर्द्विप्रवृत्तिः प्रकारद्वयवती दृष्टा। यथा प्रत्यक्षानुमानयोः। न तथा शब्दानुमानयोः कार्यभूतोपलब्धिः प्रकारद्वयवती। एकाकारसामग्रीजन्यत्वेनैकप्रकारत्वात्। तस्माच्छब्दानुमानयोरुपलब्धेरद्विप्रवृत्तित्वादनुमानं शब्द इति सूत्रार्थः ।२।१।५३।

संबन्धाच्च ।२।१।५४।

ययोः संबद्धयोरर्थयोः संबन्धप्रसिद्धिस्तयोरेकतरेण ज्ञानेनान्यतरस्य ज्ञानमनुमानं दृष्टम्। यथा धूमाग्न्योस्तथा संबद्धयोः शब्दार्थयोः। संबन्धप्रसिद्धौ शब्दोपलब्धेरर्थज्ञानमनुमानमेव। कस्मात्संबन्धात्। धूमाग्न्योरिव शब्दार्थयोरपि सम्बन्धस्य विद्यमानत्वात्।

नन्वनेन क्रमेण शब्दस्यानुमानत्वे कथमप्रतिपादकवाक्यश्रवणसमनन्तरं प्रतिपाद्यस्य पुरुषस्य वाक्यार्थरूपे संसर्गविशेषे प्रतिपत्तेरुपपत्तिः ?

उच्यते। नद्यास्तीरे फलानि सन्तीत्यादिप्रतिपादकवाक्यावयवभूतैः पदैः स्मारिताः पदार्थाः गुणप्रधानभावेनावस्थिताः परस्परसंसर्गवन्त आकाङ्क्षादिमत्त्वे सति पदैः स्मारितत्वात्। व्युत्पित्सोर्बालस्य प्रमाणान्तरावगतगामभ्याजेत्यादिपदस्मारितपदार्थवत्। तानि धर्माणि स्वस्मारितपदार्थसंसर्गवन्ति आकाङ्क्षादिमत्त्वे सति पदार्थत्वात्। तादृशगामभ्याजेत्यादिपदावलीवत्। तदेवं पदार्थानां पदानां वा लिङ्गतया वाक्यार्थप्रतिपत्तिहेतुत्वान्न ततोऽर्थान्तरं शब्द इति।२।१।५४।

तदेतत्परिहरति—

आप्तोपदेशसामर्थ्यात् शब्दादर्थसंप्रत्ययः।२।१।५५।

शब्दादेवार्थसंप्रत्ययो नार्थात् तत्स्मारितात्। किंभूताच्छब्दात्? आप्तोपदेशसामर्थ्यात्। आप्तः प्राप्तः उपदेशः सामर्थ्यमभिधा व्यापारो येन सोऽयमाप्तोपदेशसामर्थ्यः, तस्मादाप्तोपदेशसामर्थ्यात्। एतदुक्तं भवति, न तावद्वाक्यावयवभूतैः पदैः स्मारिताः पदार्थाः पदव्यतिरेकेण केवलं लिङ्गतया वाक्यार्थरूपसंसर्गावबोधमुत्पादयन्ति। स्वरूपतः सन्निधियोग्यत्वे सत्यपि पदोपस्थापितैकप्रयोजनस्वीकाराभावे सति परस्पराकाङ्क्षाभावेन संसर्गासंभवात्।

न च प्रकारान्तरोपजनिताकाङ्क्षा पदार्थानां वाक्यार्थरूपसंसर्गहेतुर्भवितुमर्हति। तथा सति रक्तः पटो भवतीति वाक्यस्यैकदेशः पटो भवतीत्ययं केवलं पटो भवतीति वाक्यपदं कञ्चिद्गुणमाक्षिप्य निर्वृणुयात् न पट इत्येतदपेक्षेत। तथा भवतीत्येतदपि कारकमात्रापेक्षया निराकाङ्क्षः सन्निर्वृणुयात्। न रक्तं पटं वापेक्षेत। भवतु को दोष इति चेत् सर्वत्र वाक्ये पदार्थानां यथायोग्यक्रियागुणद्रव्यापेक्षया निराकाङ्क्षत्वेन तदभिधायिनां पदानां प्रत्येकमवाक्यत्वेन एकस्मिन्वाक्येऽनेकवाक्यत्वप्रसङ्गात्। पदसमूहो वाक्यमित्येतन्न स्यात्। न चैतद्दृष्टमिष्टं वा। कस्मात्? एकप्रयोजनप्रतिपादनपरैः पदैः स्मारितानां पदार्थानां तत्परत्वमन्तरेण पर्यवसानत्वमेवाकाङ्क्षेति युक्तमुत्पश्यामः। ततश्च पदव्यतिरेकेण पदस्मारितानां पदार्थानां वाक्यार्थावबोधकत्वं लिङ्गतया न संभवतीत्याकाङ्क्षादिमत्त्वे सतीति विशेषणस्यासिद्धत्वादिति सिद्धम्। न पदस्मारितात्पदार्थात् संसर्गसिद्धिरिति।

ननु मा भूत् पदार्थलिङ्गको वाक्यार्थप्रत्ययः। तथापि तत्स्मरणावान्तरव्यापारवदलिङ्गको भविष्यतीत्युक्तमिति चेन्नैवम्। पदानि स्वस्मारितपदार्थसंसर्गवन्ति आकाङ्क्षादिमत्त्वे सति पदत्वादित्यत्र पदविशेषणीभूतपदार्थसंसर्गस्य पदैः सार्धमनुमितेः प्राक्संबन्धाभावेनानुमानप्रवृत्तेरशक्यत्वात्। यत्र धर्मिणः सिसाधयिषितधर्मस्य च तथार्थपदैः सार्धं पदार्थसंसर्गस्य पदानां तज्ज्ञानजनकत्वमन्तरेण अन्यतः प्राक्सिद्धः संबन्धोऽस्ति। येनानुमानं प्रवर्ततेऽनुमानेन च

तत्सिद्धावितरेतराश्रयत्वं पदलिङ्गकानुमानात्पदानां पदार्थज्ञानजनकलक्षण-संबन्धसिद्धिः। संबन्धसिद्धौ च तज्ज्ञानजननाय पश्चात्पदलिङ्गकमनुमानं प्रवर्तत इति। तस्मान्न पदं तदर्थो वा वाक्यार्थबोधे लिङ्गम्। अव्याप्तत्वादनलानुमाने रासभादिवत्। तदेवमनेन सूत्रेणाभिधानव्यापारसहिताच्छब्दादेव व्याप्त्यादि-रहिताद्वाक्यार्थबुद्धिरुपजायत इति प्रतिपादयन् सूत्रकारः—"प्रत्यक्षेणानुपलभ्य-मानार्थविषयत्वा"दुपलब्धिश्च परस्परसंबन्धः पूर्वमेव प्रसिद्धः। तत्र तज्ज्ञान-जननाय अनुमानं प्रवर्तते। यथा पर्वतानलयोः, किं कारणम्? अनलज्ञानजनकत्व-व्यतिरेकेण पर्वतानलसंबन्धस्य संयोगस्य पूर्वमेव सिद्धत्वात्। चकाराद्वैविध्य-रहितत्वादिति दूषणद्वितयं परिहृतवानिति मन्तव्यम्।

शब्दानुमानसामग्र्योः प्रकारभेदकथनेनानयोः पूर्वपक्षहेत्वोर्दूषणत्वेन अनैकान्तिकासिद्धत्वयोः प्रतीयमानत्वादिति। अथवा आप्तोपदेशसामर्थ्यात् शब्दादर्थे संप्रत्यय इत्याप्तस्य यथादृष्टार्थस्य तथैवोपदेष्टुः पुरुषस्यैवोपदेश इति सामर्थ्यमाप्तप्रणीतत्वात्। तस्मादाप्तप्रणीतत्वाच्छब्दार्थे संप्रत्ययः शब्दाद-स्मर्यमाणे सम्यक् प्रत्ययः प्रमाणताज्ञानं सम्भवतीति।

न चैवमनुमाने आप्तप्रामाण्यात् प्रामाण्यज्ञानमतो नानुमानं शब्द इति सूत्रार्थः।२।१।५५।

यत्पुनः सामर्थ्या[सम्बन्धा]च्चेत्यनेन [२।१।५४।] सूत्रेण गमकाङ्गस्य संबन्धस्य विद्यमानत्वादनुमानं शब्द इत्युक्तम्। तत्र दूषणमाह—

नोपलब्धेरतीन्द्रियत्वात्।२।१।५६।

स खलु शब्दार्थसंबन्धः प्राप्तिलक्षणो वा प्रत्याय्यप्रत्यायकरूपो वा? यदि प्राप्ति[लक्षणः] तर्हि तस्य प्रत्यक्षेणोपलब्धिरनुमानेन वा? तत्र तावत् प्रत्यक्षेण नोपलब्धिः। कस्मादतीन्द्रियत्वात्। परमाण्वादिशब्दस्यातीन्द्रियेणा-नुपलभ्यमानत्वेन अप्रत्यक्षत्वात्। यत्र संबन्धस्य प्रत्यक्षेणोपलब्धिस्तत्र संबन्धिनो-र्द्वयोः प्रत्यक्षत्वं दृष्टम्। यथा घटपटयोः। न च तथा सम्बन्धिनोर्द्वयोरपि प्रत्यक्षत्वं सम्भवति। परमाण्वादिशब्दस्य प्रत्यक्षत्वात्। तदर्थस्य परमाण्वादे-रतीन्द्रियत्वादिति। यद्यपि सत्तागुणशब्दानां तदर्थानाञ्च श्रवणेन्द्रियप्रत्यक्षत्वम् तथापि तत्र संबन्धप्रतिपत्तेरभावात् न तत्संबन्धस्य प्रत्यक्षत्वमिति न प्रत्यक्षेणो-पलब्धिः प्राप्तिलक्षणसम्बन्धस्येति सूत्रार्थः।२।१।५६।

अथानुमानेनोपलब्धिरिति द्वितीयस्तत्राह—

पूरणप्रदाहपाटनानुपलब्धेश्च संबन्धाभावः।२।१।५७।

अनुमानेन प्रतिपत्तौ शब्ददेशमर्थः प्राप्त इति वा अनुमेयः। अर्थदेशं शब्दः

प्राप्त इति वा ? न तावत् शब्ददेशमर्थः प्राप्त इति अनुमेयः । कस्मान्मुखे स्थान-करणोच्चारणीयः शब्द इत्यन्नाग्न्यसिशब्दोच्चारणे तदाश्रयस्य मुखस्य तदर्थ-प्राप्तिकार्याणां पूरणप्रदाहपाटनानां संभवेनोपलब्धिप्रसङ्गात् । न चोपलब्धि-रस्तीति । तस्मान्न शब्ददेशमर्थः प्राप्त इति । न द्वितीयः कल्पः । शब्दहेतुभूतयो-रर्थदेशे सम्भवस्य चकारेण सूचितत्वात् । न चोभयमुभयत्र प्राप्तमुभयप्रतिषेधात् एको वितत्यावस्थितः शब्द इति चेत् न । श्रोत्रविषयसंस्कारपक्षे द्वयोरभिव्यञ्जक नियमासंभवेन सर्वशब्दानां सर्वपुरुषाणाञ्च युगपदुपलब्धिप्रसङ्गात् । तस्मान्ना-नुमेयः शब्दार्थयोः प्राप्तिलक्षणः सम्बन्ध इति सूत्रार्थः ।२।१।५७।

शब्दार्थव्यवस्थानादप्रतिषेधः ।२।१।५८।

भवतु नाम प्राप्तिलक्षणस्य शब्दार्थसम्बन्धस्य प्रतिषेधः, प्रमाणाभावात् । तथापि वाच्यवाचकलक्षणस्य स्वाभाविकस्य सम्बन्धस्याप्रतिषेधः । कस्माच्छब्दार्थ-व्यवस्थानात् । गोशब्दात्सास्नादिमानेवार्थः प्रतीयतेऽश्वशब्दात् केसरादिमानेवे-त्यादि । यदिदं प्रत्ययव्यवस्थानं तेनानुमिमीमहे अस्ति शब्दार्थयोः सम्बन्धः व्यवस्थाकारणमिति । तथाहि शब्दस्य वाच्येनार्थेन सम्बन्धस्तत्प्रययनियम-हेतुत्वात् । यो यत्प्रत्ययनियमहेतुः स तत्सम्बद्धः, यथा प्रदीप इति । स च सम्बन्धः स्वाभाविकः । अस्वाभाविकत्वेऽव्यवस्थापातेन सम्बन्ध-ग्रहणानुपपत्तेः । तस्मादस्ति शब्दार्थयोः सम्बन्ध इति सूत्रार्थः ।२।१।५८।

परिहरति—

न सामयिकत्वाच्छब्दार्थसंप्रत्ययस्य ।२।१।५९।

यदुक्तं प्रत्ययव्यवस्थानादस्ति शब्दार्थयोः सम्बन्ध इति । तन्न । सामयिकत्वात् समयकारितत्वात् शब्दार्थसंप्रत्ययस्य प्रत्ययव्यवस्थानकस्य । कः पुनः समयः ? अस्य शब्दस्येदमर्थजातमभिधेयमित्यभिधानाभिधेययोः सर्गादावीश्वरेण कृतः । तस्मिन्नुपयुक्ते ज्ञाते शब्दार्थप्रत्ययस्य व्यवस्था भवति । गोशब्दात्सास्नादिमानेवार्थोऽभिधीयते । अश्वशब्दात् केसरादिमानेवेति । स चायं समयः स्वाभाविकसम्बन्धवादिनाऽप्यवश्याभ्यनुज्ञेयः । अन्यथाऽगृहीतसङ्गतिभि-रपि शब्दैरर्थप्रत्ययप्रसङ्गात् ।

तस्माच्छब्दार्थप्रत्ययव्यवस्थानस्य समयकारितत्वेनान्यथासिद्धत्वात्, न तेन स्वाभाविकसम्बन्धानुमानमिति । प्रत्युतास्ति प्रमाणं, विवादाध्यासितः शब्दार्थसम्बन्धः साङ्केतिकः शब्दार्थसम्बन्धत्वाद् देवदत्तादिशब्दार्थवत् । तस्मान्नास्ति स्वाभाविकः शब्दार्थयोः सम्बन्ध इति सूत्रार्थः ।२।१।५९।

नन्वस्वाभाविकत्वे यैरयं सर्गादौ समयः क्रियते शब्दैस्तेषामप्यतोऽन्यै-स्तेषामप्यतोऽन्यैस्तेषामप्यतोऽन्यैरित्यनवस्थापातेनास्य समयकरणमघटमानमेव

स्यादित्यवश्यं समयकारिभिः कैश्चिच्छब्दैः स्वाभाविकसम्बन्धशालिभिः भवितव्यमित्यत आह—

प्रयुज्यमानग्रहणाच्च समयोपयोगः ।२।१।६०।

अस्य शब्दस्येदमभिधेयमिति नियमः समयस्तस्योपयोगः परिज्ञानम्। तद् द्वेधा परमेश्वरात् ग्रहणं, प्रयुज्यमानानां शब्दानां ग्रहणाच्च। तत्र ये सर्गादिभुवः प्रजापतयो देवाः ज्ञानवैराग्यैश्वर्यशालिनः, तेषामस्य शब्दस्य इदमर्थजातमभिधेयमभिधायकश्चायं शब्द इति, अयं प्रत्ययोऽमीषां भवति। सङ्कल्पमयाच्छब्दरहितात् परमेश्वरानुग्रहात् परिज्ञानम्। ततः पश्चात्तनानामस्मदादीनां तद्व्यवहारपरम्परासु प्रयुज्यमानानां ग्रहणाच्चेति चार्थः। न चास्मदादीनां तत्र सङ्केतस्मृत्यपेक्षा आप्तपरम्पराप्रयोगबलादेव तद्व्यतिरेकेणापि तत्प्रकृतप्रवृत्तिनिवृत्त्या व्यवहारोपपत्तेः। अतएव च व्याकरणस्यापि साफल्यम्। ये शब्दाः यत्रार्थे वाचकत्वेन परमेश्वरेण सङ्केतितास्ते तत्र साधवो नेतरत्रेति तन्नियोगज्ञापनार्थत्वात् ।२।१।६०।

इतश्च सामयिकः शब्दार्थयोः सम्बन्धः—

जातिविशेषे चानियमात् ।२।१।६१।

यस्मादार्यम्लेच्छादिजातिविशेषे नियमेन शब्दप्रयोगो दृष्टः, तस्मान्न स्वाभाविकः शब्दार्थयोः सम्बन्धः। नहि स्वाभाविकसम्बन्धानां प्रदीपादीनां नियमेन जातिविशेषे प्रकाशकत्वं दृष्टम्। क्वचिज्जातिविशेषे प्रदीपः प्रकाशयति रूपं क्वचिदन्यमिति। शब्दे पुनरनियमो दृष्टः। तथाहि यवशब्दाद् दीर्घशूकपदार्थमार्या जानते प्रियङ्गुं म्लेच्छास्तथाऽन्यत्रापि। न च सर्वे शब्दाः सर्वार्थैः स्वभावतः सम्बद्धा दृष्टा व्यञ्जकनियमान्नियम्यन्त इति वाच्यम्। व्यञ्जकेष्वप्यनियमस्य जातिविशेष एव यवशब्दादौ दृष्टत्वात्। नहि सर्वत्र दृष्टानां गोशब्दादीनां जातिविशेषे नियतव्यञ्जकव्यङ्ग्यत्वं दृष्टम्। तस्मान्नास्ति शब्दार्थयोः स्वाभाविकः सम्बन्धः। तदभावात्तत्सम्बन्धबलेन गमकाङ्गत्वादनुमानं शब्द इति यदुक्तं तन्न भवति। तस्मान्नानुमानं शब्द इति सूत्रार्थः ।२।१।६१।

[शब्दविशेषपरीक्षाप्रकरणम्]

ननु भवतु नाम शब्दमात्रस्य प्रामाण्यमनुमानाद्भेदश्च। तथापि प्रथमसूत्रोपात्तनिःश्रेयसपदर्यालोचनया हि सूचितप्रामाण्यस्यानियमेन प्रामाण्यं सिद्ध्यति। तत्प्रामाण्यसिद्धिमूलश्च सकलोऽयं शास्त्रार्थसार व्यवहार इति तदर्थं प्रकरणमिदमारभ्यत इत्यत इदमुच्यते—

तदप्रामाण्यमनृतव्याघातपुनरुक्तिदोषेभ्यः ।२।१।६२।

पुत्रकामेष्टिहवनाभ्यासेषु तस्य वेदस्याप्रामाण्यं तदप्रामाण्यम् । कुतः ? **अनृतव्याघातपुनरुक्तिदोषेभ्यः** । दोषशब्दः प्रत्येकमभिसम्बद्धयते । अनृतदोषात् पुत्रकामेष्टौ, व्याघातदोषाद्धवने, पुनरुक्तिदोषादभ्यास इति । तथाहि "पुत्रकामः पुत्रकामेष्टचा यजेते" ति पुत्रजन्मसाधनत्वेन पुत्रकामेष्टिर्विहिता । न चास्यामिष्टौ संस्थितायामपि पुत्रजन्म दृश्यते । अदर्शनान्नेष्टिः पुत्रजननकारणमिति । तस्यास्तत्कारणप्रतिपादनपरं वाक्यमनृतत्वादप्रमाणमिति निश्चीयते । घटकामः पटैर्घटं कुर्यादित्यसाधनापदेशवाक्यवत् । तथा "अग्निहोत्रं जुहुया" दित्युपपत्तिवाक्यविहितस्याग्निहोत्रस्य "सायं प्रातरग्निहोत्रं जुहुया"दिति कालसम्बन्धं विधाय प्रातःकाले विशेषं विधत्ते "उदिते होतव्यमनुदिते होतव्यं समयाध्युषिते होतव्य" मिति वाक्यत्रयेण । तदेवंविधस्य पुनः स्वयमेव प्रतिषेधमाह—"श्यावो वास्याहुतिमभ्यवहरति य उदिते जुहोति । शवलो वास्याहुतिमभ्यवहरति योऽनुदिते जुहोति । श्यावशबलौ वास्याहुतिमभ्यवहरतः यः समयाध्युषिते जुहोति ।"

एवं च प्रातःकालसम्बन्धं विधाय तस्योदितादिविशेषत्रयसहितस्य वाक्यस्याशेषतः प्रतिषेधात् उदितादिहोमप्रतिषेधवाक्यस्योदयानन्तरकालव्यतिरेकेण मध्याह्नसायाह्नवाचकत्वपक्षे होममात्रप्रतिषेधाच्च परस्परव्याघातेनाप्रमाणत्वमस्ति । नास्ति चेति वाक्यवत् । यथा "त्रिः प्रथमामन्वाह त्रिरुत्तमा" मिति प्रथमोत्तमयोः सामिधेन्योरभ्यासे चोद्यमाने पुनरुक्तिदोषो भवति । पुनरुक्तश्च प्रमत्तवाक्यवदप्रमाणम् । ततश्चैकदेशविभावितन्यायेन वाक्यान्तराणामप्यनृतत्वादिदोषनिश्चयेन सन्देहेन वाऽप्रमाणत्वमिति स्पष्टमिति सूत्रार्थः ।२।१।६२।

तत्रानृतदोषे परिहारः—

न कर्मकर्तृसाधनवैगुण्यात् ।२।१।६३।

न पुत्रकामेष्टिवाक्यानामनृतदोषः । कस्मात् ? **कर्मकर्तृसाधनवैगुण्यात्** । कर्मणः संप्रयोगस्य, कर्तुः मातापित्रोः, साधनस्येष्टेः वैगुण्येन विगुणतया पुत्रजन्माभावस्यान्यथासिद्धत्वात् । तथाहि [न तावदिष्टिः] केवला पुत्रजन्मनः कारणमपि त्विष्टचा कारणभूतया संप्रयुज्यमानौ पितरौ पुत्रं जनयत इति । न संप्रयोगादिकारणान्तररहिता [सा] । तत्र पुरुषायितत्वादिसंप्रयोगदोषात् मातापित्रोर्योनिबीजे [°जयोर्व्यापदोपहतत्व] लक्षणदोषात् ऋत्विक्मन्त्रहविर्होमादिवैगुण्यादपि पुत्रजन्मादिवाक्यस्यापादयतीत्यनृतत्वादिहेतोरसिद्धतेति सूत्रार्थः ।२।१।६३।

ननु पुत्रजन्माभावः कर्मकर्तृसाधनवैगुण्यादाहोस्विदनृतत्वादिति सन्देह इत्यत आह—

गुणयोगे फलनिष्पत्तिदर्शनात् ।२।१।६४।

नानृतत्वात्पुत्रजन्माभावः। किं तर्हि, कर्मकर्तृसाधनवैगुण्यादेव। कुतः ? तेषां कर्मकर्तृसाधनानां **गुणयोगे फलनिष्पत्तिः** पुत्रजन्मसम्भवो दृश्यते यतः। क्वचिद्गुणयोगेऽपि फलनिष्पत्तिर्न दृश्यते। अन्यत्र तु म्लेच्छादौ दृश्यत इति चेन्न कारणत्वे सत्येव प्रवलकर्मप्रतिबन्धेन तदानीमसत्त्वेऽपि कालान्तरे फलोत्पत्तिसम्भवात्। अत एवाकृतेष्टेर्म्लेच्छादेः पुत्रजन्मसम्भवो भवान्तरसंभूतं तदीयं पुत्रकामेष्टिसद्भावं सूचयति। ततश्चानृतत्वदोषात्पुत्रकामेष्टिवाक्यस्यासाधनोद्देशवाक्यवदप्रामाण्यमयुक्तमिति सूत्रार्थः ।२।१।६४।

इदानीं व्याघातदोषपरिहारमाह—

अभ्युपेत्य कालभेदे दोषवचनात् ।२।१।६५।

न तावद्विहितस्य विशेषत्रयसहितस्य प्रातःकालस्याविशेषतः प्रतिषेधात्, कालमात्रप्रतिषेधमुखेन उदितानुदितादिवाक्येन होममात्रप्रतिषेधाद्वा हवने व्याघातदोषः संभवति। कस्मात् ? आधानसमये विहितमध्ये कञ्चन कालं होमाधिकरणत्वेनाभ्युपेत्य तस्य **कालस्य** पश्चाद्**भेदे** भङ्गे सति तस्य **दोषवचनान्**निन्दावचनाद्। यः स्वाभ्युपेतं कालं भिनत्ति तस्याहुतयो देवसारमेयभक्ष्याः भवन्ति। न होमा [अ]पूर्वसाधना इति। न चैवा[वता] हवनमात्रस्य प्रातःकालसम्बन्धमात्रस्य वा प्रतिषेधः सम्भवति। तस्यानीदृशपुरुषविषये सावकाशत्वादिति सूत्रार्थः ।२।१।६५।

यः पुनः सामिधेन्यभ्यासे पुनरुक्तदोषः। स नास्तीत्याह—

अनुवादोपपत्तेश्च ।२।१।६६।

[चः] हेत्वर्थो, यस्मादेकादशसामिधेनीनां मध्ये प्रथमोत्तमयोर्निर [°योस्त्रिर]भ्यासेन पञ्चदशत्वं सामिधेनीनां सिद्धयति। "इदमहं भ्रातृव्यं पञ्चदशारेण [वाग्] वज्रेण" वा[वे]ति मन्त्रवर्णावगतसामिधेनीपञ्चदशत्वसंपत्त्यर्थत्वात्। **अनुवादस्य** तदु**पपत्तेः**, नानर्थकोऽभ्यासः। एवं पुनरुक्तिदोषः [अपि न] संभवतीति प्रामाण्यं सिद्धयति। ततश्चानृतव्याघातपुनरुक्तिदोषयुक्तवाक्यत्रितयदृष्टान्तावष्टम्भेन वाक्यान्तराणामप्यप्रामाण्यमनुमीयत इति यदुक्तं तदसंबद्धम् [इति] सूत्रचतुष्टयतात्पर्यार्थः ।२।१।६६।

न च प्रतिषेधहेतूद्धारमात्रादेव वेदानां प्रामाण्यं सिद्धयतीति तत्प्रामाण्यहेतूनुपपादयन् प्रथमं तावत् सम्भावनाहेतुमाह—

विध्यर्थवादानुवादवचनविनियोगात् ।२।१।६७।

विधिरनुवादोऽर्थवाद इत्यनेनार्थविभागवत्त्वेन वचनस्य वेदस्य विनि-

योगात् तथाभूतार्थविभागवन्मद्वादि [?] वाक्यवद्वेदप्रामाण्यं संभाव्यत इति सूत्रार्थः ।२।१।६७।

तत्र विधेर्लक्षणमाह—

विधिर्विधायकः ।२।१।६८।

यद्वाक्यं विधायकमज्ञातो [कं कर्त्रं] पेक्षितोपायताज्ञापनद्वारेण पुरुषस्य प्रवर्तनं [करोति] स विधिरिति सूत्रार्थः। यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति ।२।१।६८।

अर्थवादलक्षणमाह—

स्तुतिर्निन्दापरकृतिः पुराकल्प इत्यर्थवादः ।२।१।६९।

विधिप्रतिषेधयोः प्रवृत्तिनिवृत्त्यर्थं यत्प्राशस्त्यवचनं सोऽर्थवादः। यथा "सर्वजिता विश्वेदेवास्सर्वमजयन्नि"त्यादि। यथा वा "सोऽरोदीत् यद्रोदी" दित्येवमादि। अत्र स्फुटतरप्राशस्त्याप्राशस्त्यप्रतीत्यभावात्, परकृतिपुराकल्पयोर्भेदेनोपन्यासः। उदाहरणन्तु 'हुत्वा पवा[मेवाग्रेऽभि] धारयन्त्यथ-पृषदाज्य" मिति। "तस्माद्वा एतेन पुरा ब्राह्मणा बहिष्पवमानस्तो[नाः सामस्तोममस्तौ] षन्नि" त्येवमादि च ।२।१।६९।

विधिविहितस्यानुवचनमनुवादः ।२।१।७०।

प्रयोजनान्तरशेषतया विधिविहितस्यार्थस्य विधायकस्य वा शब्दस्य यदनुवचनं पश्चाद्भाषणं सोऽनुवाद इति सूत्रार्थः। उदाहरणं "दर्शपूर्णमासाभ्या-मिष्ट्वा सोमेन यजेते" ति। "योऽश्वमेधेन यजत" इत्यादि ।२।१।७०।

नानुवादपुनरुक्तयोर्विशेषः शब्दाभ्यासोपपत्तेः ।२।१।७१।

प्रतीतार्थशब्दाभ्यासस्य उभयत्रोपपद्यमानत्वादनुवादस्य पुनरुक्ताद्विशेषो नास्तीति व्यर्थोऽनुवादः। पुनरुक्तवदिति सूत्रार्थः ।२।१।७१।

शीघ्रतरगमनोपदेशवदभ्यासान्नाविशेषः ।२।१।७२।

यथा शीघ्रमागम्यतामित्युक्त्वा शीघ्रतरं गम्यतामित्युक्ते तरपा क्रियातिशयस्य शीघ्रशब्दात्प्रतीतस्य प्रतीतेर्न पुनरुक्तदोषः। तथा शीघ्रं शीघ्रं गम्यतामित्यस्य सातत्यावधारणाद्यतिशयस्य प्रतीतेर्न द्वितीयशीघ्रशब्दवैयर्थ्यम्। एवमनुवादेऽपि प्रयोजनान्तरस्य पूर्वमप्रतीतस्य प्रतीतेर्न पुनरुक्तात् प्रयोजनान्तर-रहितादविशेष इति सूत्रार्थः ।२।१।७२।

तदेवं वेदप्रामाण्यसम्भावनाहेतुमभिधायेदानीं साक्षात् प्रामाण्यमाह—

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् ।२।१।७३।

तस्य वेदस्य प्रामाण्यं तत्प्रामाण्यम्, कुतः? **आप्तप्रामाण्यात्** आप्तस्य यथावद्दृष्टार्थस्य तथैवोपदेष्टुः **प्रामाण्यात्** प्रमाणभूतत्वान्**मन्त्रायुर्वेदप्रामाण्यवत्** मन्त्रस्य विषनिर्हरणादिहेतोः, आयुर्वेदस्य वारोग्यकामः पथ्यमश्नीयादित्येवमादेः प्रामाण्यम् । चच्चशब्दः प्रामाण्यसंभावनाहेत्वनुकर्षणार्थः । एतदुक्तं भवति, प्रमाणं वेदाः आप्तप्रणीतत्वात् मन्त्रायुर्वेदवत् । मन्त्रायुर्वेदवाक्येषु तत्प्रतिपादितार्थाविसंवादित्वेन, तत्प्रमाणे तु आप्तत्वनिश्चयात् यथा प्रामाण्यं सिद्धम् । तथा वेदेष्वाप्तप्रणीतत्वनिश्चयात् प्रामाण्यं सिद्धमिति ।

ननु यथावद्दृष्टस्य तथैवोपदेष्टृत्वमाप्तत्वमित्युक्तम् । न चैतन्मन्त्रायुर्वेदवाक्येषु संभवति । तत्प्रतिपादितानामौषधानां तत्संयोगानन्तरं मन्त्राक्षरावापोद्वापभेदानां चानन्तानामनियतदिग्देशकालवर्तित्वेन तदन्वयव्यतिरेकयोरस्मदादिवदशक्यग्रहणत्वात् । ततश्चाप्तप्रणीतत्वं मन्त्रायुर्वेदवाक्यानां वेदवाक्यानामिव सिद्धमिति कथं [तद्] दृष्टान्तेन प्रामाण्यनिश्चयः? मैवं । सर्वेषामपि वेदतदनुयायिनां शब्दानां सर्वज्ञपूर्वकत्वेन आप्तप्रणीतत्वनिश्चयात् । तथा हि विवादाध्यासितानि सर्वज्ञकर्तृकाणि समग्रलोकयात्रानिर्वोढत्वे सति अलौकिकार्थाभिधायकत्वात् । यदसर्वज्ञकर्तृकं तदुक्तसाधनं न भवति । यथा चैत्यवन्दनादिवाक्यम् । न च तथैतानि । तस्मात् सर्वज्ञकर्तृकाणीति । तदेवं सर्वज्ञपूर्वकत्वे सिद्धे तस्याश्रयदोषाद्यसम्भवेनाप्तत्वनिश्चयात् तत्प्रणीतानां प्रामाण्यमुपपन्नम् । आप्तप्रणीतलौकिकवाक्यवत् । न च बुद्धादीनां सर्वज्ञत्वसम्भवः । तत्सद्भावे प्रमाणाभावात् । तदागमाश्रयणेऽन्योन्याश्रयत्वात् । क्षित्यादिकर्तृकत्वानभ्युपगमाच्च । ततश्च तनुभुवनादिकार्यविशेषानुमितसर्वज्ञत्वेन परमाप्तेन भगवता भर्गेण वेदा एव प्रणीता नागमान्तराणि तत्तत्कर्तृविशेषस्मृत्युपगृहीतत्वात्तेषामिति सिद्धमाप्तोक्तत्वेन वेदप्रामाण्यमिति ।२।१।७३।

इति भट्टवागीश्वरविरचितायां न्यायसूत्रतात्पर्यदीपिकायां
द्वितीयाध्यायस्य प्रथमाह्निकं समाप्तम् ।

द्वितीयोऽध्यायः ।

द्वितीयाह्निकम् ।

[प्रमाणचतुष्ट्वपरीक्षाप्रकरणम्]

अथेदानीं चत्वार्येव प्रमाणानीति विभागोद्देशो न युक्त इत्याह—

न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ।२।२।१।

'इति होचु' रित्यनिर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यम् । यथा वटे वटे यक्षः प्रतिवसतीति । अर्थादनुपपद्यमानादर्थान्तरस्यापत्तिकल्पनमर्थापत्तिः । यथाऽसत्सु मेघेषु वृष्टिर्न भवतीत्युक्ते सत्सु भवतीति गम्यते । सम्भवो नामाविनाभाववर्तिनोर्द्वयोरेकतरस्य ग्रहणादितरस्य सत्ताग्रहणम् । यथा द्रोणस्य ग्रहणादाढ़कस्य सत्तेति । अभावोऽपि मानविरोधी । यथा अभूतं वर्षणकर्म भूतस्य वाय्वभ्रसंयोगस्य । तदेवमेतेषामपि प्रामाण्यात्प्रामाण्यस्य सम्भवान्न चतुष्ट्वमेव प्रमाणानामिति संख्याऽनियमः सिद्धयतीति सूत्रार्थः ।२।२।१।

यद्यप्यैतिह्यादीनि प्रमाणानि । तथापि प्रमाणचतुष्टयं नोपपद्यत इति योऽयं प्रतिषेधः, स न प्रतिषेधः । कस्मात् ?—

शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानर्थान्तरभावाच्च [अप्रतिषेधः] ।२।२।२।

तथाहि 'इति होचुर्वृद्धा' इति निर्दिष्टप्रवक्तृकं प्रवादपारम्पर्यमैतिह्यम् । "आप्तोपदेशः शब्द" इति [१।१।७।] शब्दलक्षणं नातिवर्तत इति शब्दप्रमाणे तस्यानर्थान्तरभावः । अथानिर्दिष्टप्रवक्तृकमैतिह्यं तदप्रमाणमेव । अनिश्चितमूलत्वात् । तथाऽसत्सु मेघेषु वृष्टिर्न भवतीत्युक्ते सत्सु भवतीति ज्ञानमर्थापत्तिः । सत्स्वेव मेघेषु वृष्टिर्न भवतीत्यनेनार्थेन विनार्थे [?] सत्सु वृष्टयभावस्यानुपपद्यमानत्वेन तस्य तस्य गमकत्वात्, सा चेयमर्थापत्तिः । अनुमानेन नार्थान्तरभूता । कस्मात् ? असति कारणे कार्याभावस्य सति भावत्वेन व्याप्तत्वात् । एवमविनाभाविनोर्द्वयोरेकस्य ग्रहणादितरस्य ग्रहणसम्भवोऽनुमानमेव धूमादिवत् । अविनाभावबलेनैव गमकत्वात् । तथा वर्षकर्माभावो ज्ञायमानो वाय्वभ्रसंयोगस्य गमकोऽभवन्नाभावतया प्रमाणम् । किं तर्हि ? धूमादिवल्लिङ्गतया । किं कारणं ? विधारकवायुसंयोगादिप्रतिबन्धकाभावविशिष्टस्य वर्षकर्महेतुत्व

निश्चयेन वर्षकर्माभावेन वाय्वभ्रसंयोगादिप्रतिबन्धस्य व्याप्तत्वात्। तस्मादभावोऽप्यनुमानान्नार्थान्तरभूत इति सूत्रार्थः ।२।२।२।

तदेवमैतिह्यादीनां प्रामाण्यमभ्युपेत्य प्रमाणेष्वन्तर्भावः कथितः। तत्रार्थापत्तेः प्रमाणभावमसहमानः पूर्वपक्षयति—

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात् ।२।२।३।

असत्सु मेघेषु वृष्टिर्न भवतीत्युक्ते सत्सु भवतीति ज्ञानमर्थापत्तिः। [सत्स्वपि एकदा न भवतीति अप्रमाणमनैकान्तिकत्वात्] ।२।२।३।

किं तर्हि ? सत्स्वेव भवतीति भवनस्य मेघव्याप्तिः। ततश्च नानैकान्तिकत्वम् अनियतत्त्वमर्थापत्तेः।

अनर्थापत्तावर्थापत्त्यभिमानात् ।२।२।४।

कस्मात् ? अनर्थापत्तौ सत्सु मेघेषु वृष्टिर्न भवत्येवेत्येवंरूपायाम्। अर्थापत्त्यभिमानात् सम्यगर्थापत्तिभ्रमान्नार्थापत्तेरप्रामाण्यमिति सूत्रार्थः ।२।२।४।

अथ सत्स्वेव भवतीत्युक्तविषयव्यतिरेकेणार्थापत्तेः विषयान्तरम्। सत्सु भवत्येवेत्येवंरूपं कल्पयित्वाऽनैकान्तिकत्वमुच्यते। तर्हि तत्प्रतिषेधेऽपि समानमित्याह—

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात् ।२।२।५।

अर्थापत्तिरप्रमाणम्, अनैकान्तिकत्वादिति। योऽयं प्रतिषेधः तस्याप्रामाण्यमभिलषितार्थासाधकत्वम्। कुतः ? अनैकान्तिकत्वादनियतत्वात् अर्थापत्तिसत्त्वस्याप्रतिषेधादिति।

यथाऽर्थापत्तेः स्वविषयव्यतिरेकेण विषयान्तरं कल्पयित्वा त्वया अप्रामाण्यमुच्यते। तथा तत्प्रतिषेधव्यापितत्प्रामाण्यलक्षणस्वविषयव्यतिरेकेण विषयान्तरसत्तां कल्पयित्वा तदप्रतिषेधेनाप्रामाण्यं मयापि वक्तुं शक्यमेवेति सूत्रार्थः ।२।२।५।

अथ स्वविषयव्यतिरेकेण विषयान्तरकल्पनमयुक्तमतिप्रसङ्गादिति। [यदि] प्रतिषेधस्य स्वविषये प्रामाण्यमभ्युपगम्यते तर्हि तदर्थापत्तावपि समानमित्याह—

७

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ।२।२।६।

तस्य प्रतिषेधस्य स्वविषयेऽर्थापत्तिप्रामाण्यप्रतिषेधे प्रामाण्ये नार्थापत्त्यप्रामाण्यमर्थापत्तेरपि स्वविषये सत्स्वेव मेघेषु वृष्टिर्भवतीत्येवं रूपेणाप्रामाण्यम् । सा चेयमप्रमाणमनैकान्तिकत्वादनियतत्वादिति । कथमनियतत्त्वम् । सत्स्वपि मेघेषु कदाचिद्वृष्टिर्न भवतीति । अतश्चाप्रमाणत्वात् अर्थापत्तेः प्रमाणेष्वन्तर्भाविकथनमयुक्तमिति सूत्रार्थः ।२।२।६।

परिहरति—

नानैकान्तिकत्वमर्थापत्तेरनर्थापत्तावर्थापत्त्यभिमानात् ।२।२।७।

असत्सु मेघेषु वृष्टिर्न भवतीत्युक्ते सत्सु भवत्येव [इति] नेयमर्थापत्तिः । किं तर्हि प्रामाण्यमेव । अतश्चार्थापत्तेः प्रमाणत्वादन्तर्भावकथनमेव युक्तमिति । एतेन सतो गृहाभावदर्शनेन बहिर्भावकथनमित्येतदपि परास्तम् । सतो गृहाभावदर्शनेन लिङ्गेन बहिर्भावानुमानात् । तथा हि यत्र खलु सन्नेकत्र नास्ति तदान्यत्रास्तीति स्वशरीर एव व्याप्तिग्रहः सुकरः । न चास्य सद्भावेन गृहाभावः शक्योऽपह्नोतुम् । येनासावसिद्धो हेतुः स्यात् । नापि गृहाभावेन सत्त्वापह्नवः । येनानुपपद्यमानं सत्त्वमात्मानं [न] बहिरवस्थापयेदिति । गृहाभावेन सत्त्वं विरुद्धयत इति चेन्न । विकल्पानुपपत्तेः । सत्त्वमात्रं वा गृहाभावेन विरुद्धयते गृहे सत्त्वं वा ? न तावत्सत्त्वमात्रम् । यत्र क्वचन सत्त्वेन गृहेऽसत्त्वस्यासमानविषयविरोधाभावात् । देशसामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयतया विरोध इति चेन्न । प्रमाणनिश्चितस्य सांशयिकेन प्रतिक्षेपायोगात् । नापि प्रमाणविनिश्चित एव गृहाभावो गृहे सत्त्वं प्रतिक्षिपन् सत्त्वमात्रं प्रतिक्षेप्तुं सांशयिकत्वं वा तस्य नेतुमर्हति । असमानविषयत्वेन सत्त्वमात्रप्रतिक्षेपस्य तत्सांशयिकत्वस्य वापादनत्वायोगात् । नापि सत्त्वासत्त्वग्राहकयोः प्रमाणयोरविरोधापादकत्वेन विषयव्यवस्थापनसम्भवः । अवच्छिन्नानवच्छिन्नविषययोः प्रमाणयोरसमानविषयत्वेन विरोधाभावात् । तस्मात् सतो गृहाभावेन लिङ्गेन बहिर्भावमनुमीयत इति सूत्रतात्पर्यार्थः ।२।२।७।

अभावस्तर्हि प्रमाणमित्याह—

[1]नाभावः प्रमाणं प्रमेयासिद्धेः ।२।२।८।

अत्राभावशब्देन तज्ज्ञानं विवक्षितमभावस्य स्वरूपेण प्रमाणत्वासम्भवात् । ततश्च नाभावज्ञानं प्रमाणम् । विषयस्य प्रमेयस्याभावस्यासिद्धेः ।

१—नाभावप्रामाण्यमिति प्रथितः पाठः ।

नास्तीति व्याहारव्यवहारयोर्वस्तुमात्रविषयत्वेन काल्पनिकत्वेन वोपपद्यमानत्वेनाभावस्याभाव इति सूत्रार्थः ।२।२।८।

परिहरति—

लक्षितेष्व[लक्षण]लक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः ।२।२।९।

अलक्षितानि वासांस्यानयेत्युक्ते केनचिल्लक्षणेन लक्षितेषु केषुचित् वासस्सु अनुपादेयेषु दृष्टलक्षणः पुरुष, उपादेयानामलक्षितानां वाससां तल्लक्षणाभावं पश्यन्, तेन तान्येव वासांसि पृथक्कृत्योपादत्ते न लक्षितानि । अतश्च लक्षणाभावज्ञानं तदभावविषयं तदुपादाने प्रमाणं भवतीति नाभावस्य प्रमेयासिद्धिः । वासोमात्रविषयं लक्षणाभावज्ञानं न तद्व्यतिरिक्ताभावविषयमिति चेत किमिद वासोमात्रं नाम । किं वासांस्याहोस्विदन्यच्च ? न तावत्पूर्वः कल्पः, लक्षितेष्वपि वासस्सु वासोरूपस्य विद्यमानत्वेन लक्षणाभावप्रसङ्गात् । नापि द्वितीयः कल्पः । अन्यदभाव इति संज्ञामात्रभेदात् । न च दृश्ये प्रतियोगिनि वस्तुमात्रोपलम्भो भावव्यवहारहेतुरिति युक्तम् । तदानीं दृश्यमानस्यापि प्रतियोगिनो दृश्यत्वानपायेन तत्रापि तद्व्यवहारप्रसङ्गात् । न च काल्पनिकत्वमभावव्यवहारस्य । कल्पनाया अपि सम्यग्ज्ञानमूलत्वात् । तस्मादस्ति वस्त्वन्तरमभाव इति । तज्ज्ञानस्योपादानादिविषये प्रमाणत्वं सम्भवतीति तस्यान्तर्भावकथनमेव युक्तमिति सूत्रार्थः ।२।२।९।

प्रध्वंसाभाव इति मन्वानश्चोदयति—

असत्यर्थे नाभाव इति चेत् ।२।२।१०।

यत्र यस्याभावस्तत्र तस्याभावेन भवितव्यम् । न चालक्षितेषु वासस्सु लक्षणानि सन्ति । येन तत्र तेषामभाव उपपद्यते । तस्मादलक्षितेषु वासस्सु लक्षणात्मके असति न तदभावः शक्यः प्रतिपादयितुमिति सूत्रार्थः ।२।२।१०।

परिहरति—

[1]नान्यलक्षणोपपत्तेः ।२।२।११।

न प्रध्वंसाभाव एवाभावः, किन्त्वितरेतराभावोऽपि । ततश्चान्यलक्षणोपपत्तेरन्येषु वासस्स्वेवं लक्षणानामुपपत्तेः । अन्यत्रालक्षितेषु वासस्सु तेषां लक्षितानामितरेतराभावस्योपपत्तः विद्यमानत्वेन प्रध्वंसाभावमात्रावलम्बनेन यच्चोदितं तन्नास्तीति सूत्रार्थः ।२।२।११।

१—एकमेव सूत्रं विभज्य पठितमिह ।

दूषयति—

तत्सिद्धेरलक्षितेष्वहेतुः ।२।२।१२।

तेषां लक्षणानां सिद्धेः लक्षितेष्विवालक्षितेष्वपि विद्यमानत्वात् तत्र तेषामभावो नास्ति । भावाभावयोर्विरोधादिति नाभावज्ञानमलक्षितोपादाने हेतुर्न प्रमाणमिति सूत्रार्थः । मानत्वाद्भावाभावयोः भिन्नाधिकरणत्वेन विरोधाभावात् । यदुक्तं भावाभावयोर्विरोधादित्याभिप्रायान्तरकल्पनं तन्नेति सूत्रार्थः ।२।२।१२।

परिहरति—

न लक्षणावस्थितापेक्षसिद्धेः ।२।२।१३।

न मया सर्वत्र लक्षणानामभावः प्रतिपाद्यते । किं तर्हि ? लक्षणेन सह यान्यवस्थितानि वासांसि तान्यपेक्ष्य तत्र तेषामभावः । अतो लक्षणावस्थितापेक्षया तेषां सिद्धेः । विद्य············लक्षितेष्वेव लक्षणानां भावमसिद्धान्तिना कथितमित्यध्यारोप्य ?·········।२।२।१३।

न केवलमितरेतराभाववलेन लक्षणानामलक्षितेष्वभावसम्भवः, किं तर्हि प्रागभाववलेनापीत्याह—

प्रागुत्पत्तेरभावोपपत्तेश्च ।२।२।१४।

यथोत्पत्तेः पश्चात् प्रध्वंसनेनाभावः । यथा चेतरत्र विद्यमानस्येतरत्राभावः । तथोत्पत्तेः प्राक् पूर्वस्मिन् काले अभावोपपत्तेरपि लक्षणानामभावोपपत्तेश्च । अलक्षितेषु वासस्सु लक्षणाभावोऽस्तीति सर्वमवदातमिति सूत्रार्थः ।२।२।१४।

[शब्दानित्यत्वपरीक्षाप्रकरणम्]

तदेवं शब्दपरीक्षां प्रस्तुत्य तत्प्रामाण्यपुरस्सरं विभागोद्देशः परीक्षितः । सम्प्रति शब्दपरीक्षाशेषं वर्तयिष्यन् संशयकारणमाह—

[1][विमर्श हेत्वनुयोगे च] विप्रतिपत्तेः संशयः ।२।२।१५।

व्याहतार्थप्रवादो विप्रतिपत्तिः । तस्मात्संशयो भवति । तथाहि एके तावद् ब्रुवते नित्यः शब्दोऽभिव्यक्तधर्मेति । अपरे ब्रुवते अनित्यः शब्दः

१—सूत्रमिदं काशीमुद्रितपुस्तके दृश्यते, म०म० गङ्गानाथ झा सम्पादिते म०म० फणिभूषणतर्कवागीशसम्पादिते च न्यायभाष्ये नोपलभ्यते ।

उत्पत्तिधर्मेति। तदेवं व्याहृतार्थप्रवादविषयं शब्दमुपलभमानस्य किमत्र तत्त्वमिति संशयो भवतीति सूत्रार्थः ।२।२।१५।

तत्रानित्यः शब्द इत्येतत्तत्त्वम् । कुतः ?

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्च ।२।२।१६।

आदिर्योनिः कारणं तद्यस्यास्ति स आदिमान् । तस्य भावस्तत्त्वं तस्मादादिमत्त्वात् । एतदुक्तं भवति, अनित्यः शब्दः कारणवत्त्वात् । यद्यत् कारणवत् तत्तदनित्यं दृष्टम् । यथा घटः । तथा चायं शब्दः । तस्मादनित्य इति युक्तम् । किं पुनरिदमनित्यत्वं नाम ? प्रध्वंसाभावोपलक्षिता सत्ता । यस्मात् प्रध्वंसाभावोपलक्षितवस्तुसत्तासंबन्धिपदार्थोऽनित्य इति व्यपदिश्यते । तस्मात्सैवानित्यतेति ।

किं पुनः शब्दस्य कारणं ? संयोगो विभागश्च । ननु संयोगविभागौ न शब्दस्योत्पादकौ, अपि त्वभिव्यञ्जकावित्यादिमत्त्वमसिद्धमिति चेदत आह ऐन्द्रियकत्वादिति । इन्द्रियप्रत्यासत्तिग्राह्यं ऐन्द्रियकः । तस्य भाव ऐन्द्रियकत्वम् । अत्र शब्दनित्यत्ववादिनस्त्रयः पक्षाः सम्भवन्ति । सर्वे अनाश्रिताश्रिता व्यापिनो व्योमवन्नित्या इत्येकः । आकाशाश्रिता व्यापिनो नित्या इत्यपरः । गन्धादिसहवृत्तयो भेर्यादिद्रव्येषु संनिविष्टाः स्थायिनः इत्यन्यः । यदि पुनः संयोगविभागौ शब्दस्याभिव्यञ्जकौ स्यातां तदा समानदेशसमानेन्द्रियग्राह्याणां शब्दानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभावेन श्रोत्रसंस्कारपक्षे सर्वेषां शब्दानां ग्रहणम् । विषयसंस्कारपक्षे सर्वैरेकस्य ग्रहणमिति दोषौ स्याताम् । नापि भेरीशङ्खपत्रस्थानेऽभिव्यक्तस्य शब्दस्य निष्क्रियस्य शब्दस्य श्रोत्रदेशप्रत्यासत्तिः सम्भवति । न चाहङ्कारिकतया श्रोत्रेन्द्रियस्य तत्र वृत्तिः सम्भवति । इन्द्रियाणां भौतिकत्वेन आहङ्कारिकत्वप्रतिषेधात् ।

न चाभिघातप्रेरितेन वायुना स्तिमितवाय्वपनयपरम्परायां सत्यां श्रोत्रदेशावस्थितानां शब्दानां तत्प्रत्यासत्तिः सम्भवतीति वाच्यम् । व्यञ्जकनियमाभावेन युगपदुपलब्धिप्रसङ्गात् । न चैतद् दृष्टमिष्टं वा । तस्मादभिव्यक्तिपक्षे शब्दस्येन्द्रियप्रत्यासत्तिग्राह्यत्वमैन्द्रियकत्वं न स्यात् । अस्ति चेदमैन्द्रियकत्वमतोऽवगच्छामः संयोगविभागौ शब्दस्योत्पादकाविति । तदुत्पन्नः शब्दः सर्वदिक्कानि [सार्वदिकानि] शब्दान्तराणि वीचीतरङ्गन्यायेनारभन्ते । तत्र यः श्रोत्रदेशे समुत्पन्नः शब्दः स तेन गृह्यत इत्यैन्द्रियकत्वेनादिमत्वं शब्दस्य सिद्धमिति ।

ननु मा भूदसिद्धत्वमादिमत्त्वस्य हेतोस्तथापि स एवायं गकार इत्यादिप्रत्यभिज्ञाया अबाधितविषयत्वात् कालात्ययापदिष्टत्वमस्त्येवात आह—

कृतकवदुपचाराच्च । अत्र कृतकवदुपचार इत्यनेन शब्दभेदप्रत्ययमुपलक्षयति । यस्मात्तीव्रं तीव्रतरं तीव्रतमं मन्दं मन्दतरं मन्दतममिति कृतक[मुपचर्यते] सुखदुःखवर्ती[वत्] प्रायोऽयं गकारो मन्दमन्दोऽयं गकारः अनुनासिकोऽयं गकार इति नारिशारिकाप्रभेदेषु भेदप्रथा पुंसां सभा.........तस्माद्भिन्ना एव गकाराः तत्तत्कारणैः समुत्पद्यन्ते । तेषु प्रत्यभिज्ञा गत्वादिसामान्यनिबन्धना सादृश्यनिबन्धना वा भवतीति नादिमत्त्वस्य हेतोः कालात्ययापदिष्टत्वमापादयितुं शक्नोतीति । न चायं भेदप्रत्यय औपाधिक इति वक्तुं शक्यम्, विकल्पानुपपत्तेः । तथा हि औपाधिकत्वमानुभाविकत्वं वा स्यादुपपत्तिगोचरो वा ? न तावदानुभाविकं, नराद्युपाधिभेदमविदुषोऽपि काण्डपटाद्यावृते नरादौ जायमानत्वात् । नाप्युपपत्तिगोचरः, प्रमाणाभावात् । नहि शब्दसमवायिनो भेदप्रत्ययस्यौपाधिकत्वे किञ्चन प्रमाणमस्ति । मुखस्येव मणिकृपाणदर्पणोदरेषु भिन्नपरिमाणतया प्रतीयमानस्यैकत्वेन चेयं प्रत्यभिज्ञा प्रमाणमन्यथाप्युपपद्यमानत्वात् । न तावत् ध्वनिधर्मास्ताल्वादिसंयोगविभागधर्म.........तीव्रमन्दत्वादयः शब्दे समारोप्यन्त इति वाच्यम् । तेषामग्रहणेनारोपासम्भवात् । न च ध्वनीनां ताल्वादिसंयोगविभागानां वा धर्माः श्रोत्रेण गृह्यन्ते तदन्यधर्मवत् । न च तदानीं स्मृत्या वा प्रमाणान्तरेण वोपनीयन्ते, अशक्यत्वात् । तस्मान्न समारोप इति मण्डूकवसाक्ताक्षाणामनवगता भूतोरगाणामपि वंशेषूरगसमारोपवत् अत्रापि समारोप इति चेन्न· तत्रारोप्यारोपविषयग्रहणपुरस्सरत्वसम्भवाद्वंशानां तावदस्ति भूयः सारूप्यमुरगेण तेन गृहीताः शक्नुवन्ति स्मारयितुमुरगम् । न च वंशाकारग्रहणं विशेषदर्शनमस्तीति वाच्यम् मण्डूकवसाञ्जनेन विहितत्वात् । न चागृहीतसर्पस्य भवतीति शक्यं वक्तुमस्मिन् जन्मनि जन्मान्तरे सर्पग्रहणसम्भवात् । ध्वनिधर्मास्तु तीव्रमन्दानुनासिकत्वादिरस्मिन्निव जन्मनि जन्मान्तरेऽप्यशक्यग्रहः । तस्माद्वर्णस्तीव्रमन्दमन्दानुनासिकत्वादिः प्रतीयमानो वर्णधर्म इति न भेदप्रत्ययस्यौपाधिकत्वमुपपत्त्या सिद्ध्यति । न प्रत्यभिज्ञया अबाधितविषयत्वात् कालात्ययापदिष्टत्वमनित्यत्वहेतोरिति सूत्रार्थः ।२।२।१६।

शब्दानित्यत्वसाधनाय हेतुत्रितयमुक्तं पूर्वसूत्रेणेति मत्वा व्यभिचारमाह—

न घटाभावसामान्यनित्यत्वान्नित्येष्वप्यनित्यवदुपचाराच्च ।२।२।१७।

कारणवतः खलु घटाभावस्य प्रध्वंसाभावस्यैकस्य च सामान्यस्य घटस्य प्रदेशकंबलस्य प्रदेशा इतिवदात्मनः प्रदेश आकाशस्य प्रदेश इति कृतवत् उपचर्यमाणस्यात्माकाशादेः नित्यत्वदर्शनेन व्यभिचारा[दा]दिमत्त्वादिभ्यो हेतुभ्यः शब्दस्यानित्यत्वं सिद्ध्यतीति सूत्रार्थः ।२।२।१७।

परिहरति—

[1]तत्त्वभाक्तत्वान्न तत्त्वस्य विघातात् ।२।२।१८।

सन्तानानुमानविशेषणात् ।२।२।१९।

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात् ।२।२।२०।

अव्यभिचार इति वाक्यशेषः। नित्यत्वमित्यत्र प्रध्वंसाभावानुपलक्षितवस्तुसत्ता तत्त्वम्। न चासौ प्रध्वंसाभावे सम्भवति। अभावस्य स्वरूपासत्त्वेन सत्तासंबन्धित्वाभावात्। भाक्तं तु नित्यत्वमस्य भवतीति नित्यवन्नित्य इत्युपचारात्।

यत्र यथा जातीयकः शब्दस्तथा जातीयकं किञ्चिन्नित्यं दृष्टमिति, नादिमत्त्वस्य व्यभिचारः। **तत्त्वभाक्तयोः** पारमार्थिकापारमार्थिकयोः, **नानात्वस्य** भेदस्य, **विभागात्** विभक्तत्वादिति। नाप्यैन्द्रियकत्वस्य नित्यसामान्ये समीक्षणाद् व्यभिचारः। किं कारणम्। तेन शब्दानित्यत्वसाधनात्। किं तर्हि तेन क्रियते। सन्तानानुमानविशेषः। यस्मादिदमैन्द्रियकत्वमनित्यत्वस्य सन्तानप्रतीत्या श्रोत्रदेशसमुत्पन्नस्य शब्दस्य सम्भवति। नाभिव्यक्तस्य नित्यस्याभिव्यञ्जकनियमाभावात्। तस्मात् **सन्तानानुमानविशेषणात्** हेतोरैन्द्रियकत्वस्यापृथग्हेतुकत्वादव्यभिचारः। न चापि नित्येष्वात्माकाशादिषु कृतकवत्प्रदेशव्यपदेशदर्शनेन कृतकवदुपचारादित्यस्य व्यभिचारः। कस्मात्? **कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्**। यत्र प्रदेशशब्देन व्यभिचारः कलशशकलकुलिशादिषु तत्र प्रदेशशब्देन तत्कारणमभिधीयते। न चेदृशः प्रदेश आत्माकाशादिषु समस्ति तेषां नित्यत्वेन कारणाभावात्।

यद्यपि प्रदेशवद् द्रव्यसामान्यं स्यात् व्याप्यवृत्तिसंयोगाधारस्य विद्यमानत्वेन भाक्तस्तथाप्यनित्यवन्मुखस्य प्रदेशव्यपदेशाभावान्न कृतकवदुपचारात्। उपचारादित्यस्य व्यभिचार[रोऽर्थं]स्तस्मात्। कारणद्रव्यस्य प्रदेशशब्देनाभिधानेन नित्येषु कृतकवदुपचारस्यापारमार्थिकत्वात्। न च कृतकवदुपचारादिति स्वरूपेणानित्यत्वे हेतुः। किं तर्हि? शब्दभेदप्रत्ययस्य प्रतिज्ञाप्रत्यनीकस्योपलक्षकः। तस्माद् यथोक्तव्याख्याने व्यभिचारस्त्रयाणां हेतूनामिति सूत्रत्रितयार्थः ।२।२।१८-१९-२०।

इतोऽप्यनित्यः शब्द इत्याह—

प्रागुच्चारणाद्यनुपलब्धेरावरणा[द्य]नुपलब्धेश्च ।२।२।२१।

उच्चारणात् प्राक् नास्ति शब्दः। कस्मात्? **अनुपलब्धेः** तदानीमनुपलभ्यमानत्वात्। ननु सतोऽप्यनुपलब्धिरावरणादिना सम्भवतीति चेन्नेत्याह—**आवरणानुपलब्धेश्चेति**। प्रमाणेनानुपलभ्यमानत्वेनासत्त्वादिति।

१—तत्त्वभाक्तत्वयोर्नानात्वविभागादव्यभिचारः इतिप्रथितः पाठः

तदयमर्थः। उच्चारणानन्तरमुपलभ्यमानः शब्दः स्वोपलम्भकालात्प्राक् नास्ति आवरणाद्यनुपलब्धिकारणाभावे सति…………। तदानीं नोपलभ्यते, तत्स्वोपलम्भकालात् प्राङ्नास्ति। यथा सुखं तथा शब्दः। तस्मात् स्वोपलम्भकालात् प्राङ्नास्ति। अनेनैव न्यायेन स्वोपलम्भकालादूर्ध्वमपि नास्ति। शब्दस्यानित्यत्वं सिद्धमिति।२।२।२१।

तदेतज्जात्या दूषयति—

तदनुपलब्धेरनुपलम्भादावरणोपपत्तिः।२।२।२२।

तस्या आवरणानुपलब्धेः उपलब्धिरस्ति न वा ? यद्यस्ति तदानीमुपलब्धित्वहानिरुपलब्ध्यनुपलब्ध्योर्विरोधात्। अथ नास्ति, तर्ह्यनुपलम्भादावरणानुपलब्धेरसत्त्वेनावरणोपलब्धौ सत्यां आवरणोपपत्तिरावरणसद्भाव इति सूत्रार्थः।२।२।२२।

अथैतत्पक्षोक्तदोषापजिहीर्षया अनुपलभ्यमानापि आवरणानुपलब्धिरस्तीत्यभ्युपगम्यते तर्ह्यनुपलभ्यमानमप्यावरणमस्तीति नावरणानुपपत्तिरित्याह—

अनुपलम्भादप्यनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुरित्यनुपलम्भात्।२।२।२३।

अनुपलम्भाद्धेतोः यथावरणानुपलब्धिसद्भावस्तदा तस्मादेवानुपलम्भात् निमित्तादावरणानुपपत्तिरपि नास्तीति सूत्रार्थः।२।२।२३।

तदेतन्निराकरोति

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः।२।२।२४।

आवरणानुपलब्धेः उपलब्धिविरोधित्वेन अनुपलम्भादसत्त्वेनावरणोपलब्धिरिति यो हेतुरावरणसद्भावे यो वा आवरणानुपलब्धेरनुपलम्भेऽपि सम्भवदनुपलम्भाविशेषादावरणोपपत्तिरिति स न हेतुः। तस्मादनुपलम्भात्मकत्वादनुपलब्धेरावरणानुपलब्धेरनुपलम्भात्मकत्वेन निषेधविषयप्रमाणेनोपलब्धौ विरोधाभावेनावरणोपपत्तेः सत्त्वेन विधिविषयप्रमाणेनावरणोपलब्धेरसत्त्वेन आवरणानुपपत्तेः। तस्मादावरणानुपलब्धिवत् तदावरणसिद्धिरित्यज्ञात्वेदमुच्यत इति सूत्रार्थः।२।२।२४।

तदेवं स्वपक्षसाधनमुक्त्वा परपक्षसाधनं दूषयितुमुपन्यस्यति—

अस्पर्शत्वात्।२।२।२५।

नित्यः शब्दः अस्पर्शत्वादाकाशवदितिसूत्रार्थः।२।२।२५।

दूषयति—

न कर्मानित्यत्वात् ।२।२।२६।

नहि यो यः स्पर्शः स सर्वो नित्यो दृष्ट इति, यो वा नित्यो न भवति स स्पर्शोऽपि न भवतीति वा व्याप्तिरस्ति। अनित्येन कर्मणा भवतो व्यभिचारसिद्धेरिति सूत्रार्थः ।२।२।२६।

नापि समव्याप्तिकमनयोरित्याह—

नाणोर्नित्यत्वात् ।२।२।२७।

अर्थस्पर्शवतः परमाणोर्नित्यत्वात् कृतकत्वानित्यत्ववदस्पर्शनित्यत्वयोर्न-समव्याप्तिरस्तीति सूत्रार्थः ।२।२।२७।

संप्रदानं तर्हि शब्दस्थायित्वे हेतुरित्याह—

संप्रदानात् ।२।२।२८।

संप्रदीयमानं घटादि व्यवस्थितं दृष्टम्। तथा शब्द इति स्थायित्व-सिद्धिरिति सूत्रार्थः ।२।२।२८।

दूषयति—

तदन्तरालानुपलब्धेरहेतुः ।२।२।२९।

संप्रदीयमानघटादिवस्तु यतोऽपैति यस्मै च दीयते तयोरन्तराले समुपलभ्यते। न तथा शब्द उपलभ्यते। तस्मात् संप्रदीयमानत्वं स्थायित्वे न हेतुरिति सूत्रार्थः ।२।२।२९।

ननु मा भूत् प्रत्यक्षेणान्तराले शब्दस्योपलब्धिस्तदा ह्यनुमानेनोपलब्धिरस्ति। किमनुमानम्? अध्यापनम्। यदध्याप्यते दात्रा संप्रति प्राप्यते तदन्तरालेऽवस्थितं दृष्टम्। यथा घटादि तथा च शब्द इत्यत आह—

अध्यापनादप्रतिषेधः ।२।२।३०।

नृत्ताध्यापनवदन्तरालेऽनवस्थितस्यापि शब्दस्याध्यापनादन्तराला-वस्थाने शब्दस्यानध्यापनं हेतुरिति सूत्रार्थः ।२।२।३०।

अयं तर्हि हेतुरवस्थान इत्याह—

अभ्यासात् ।२।२।३१।

यदभ्यस्यमानं तदवस्थितं दृष्टम्। यथा पञ्चकृत्वः पश्यति, दशकृत्वः

पश्यतीति । दशत्वेनाभ्यस्यमानरूपम् । तथा दशकृत्वोऽधीयते पञ्चकृत्वोऽधीयत इत्यभ्यस्यते शब्दः । तस्मात्स्थायीति सूत्रार्थः ।२।२।३१।

दूषयति—

नान्यत्वेऽप्यभ्यासस्योपचारात् ।२।२।३२।

[द्विर्नृत्यतु भवान् त्रिर्नृत्यतु भवान् द्विरनृत्यत् त्रिरनृत्यत्] द्विरग्निहोत्रं जुहोति । द्विर्भुङ्क्ते इत्यादिषु नर्तनादिक्रिया[णाम]नवस्थायित्वेऽप्यभ्यासोपचारात् अभ्यासः शब्दस्य स्थायित्वे न हेतुरिति सूत्रार्थः ।२।२।३२।

अत्र सम्यगुत्तरमपश्यंछब्दनित्यत्ववादी छलेन प्रत्यवतिष्ठते—

अन्यदन्यस्मादनन्यत्वादनन्यदित्यन्यताभावः ।२।२।३३।

अन्यन्नाम वस्तुस्वरूपादन्यदनन्यद्वा ? यद्यनन्यत्, तर्हि अनन्यत्वादन्यताभावः । अथान्यत्, तथा अपि अन्यताभावो अन्यस्मादनन्यत्वादव्यतिरिक्तत्वादिति सूत्रार्थः ।२।२।३३।

अन्यपरिहारसूत्रम्—

अतद्भावे नास्त्यनन्यता तयोरितरेतरापेक्षत्वसिद्धेः ।२।२।३४।

तदभावे तस्यान्यस्याभावे **नास्त्यनन्यता**। कस्मात् ? **तयोरितरेतरापेक्षत्वसिद्धेः** तयोरन्यानन्ययोः मध्येऽनन्यत्वस्य त्वयाभ्युपगतस्यान्यापेक्षत्वसिद्धेः । अन्यप्रतिषेधात्मकस्यानन्यस्यानाद्यभ्युपगमे शक्तचभ्युपगमत्वेनानन्यवस्तुसिद्धेः । अन्यभाव इति यदुक्तं पूर्वसूत्रे [तत्] नास्तीति सूत्रार्थः ।२।२।३४।

इदं तर्हि हेतुरित्याह—

विनाशकारणानुपलब्धेः ।२।२।३५।

यद्यनित्यः स्याच्छब्दस्तदानीं घटादिष्विव विनाशका[रणमप्युप]लभ्येत । तस्माद्विनाशकारणानुपलब्धेः नायमनित्यः शब्द इति सूत्रार्थः ।२।२।३५।

तदेतत्साम्यापादनेन दूषयति—

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ।२।२।३६।

यदि नित्यः शब्दस्तदानीं सर्वदा श्रूयेत । तस्मादश्रवणकारणानुपलब्धेरविद्यमानस्य शब्दस्य कदाचिदश्रवणकारणमभिव्यञ्जकाभावादिनोपपद्यते । तस्मिन्नियमनिषेधेन तस्यैवाभिव्यञ्जकस्य प्रतिषिद्धत्वात् । कस्मात् ? अनित्यपक्षे विनाशकारणानुपलब्धेरविनाशवन्नित्यपक्षेऽपि अश्रवणकारणानुपलब्धः सततश्रवणप्रसङ्ग इति सूत्रार्थः ।२।२।३६।

नन्वभिहन्यमानेषु घण्टादिद्रव्येषु तारतर[तार]तमादिश्रुतिभेदभिन्नाः शब्दाः शनैश्शनैः [श्रूयन्ते] श्रुतिविनाशकारणानुपलब्धिश्च नास्तीत्याह—

उपलभ्यमाने चानुपलब्धेरसद्भावादनपदेशः ।२।२।३७।

शब्दसन्तानोपपादनसमये कार्यकारणोभयविरोधित्वकथनानुमानादुपलभ्यमाने शब्दस्य विनाशकारणे तदुपलब्धेरसद्भावाद् विनाशकारणानुपलब्धिरित्ययमनपदेशोऽहेतुरसिद्धत्वादिति सूत्रार्थः ।२।२।३७।

नन्वभिहन्यमानेषु घण्टादिद्रव्येषु तारतरतमादिश्रुतिभेदभिन्नाः शब्दाः शनैः शनैः श्रूयन्ते । न चानित्यत्वपक्षे तादृशश्रुतिभेदघण्टादिद्रव्यसंस्थो·········
································ ···

तस्मादौपाधिकभेदभिन्नाः शब्दाः तदभिघातजनितसंस्कारेण तादृशेन व्यज्यन्त इति चेन् मैवम्, अभिव्यक्तिपक्षे श्रुतिभेदस्यासम्भवात् । तथाहि न तावदवस्थितेन संस्कारेण श्रुतिभेदस्तस्यैकरूपत्वात् । नापि सन्तानवर्तिनैकेनैव संस्कारेण । अभिव्यञ्जकनियतश्रवणकारणानुपलब्धेः । अविद्यमानस्य शब्दस्य कदाचिदश्रवणकारणमभिव्यञ्जकाभावादिनोपपद्यते । तस्मिन्नियमनिषेधेन तस्यैव[ाभि]व्यञ्जकस्य प्रतिषिद्धत्वात्·········सर्वशब्दोपलब्धिप्रसङ्गात् ।

नाप्यौपाधिकत्वं, पूर्वमेव प्रतिषिद्धत्वात् । सन्तानवर्तिना घण्टादिद्रव्यसंस्थितेन संस्कारेण समुत्पद्यन्त इति वक्तुं युक्तम् ।

ननु तादृशस्य श्रुतिभेदहेतोः संस्कारस्यानुपलब्धेरसत्त्वमित्युक्तमिति चेदत्राह—

पाणिनिमित्तप्रश्लेषाच्छब्दाभावे न [ानुपलब्धिः] ।२।२।३८।

पाणेर्हस्तस्य निमित्तकारणभूतस्य घण्टादेः प्रश्लेषात् प्रकृष्टसंबन्धात्···
···········तारतमभेदभिन्नशब्दानुपपत्तौ सत्यां तद्भेदहेतोः···········किन्तर्हि उपलब्धिरेव व्यतिरेकानुविधायित्वेन प्रसिद्धत्वादिति·········।२।२।३८।

सिंहावलोकनन्यायेन पूर्वोक्तहेतुं दूषयति—

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ।२।२।३९।

प्रत्यक्षेण शब्दविनाशकारणस्यानुपलब्धेरवस्थानाभ्युपगमे तन्नित्यत्वप्रसङ्गः । तस्य शब्दश्रवणस्य प्रत्यक्षेणानुपलभ्यमान·········विनाशकारणस्यानित्यत्वेनाभिमतस्यापि नित्यत्वप्रसङ्गः, विशेषाभावादिति सूत्रार्थः ।२।२।३९।

प्रतिघातिद्रव्यसंश्लेषाच्छब्दाभाव इत्युक्तं, तत्संश्लेषसमानाधिकरणस्य सम्भवति न वा ? न, व्यधिकरणस्यातिप्रसङ्गात् । तस्मात् कम्पसमानाश्रयः शब्दो नाकाशाश्रय इत्यत आह—

अस्पर्शत्वादप्रतिषेधः ।२।२।४०।

नाकाशाश्रय इति योऽयं प्रतिषेधः स न प्रतिषेधः । कस्मात् ? अस्पर्शत्वादाश्रयस्य स्पर्शवद्द्रव्याश्रयत्वे श्रोत्रेन्द्रियस्य नाहङ्कारिते·········न्यत्र प्रवृत्त्यभावेनाग्रहणप्रसङ्गात् । एकाश्रयत्वे तत्रत्यस्पर्शद्रव्यस्यापि द्रव्यत्वात् सन्तानवृत्त्या श्रोत्रदेशमाह तस्य ग्रहारंभवतीति [?] सूत्रार्थः ।२।२।४०।

गन्धरसरूपस्पर्शशब्दसमुदाये वीणाद्रव्यं तत्र स्थित एव शब्दोऽभिव्यज्यत इति यैरुच्यते तान् निराचिकीर्षुराह—

विभक्त्यन्तरोत्पत्तेश्च समासे ।२।२।४१।

गान्धारधैवतमध्यमादिभेदेन विभागतारतम्यादिश्रुतिभेदेन वि············ विभक्त्यन्तरं तस्योपपत्तिस्तस्या विभक्त्यन्तरोपपत्तेः । समासे गन्धादिसमुदाये संनिविष्टः शब्दो नाभिव्यज्यते । कस्मात् ? विभक्त्यन्तरोपपत्तेः । नहि गन्धरसरूपस्पर्शशब्दानां समासेऽभिव्यज्यमानानां विभक्त्यन्तरोपपत्तिरस्ति । तेषामैकरूप्येणाभिव्यज्यमानत्वात् । तस्मान्न गन्धादिसहवृत्तिः शब्द इति सूत्रार्थः ।२।२।४१।

[शब्दपरिणामप्रकरणम्]

तदेवं गन्धादिसहवृत्तिः शब्द इति सांख्यपक्षं दूषयित्वा तस्यैवावस्थितो वर्णात्मकः शब्दोऽभिव्यज्यत इत्यभिप्रायान्तरं दूषयिष्यन् संशयमाह—

विकारादेशोपदेशात्संशयः ।२।२।४२।

विकारश्चादेशश्च विकारादेशौ तयोरुपदेशस्तस्मात् विकारादेशोपदेशात् । दध्यत्रेत्यत्र केचित् इकारो यकारमापद्यत इति विकारमुपदिशन्ति । केचित् इकारस्य प्रयोगे संहिताविषये यकारस्य प्रयोगमादेशमुपदिशन्ति । तदेवं व्याख्याति [न] विप्रतिपत्तिः । किमत्र तत्त्वं इति समीपस्थस्य संशयो भवतीति सूत्रार्थः ।२।२।४२।

तत्रादेशपक्ष एव तत्त्वं न विकारपक्ष इत्याह—

प्रकृतिविवृद्धौ विकारविवृद्धेः ।२।२।४३।

प्रकृत्यनुविधानं विकारेषु दृष्टं नारिकेलबीजात् नारिकेलपादपः, न्यग्रोधबीजात् न्यग्रोधपादप इति। न चेह तथा दीर्घादिकारात् दीर्घो यकारः ह्रस्वात् ह्रस्व इति प्रकृत्यनुविधानमस्ति। तस्मात् प्रकृतिवृद्धौ विकारवृद्धेः प्रकृत्यनुविधानाद्विकारपक्षो नोपपद्यत इति सूत्रार्थः ।२।२।४३।

तदेतत्सूत्रं यथाश्रुतार्थभ्रान्त्या दूषयति—

न्यूनसमाधिकोपलब्धेर्विकाराणां हेतुः ।२।२।४४।

न्यूनश्च समश्चाधिकश्च न्यूनसमाधिकाः। न्यूनसमाधिकोपलब्धेर्विकाराणां मध्ये प्रकृतेर्न्यूनस्याधिकस्य समस्य च विकारस्य महत्तूलपिण्डन्यग्रोधबीजपरमाणुद्वयारब्धतन्तुन्यग्रोधपादपद्व्यणुकेषु उपलब्धेर्न प्रकृतिवृद्धौ विकारवृद्धिः विकारसद्भावे हेतुः, व्यभिचारात्। ततश्च विवृद्धेरिकारप्रकृतिकस्य यकारस्य विवृद्धियोग्यस्य तथात्त्वादर्शनेन विकारपक्षो नोपपद्यत इति यदुक्तं पूर्वसूत्रेण तदसंबद्धमिति सूत्रार्थः ।२।२।४४।

तदेतद्दूषयति—

नातुल्यप्रकृतीनां विकारविकल्पात् ।२।२।४५।

अतुल्याश्च ताः प्रकृतयश्च अतुल्यप्रकृतयः तासामतुल्यप्रकृतीनां विकारविकल्पाद्विकारवैषम्यदर्शनात्। एतदुक्तं भवति। न तावत् प्रकृतेर्न्यूनः समो वा विकारः सम्भवति। महत्तूलपिण्डात्तां रण्डाकरतलकर्कशविमर्दनेन विनाशे सत्यणुभिरेवाल्पपरिमाणैरुत्पद्यमानत्वात् तन्तूनाम्। नापि द्व्यणुकस्य परमाणुपरिमाणं तेन प्रकृतिसाम्यं, महत्त्वाभावेऽपि परमाणुपरिमाणातिरिक्तपरिमाणत्वसम्भवात्। तस्मान्न्यग्रोधवत् प्रकृतेरधिक एव सर्वत्र विकार इति नानैकान्तिकत्वं "प्रकृतिविवृद्धौ विकारविवृद्धे[२।२।४३।]रित्यस्य" सम्भवति। नापि तत्र प्रकृतिविवृद्धौ विकारवृद्धिर्विवक्षिता। किं तर्हि, प्रकृत्यनुविधानं विकारस्य। तच्चातुल्यप्रकृतिविकारेष्वपि द्रष्टव्यमिति, नानैकान्तिकत्वम् प्रकृत्यनुविधानस्य संभवतीति। दीर्घेकारविकारस्य प्रकृत्यनुविधाननियमात् दीर्घत्वप्राप्तिर्विकारपक्षे तदवस्थैवेति सूत्रार्थः ।२।२।४५।

तदेतदाक्षिपति—

द्रव्यविकारवैषम्यवद्वर्णविकारविकल्पः ।२।२।४६।

द्रव्यात्मना न्यग्रोधबीजादिप्रकृतीनां तुल्यत्वेऽपि यथा तद्विकाराणां वैषम्यम्। न तथा वर्णश्च विकारश्च वर्णविकारो तयोर्विकल्पो वैचित्र्यम्।

विकारात्मना यकारस्यैकत्वेऽपि प्रकृतेरिवर्णस्य नानात्वं वर्णविकारयोर्विकल्पो वैषम्यं सम्भवतीति सूत्रार्थः ।२।२।४६।

तदेतन्नेत्याह—

न विकारधर्मानुपपत्तेः ।२।२।४७।

विकारधर्मो जातिमद्द्रव्यानुपपत्तिस्तस्यानुपपत्तेः । यत्खलु विक्रियते तस्य पूर्वव्यूहपरित्यागेन व्यूहान्तरप्राप्तौ जातिमद् द्रव्यानुवृत्तिर्दृष्टा । यथा कुण्डलत्वं हित्वा रुचकत्वमापद्यमानस्य सुवर्णस्य सुवर्णत्वजातीयानुवृत्तिः । न चेह तथा, इत्वं हित्वा यत्वमापद्यमानस्य जातिमदवयवानुवृत्तिरस्ति । तस्माद्विकारधर्मानुपपत्तेः, द्रव्यविकारवैषम्यवद्वर्णविकारयोर्वैषम्यं न सम्भवति । द्रव्यात्मना न्यग्रोधबीजानामेकत्वेऽपि तद्विकारवैषम्ये न्यग्रोधत्वाद्यवान्तरप्रकृतिभेदप्रयोजकत्वेन विकारमात्रस्य तत्राप्रयोजकत्वादिति सूत्रार्थः ।२।२।४७।

इतोऽपि न वर्णविकार इत्याह—

विकारप्राप्तानामपुनरापत्तेः ।२।२।४८।

ये क्षीरादयो **विकारप्राप्ताः** दधिभावमापन्नास्तेषा**मपुनरापत्तेः** । पुनः क्षीरत्वप्राप्त्यभावाद्विकारस्य संहितायां यकारत्वं प्राप्य पुनरसंहितायामित्वमापद्यमानस्य न यकारो विकारो भवितुमर्हति । पुनरापत्त्यभावस्य विकारनियतस्यात्राविद्यमानत्वादिति सूत्रार्थः ।२।२।४८।

अपुनरावृत्तिर्विकारे न हेतुर्व्यभिचारादित्याह—

सुवर्णादीनां पुनरापत्तेरहेतुः ।२।२।४९।

सुवर्णादीनां द्रव्याणां रुचकत्वादिरूपं हित्वा कुण्डलादिरूपं प्राप्तानां पुना रुचकत्वप्राप्तिदर्शनात्, अपुनरावृत्तिरित्ययमभिप्रेतार्थसाधने न हेतुरिति सूत्रार्थः ।२।२।४९।

तदेतद् दूषयति—

[न] तद्विकाराणां सुवर्णभावाव्यतिरेकात् ।२।२।५०।

ते च ते विकाराश्च तद्विकाराः । तेषां **तद्विकाराणाम्** । यैः रुचकत्वं हित्वा कुण्डलत्वं प्राप्य पुना रुचकत्वमापद्यन्ते[ते] तेषां विकाराणां सुवर्णभावाव्यतिरेकात् । नापि विकारा रुचकत्वादिरूपेण कुण्डलत्वं भजन्ते । किं तर्हि, रुचकत्वमपहाय सुवर्णत्वं प्राप्य तेनैवाकारेण । ततश्च रुचकस्य सतः कुण्डलत्वं

प्राप्तस्य पुना रुचकत्वप्राप्त्या विकारप्राप्तस्य पुनरावृत्तिः सुवर्णादिषु सम्भवतीति एतन्न वक्तुं शक्यते। तेषां तत्प्रकृतित्वासम्भवादिति सूत्रार्थः।२।२।५०।

यदि सुवर्णत्वाव्यतिरेकात् तद्विकारेष्वपि पुनरापत्त्यभावस्तर्हि वर्णत्वाव्यतिरेकाद्वर्णविकारेष्वपि पुनरापत्त्यभाव इत्याह—

[1]वर्णत्वाव्यतिरेकाद्वर्णविकाराणामप्रतिषेधः।२।२।५१।

वर्णविकारणामपीकारयकारादीनां वर्णत्वाव्यतिरेकेणैव वर्णत्वस्य तत्प्रकृतित्वेन यकारप्राप्तस्येकारस्य पुनरापत्त्यसम्भवात् तत्सम्भवेन वर्णविकारो न सम्भवतीति योऽयं प्रतिषेधः स प्रतिषेध इति सूत्रार्थः।२।२।५१।

अस्योत्तरम्—

सामान्यवतो धर्मयोगो न पुनः सामान्यस्य।२।२।५२।

सामान्यवतः पदार्थस्य मृत्सुवर्णादिषु विकारप्रकृतित्वदर्शनेन अत्रापि वर्णत्वसामान्ययुक्तस्य प्रकृतिभावेन भवितव्यम्। न चेकारयकारव्यतिरेकेण वर्णत्वसामान्ययुक्तं पदार्थान्तरमस्तीति तेषामेव प्रकृतिविकारभावेन पुनरापत्तिसम्भवः। यदवस्थ एवेत्येतत्सूत्रस्थैकदेशस्याप्रतिषेध इत्यस्यावृत्त्या स्वबुद्ध्या वा स्वयमूहनीयम्। यस्तु रुचकत्वादीनां कुण्डलत्वादिप्रकृतित्वासम्भवेन पुनरापत्त्यसम्भवेऽपि सुवर्णत्वसामान्ययुक्तस्यावयवकुण्डलत्वं प्राप्तस्य पुनः स्वरूपप्राप्तिसम्भवेन पुनरापत्तिसम्भवात्तत्पुनरापत्तेर्व्यभिचारं मन्यते। तस्यापि "न विकारधर्मानुपपत्ते"[२।२।४७।]रित्येतत्सूत्रप्रतिपादितान्वयग्रहणमेव परिहारो वेदितव्यः।२।२।५२।

इतोऽपि न वर्णविकार इत्याह—

नित्यत्वेऽविकारादनित्यत्वे चानवस्थानात्।२।२।५३।

वर्णानां नित्यत्वे विकारादिकारयकारयोरनुपजनापायधर्मकत्वेन तथैवावस्थितत्वान्नैकस्यान्यो विकारः सम्भवति। अनित्यत्वे वर्णानामनवस्थानादाशुतरविनाशित्वेनैकस्य विनाशे सति द्वितीयस्योत्पादात् कः कस्य विकारः स्यादित्युभयथाऽपि न विकारपक्षः सम्भवतीति सूत्रार्थः।२।२।५३।

अत्र सम्यगुत्तरमपश्यन् सा·········विकल्पसमासाधर्म्यसमाभ्यां जातिभ्यां नित्यानित्यपक्षयोः यथासंख्यं सूत्रद्वयेन प्रतिषेधमाह—

१—इतः सूत्रद्वयं यद्यपि न्यायसूचीनिबन्धे न दृश्यते तथापि वार्तिकादौ पाठः वर्तते।

नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ।२।२।५४।

अनवस्थायित्वे वर्णोपलब्धिवत् तद्विकारोपपत्तिः ।२।२।५५।

नित्यानामाकाशपरमाण्वादीनामतीन्द्रियत्वात् इन्द्रियप्रत्यासत्तिग्राह्यत्वाभावात् **तद्धर्मविकल्पाच्च** तस्यातीन्द्रियस्य धर्मस्य विकल्पात् केषुचिन्नित्येषु सामान्यादिषु भावाद्वर्णविकाराणामप्रतिषेधः । यथा नित्यत्वे सत्यपि केषाञ्चिदतीन्द्रियत्वं केषाञ्चिदैन्द्रियकत्वम् । तथा नित्यत्वे सत्यपि वर्णानां विकारित्वमाकाशादीनामविकारित्वमिति वर्णविकाराणामप्रतिषेध इति । तथाऽनवस्थायित्वेऽपि च वर्णानां यथोपलब्धिः सम्भवति । तथानवस्थायित्वेऽपि तेषां विकारोपपत्तिरपि सम्भवतीति सूत्रद्वितयार्थः ।२।२।५४-५५।

अनयोरुत्तरम्—

विकारधर्मत्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ।२।२।५६।

ऐन्द्रियकत्वानैन्द्रियकत्वयोः नित्यत्वानित्यत्वाभ्यां सह व्याप्त्यभावात् तत्र धर्मविकल्पः सम्भवति । विकारधर्मस्यानित्यत्वेन सह व्याप्तत्वेन तद्धर्मत्वे नित्यत्वाभावान्नात्र धर्मविकल्पः सम्भवतीति न विकल्पसमाजात्युत्थानम् । नाप्यनवस्थायित्वं वर्णोपलब्धिवत् तद्विकारोपपत्तिः । कस्मात् ? **कालान्तरे विकारोपपत्तेः** द्वित्रिक्षणावस्थानमात्रेणापि वर्णोपलब्धिः सम्भवति । न चिरकालभाविना विकारेण[साधर्म्य]समा भवति संहितासंहितावस्थास्वरूपोपलब्धिलक्षणषट्कव्यतिरेकेण विकारानुपपत्तेः । तस्मान्न साधर्म्यसमायाः जातेरुपपत्तिरित्यादेशपक्षस्याप्रतिषेध इति सूत्रार्थः ।२।२।५६।

हेत्वन्तरमाह—

प्रकृत्यनियमाद्वर्णविकाराणाम् ।२।२।५७।

यत्र प्रकृतिविकारभावस्तत्र प्रकृतिनियमो दृष्टः । यथा क्षीरजातीयाद्दधिजातीयोत्पत्तिः । न पुनर्दधिजातीयात् क्षीरजातीयोत्पत्तिरिति नियमोऽप्यस्ति । विध्यतीत्यादिषु यकारादिकारोत्पत्तेः । तस्मात्प्रकृत्यनियमाद्वर्णविकाराणां प्रकृतिविकारभावो वर्णानां न सम्भवतीति सूत्रार्थः ।२।२।५७।

अत्र पूर्वपक्षवादी वाक्छलेन प्रत्यवतिष्ठते—

अनियमे नियमान्नानियमः ।२।२।५८।

अयं प्रकृत्यनियमः स्वात्मनि नियतो न वा? यदि नियतस्तर्ह्यनियमे नियतत्वात् नियतत्वहानिः। तयोः परस्परविरोधात्। न चेन्नियतः, अनियतत्वस्वरूपहानिः नियतात्मन्यवस्थितः स्यादिति सूत्रार्थः ।२।२।५८।

अथोत्तरम्—

नियमानियमविरोधादनियमे नियमाच्चाप्रतिषेधः ।२।२।५९।

नियमानियमयोः स्वविषये विरोधो न स्वात्मनि। तस्मिन् स्वेनैवाकारेण नियतत्वात्। तस्मान्नियमानियमयोः स्वविषये विरोधादनियमे स्वात्मनि नियमाच्चाप्रतिषेधः नानियतत्वहानिरनियमस्य स्वात्मनि नियतत्वेन नियमशब्दाभिधेयत्वेऽप्यर्थस्य तथैवावस्थानादिति सूत्रार्थः ।२।२।५९।

ननु यद्यादेशपक्ष एव श्रेयान् न विकारपक्षस्तर्हि कथं शाब्दिकानां विकारव्यपदेशः सम्भवतीत्यत आह—

गुणान्तरापत्त्युपमर्दह्रासवृद्धिलेशश्लेषेभ्यस्तद्विकारोपपत्तेर्वर्णविकाराः ।२।२।६०।

गुणान्तरापत्तिरुदात्तस्यानुदात्त इत्येवमादिः। उपमर्दो नाम रूपनिवृत्तौ रूपान्तरस्योत्पत्तिः। यथा "ब्रुवो वचिरि' ति[२।४।५३। पा०सू०]। ह्रासो दीर्घस्य ह्रस्वः। वृद्धिः ह्रस्वस्य दीर्घः। लेश इत्यस्तेरकारलोपे सकारमात्रस्यावस्थानम्। श्लेष आगमः, प्रकृतेः प्रत्ययस्य वा। एतेभ्यस्तद्विकारोपपत्तेः वर्णविकारास्तैर्व्यपदिश्यन्त इति। तदुक्तं भवति, एकस्याप्रयोगेऽन्यस्य प्रयोगो विकारः। यदि वर्णेष्वपि प्रकृतिविकारभावः स्यात्। तदानीं प्रकृतिनियमेन भवितव्यम्। न चात्र प्रकृतिरस्ति, गुणान्तरोपमर्दादिभेदेन तत्र तत्र व्याख्यायन्त इति ।२।२।६०।

[पदार्थनिरूपणप्रकरणम्]

तदेवं वर्णानामनियतत्वमगन्धादिसहवृत्तित्वमविकारित्वं च प्रतिपाद्यावर्णात्मकस्य स्फोटस्य वर्णैरभिव्यज्यमानस्य नित्यत्वेन पदनित्यत्वं संपद्यत इति यो मन्यते तन्मतनिराकरणार्थं न वर्णव्यतिरिक्तः स्फोटो नाम कश्चित् पदार्थो विद्यत इत्याह—

ते विभक्त्यन्ताः पदम् ।२।२।६१।

विभक्तिर्व्याकरणप्रसिद्धा सुप्तिङ्लक्षणा। अतएव वर्णा विभक्त्यन्ताः पदम्। न तद्व्यतिरिक्तः स्फोटात्मा कश्चिदस्ति। तत्सद्भावे प्रमाणाभावात्।

न तावदिदमेकं पदमिति पदैकत्वावभासः प्रमाणम्। तेष्वेव बहुषु वर्णेष्वेकस्मृतिसमारूढतया वैकार्थसिद्धिहेतुतया वोपपद्यमानत्वेनान्यथासिद्धत्वात्। न चैवमन्योन्याश्रयत्वमनर्त [र्थे] पदावधारणात् संबन्धाग्रहणेनार्थाविगमः। न चार्थावगममन्तरेण पदावधारणम्। पदावधारणमन्तरेण न संबन्धग्रहणमित्येकस्मृतिसमारब्धतयैकीकृतानामर्थप्रत्ययमन्तरेणापि स्वार्थसंकेतग्रहणस्य सुकरत्वात्। नाप्यर्थप्रत्ययाऽन्यथानुपपत्त्या स्फोटकल्पना, वर्णानां प्रत्येकमर्थप्रत्ययानुद्भावात्। न तु निर्भागस्यैकस्य पदस्फोटस्य क्रमभाविभिर्वर्णैः स्फुटास्फुटप्रतिभासो जन्यत इति वक्तुं शक्यम्। प्रथमवर्णविभासेनागृहीतांशस्यैवाविद्यमानत्वेन स्फुटास्फुटत्वसम्भवात्। न च तदेवागृहीतं गृहीतञ्चेति सम्भवति। किञ्चार्थप्रत्ययाऽन्यथानुपपत्त्या स्फोटकल्पनायाः स्फुटमितरेतराश्रयत्वमर्थप्रत्ययात् स्फोटावगमः स्फोटावगमादर्थप्रत्यय इति। तस्माद् दृष्टेभ्य एव वर्णेभ्यो दृष्टप्रकारानुपातिभ्योऽर्थप्रत्ययः प्रतिपद्यमानो दृष्टचरं स्फोटात्मानं कल्पयित्वा तन्नित्यत्वेन शब्दनित्यत्वं सम्भावयतीति सूत्रार्थः।२।२।६१।

तदेवं पदस्वरूपं निरूपयित्वा तस्यायमर्थ इति निश्चेतुं संशयमाह—

व्यक्त्याकृतिजातिसन्निधावुपचारात्संशयः।२।२।६२।

सन्निधिरविनाभाव उपचारः प्रयोगस्तस्मादविनाभावेन वर्तमानासु [1]व्यक्त्याकृतिविषयं योगशब्दः प्रयुज्यते। तस्मात् किं जातिः पदार्थ उत व्यक्तिरथाकृतिराहोस्वित्सर्वं इति संशयो भवति। प्रयोगस्य समानत्वादिति सूत्रार्थः।२।२।६२।

तत्र पदार्थवाद्याह—

या शब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः।२।२।६३।

या शब्दच्छलेन संभिन्नस्य प्रयोगः या गौस्तिष्ठतीति। समूहः संभूयावस्थानं गवामिति। त्यागः परस्मै प्रदानम्। वैद्याय गां ददातीति। परिग्रहः स्वेनाभिसंबन्धः, कौण्डिन्यस्य गौरिति। संख्या परिगणनम्। दश गावो विंशतिर्गावो इति। वृद्धिरवयवोपचयः। अवर्धत गौरिति। अपचयः कार्श्यं, क्षीणा गौरिति। वर्णः श्वेत्यादिः शुक्ला गौः कृष्णा गौरिति। समासः सुखादिसंबन्धः। गोसुखं गोहितमिति। अनुबन्धः [सरूपप्रजनन] सन्तानः गौर्गां जनयतीति।

एवमेतेषां शब्दानां व्यक्तावुपचारात् व्यक्तावेव प्रयोगदर्शनात् व्यक्तिरेव पदार्थो न जात्याकृती या गौस्तिष्ठतीत्यादिस्थानादिविशेषणासम्भवादिति सूत्रार्थः।२।२।६३।

१—"व्यक्त्याकृतिजातिषु यो गौरिति शब्दः" इति समुचित पाठः।

तदेवं व्यक्त्यभिधाननियमवादिनं दूषयति—

न तदनवस्थानात् ।२।२।६४।

न व्यक्तिः पदार्थः । कस्मात् ? तस्या व्यक्तेरनवस्थानादित्यनित्यत्वानेकत्वैरनवधारणीयत्वेन व्यक्तिपदार्थपक्षे संबन्धग्रहणस्याशक्यकरणत्वात् । न च जातेरशब्दार्थत्वेऽप्युपाधित्वेन संबन्धस्य शक्यकरणतेति वाच्यम् । अप्रतीयमानायास्तस्या उपाधित्वायोगात् । न च मानान्तरेणास्याः प्रतिपत्तिः सम्भवतीति तच्छब्दात्प्रतीतौ न व्यक्तिमात्रं पदार्थः । किं तर्हि जातिव्यक्तीति नियमो न स्यादिति सूत्रार्थः ।२।२।६४।

यदि न व्यक्तिः पदार्थः कथन्तर्हि या गौस्तिष्ठतीत्यादिप्रयोगो व्यक्तावित्यत आह—

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः ।२।२।६५।

सहचरणं साहचर्यं स्थानमवस्थितिस्तादर्थ्यं तदर्थत्वं वृत्तं तद्वदाचरणं मानं परिमाणं धारणं स्मृतिः सामीप्यमभ्यर्णता योगः सम्बन्धः साधनत्वं करणत्वमाधिपत्यं प्राधान्यं तदेतेभ्यो निमित्तेभ्यो ब्राह्मणादिषु पर्यन्तेष्वतद्भावेऽपि तद्वदुपचारः । अतच्छब्दस्य तच्छब्देन प्रयोगो दृष्टो । यथा यष्टिकां प्रवेशय, मञ्चाः क्रोशन्ति, कटं करोति । यमो राजा आढकं सक्तुः, तुला चन्दनं, गंगायां घोषः, कृष्णः शाटकः, अन्नं प्राणाः, नृपोऽयं पुरुष इति । तथात्रापि जातिसाहचर्यात् व्यक्तेर्जातिशब्दस्य व्यक्तावुपचारेणापि प्रयोगः सम्भवति । तथा शब्दादिप्रयोगसामर्थ्याद्व्यक्तेरेव पदार्थत्वं सम्भवतीति सूत्रार्थः ।२।२।६५।

यदि जात्या विना व्यक्तेरनियतत्वेनाशक्यसंकेतत्वान्न व्यक्तिमात्रं पदार्थ इति जातिरप्यभिधेया तर्हि सापि जातिराकृत्या विना न नियम्यत इत्याकृतिरेव पदार्थ इत्याह—

आकृतिस्तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः ।२।२।६६।

आकृतिः पदार्थः । कस्मात् ? तदपेक्षत्वात् । सत्त्वव्यवस्थानसिद्धेः व्यवतिष्ठतेऽनेनेति व्यवस्थानं, सत्त्वस्य व्यवस्थानं सत्त्वव्यवस्थानं तस्य सिद्धिः सत्त्वव्यवस्थानसिद्धिः । तस्याः सत्त्वव्यवस्थानसिद्धेः । गौरश्वः पुरुषो हस्तीति सत्त्वव्यवस्थानम् । येन सामान्येन सिद्ध्यतीति तस्याः सिद्धिः । तदपेक्षा आकृत्यपेक्षा

यस्मात् सामान्यस्यापि सिद्धिरभिव्यक्तिराकृत्यपेक्षा तस्मात्सैवाकृतिः पदार्थः। सामान्यस्य व्यक्तिर्व्यवस्थापनस्य तदपेक्षत्वादिति सूत्रार्थः ।२।२।६६।

अत्राकृतेरपि केवलाया व्यक्तिवदानन्त्यव्यभिचाराभ्यामशक्यसंकेतत्वेन पदार्थत्वावधारणं न जात्या विना सिद्धयतीति परिहारो न "तदनवस्थानादि"-त्यनेन [२।२।६४।] सूत्रेण स्पष्ट इति मन्वानः सूत्रकारः तदर्थं सूत्रान्तरमकृत्वैव यया पदपदार्थयोः शक्यसंकेतत्वं सिद्धयतीति सैव जातिः पदार्थ इत्याह—

व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ।२।२।६७।

व्यक्त्याकृतिराकृतिर्वा पदार्थः स्यात्तदा तयोरुभयोरपि मृद्गवके विद्यमानत्वेन प्रोक्षणादिक्रियासंस्काराः प्रसज्येरन्। तन्न प्रसज्यते। तत्र जातेरभावात्। प्रसज्यते तु परमार्थे गवि। तस्मात् प्रोक्षणादिक्रियासंस्कारान्वयव्यतिरेकानुविधायित्वाच्छक्यसंकेतत्वाच्च सैव जातिः पदार्थ इति सूत्रार्थः ।२।२।६७।

तदेतद् दूषयति—

नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः ।२।२।६८।

न जातिमात्रं पदार्थः। कस्मात्? जात्यभिव्यक्तेराकृतिव्यक्त्यपेक्षत्वात्। यद्यपि प्रोक्षणबन्धनादिक्रियासंस्कारानर्हत्वेन गाः प्रोक्षय गाः बधानेत्यादिप्रयोगेषु गोशब्दान्न गोत्वमात्रं शुद्धं प्रतीयते व्यक्त्याकृत्यनपेक्षमेव। ततश्च जात्यभिधानपक्षे शक्यसंकेतत्वेऽपि न तावन्मात्रं पदार्थ इति विवेक्तुं शक्यम्। आकृतिव्यक्त्योरपि तस्मादेव शब्दाद् प्रतीतेरिति सूत्रार्थः ।२।२।६८।

तदेवमन्यतमाभिधानं निराकृत्य नियमाभिधानं सिद्धान्तमाह—

व्यक्त्याकृतिजातयस्तु पदार्थः ।२।२।६९।

अर्थ्यन्त इत्यर्थाः पदार्थास्तिस्रोऽपि व्यक्त्याकृतिजातयः। पदेन स्मर्यमाणत्वात् पदार्थाः। न पुनरासामन्यतमा। सर्वासामेव पदेन स्मर्यमाणत्वस्य समानत्वात्।

तथा हि गोशब्दोच्चारणसमनन्तरं विदितसङ्केतैरेकदैव व्यक्त्याकृतिजातिनिर्भासः प्रत्यय उदयमासादयति। न च गङ्गायां घोष इतिवद् गौर्वाहीक इतिवद्वा गङ्गात्वगोत्वावगमोत्तरकालं वाक्यार्थान्वयानुपपत्त्या तदविनाभावेन लक्ष्यमाणं तीरं गुणयोगेनावगम्यमानो वाहीक इव जात्यवगमोत्तरकालं तदन्वयानुपपत्त्या व्यक्त्याकृत्योरवगम इति वक्तुं शक्यम्। एकप्रकृतिभासगोचरत्वेन

तथाभावासम्भवात्। न च पद्मपत्रशतव्यतिभेद इव शीघ्रतया सन्नप्रकृष्टप्रतिभासभेदो न लक्ष्यत इति वाच्यम्। असति बाधके बलीयसि प्रतिभासभेदा······वन्यथाकरणयोगात्। किञ्च रूपिशून्यावगतिः। रूपं द्रव्यस्य जातिः। तेन रूप्यमाणत्वात्। न च रूप्यते तदनवगमे रूप्यस्यावगम इति जात्युपलम्भो द्रव्योपलम्भैकदेशो द्रव्योपलम्भनमन्तरेण केवलः सम्भवति। तस्मादेकोपलम्भगोचरत्वं न जातिमतो लक्ष्यलक्षणभावः।

न च वाच्यमेकोपलम्भगोचरत्वेऽपि जातिव्यक्त्योर्जातिरेव वाच्या न व्यक्तिः। एकवाच्यत्वेऽप्युभयोपपत्तौ उभयविषयत्वकल्पनानुपपत्तिरिति। कार्यव्यङ्ग्यं हि सामर्थ्यं कारकाणां कार्यश्चानुभवः। स चैक एवेति न शक्तिभेदकल्पना। नापि पुरुषसंकेताधीनप्रवृत्तीनां पदानां तद्व्यतिरेकेण सामर्थ्यं नाम किञ्चिदस्ति प्रमाणगोचरं यदेकमनेकं वा स्यात्। तस्मादेकप्रतिपत्तिगोचरत्वाद्व्यक्त्याकृतिजातयस्तिस्रोऽपि पदार्थाः। सूत्रगतात् तु शब्दात्तिसृणामेकप्रतिपत्तिगोचरत्वे प्रधानभावं क्वचित् कस्याश्चिदेव बोद्धव्यमिति सूत्रतात्पर्यार्थः ।२।२।६९।

तत्र व्यक्तिलक्षणमाह—

व्यक्तिगुणविशेषाश्रयो मूर्तिः ।२।२।७०।

मूर्छितः परस्परावयवसंयुक्तश्च यः सा व्यक्तिरथवा गुणाश्च ते विशेषाश्चेति गुणविशेषाः, आकृतिव्यतिरिक्ता रूपादयः, गुणेभ्यो वा विशेषाः गुणविशेषा उत्क्षेपणादयः। तेषामाश्रयो द्रव्यं मूर्त्यन्ते केनचित् प्रकारेण संबध्यन्त इति मूर्तिशब्देन विशेषसमवायाभावाः। एवञ्च जात्याकृतिव्यतिरिक्तस्य सर्वस्यापि पदार्थसामर्थ्यस्य व्यक्तिरनेन सूत्रेण प्रतिपादिता भवति। व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति सूत्रतात्पर्यार्थः ।२।२।७०।

आकृतेर्लक्षणमाह—

आकृतिर्जातिलिङ्गाख्या ।२।२।७१।

जातिलिङ्गानि च जातिलिङ्गे ते आख्यायेते यया सा जातिलिङ्गाख्या आकृतिरिति सूत्रार्थः ।२।२।७१।

जातेर्लक्षणमाह—

समानप्रसवात्मिका जातिः ।२।२।७२।

परस्परव्यावृत्तेषु गवादिषु अनौपाधिकानुवृत्तबुद्धेः प्रसूतिका सा जाति-

रिति। एवञ्च पाचकादिष्वनुवृत्तबुद्धिजनकत्वान्न जातेरसद्भावः। अबाधितस्यानुवृत्तप्रत्ययस्यानन्यनिमित्तत्वात्। न च वृत्तविकल्पादिबाधकं प्रमाणं तस्यावयविसमर्थनसमये निराकृतत्वात्। न चान्यव्यावृत्तिरूपसामान्यं तस्य स्वलक्षणाद्भेदाभेद नानात्वैकत्वतुच्छादिविकल्पानुपपत्तेः। तस्मादस्ति वस्तुसती जातिः समानप्रसवात्मिकेति सूत्रार्थः।२।२।७२।

सङ्ग्रहश्लोकः—

इतीह सन्देहविचारपूर्वकं
प्रमाणसामान्यविशेषलक्षणम्।
संख्यानमेषां क्षणिकत्वमक्षरे
पदं पदार्थेन समं समीक्षितम्॥

इति न्यायसूत्रार्थतात्पर्यदीपिकायां द्वितीयाध्यायस्य द्वितीयमाह्निकम्।

तृतीयोऽध्यायः ।

प्रथमाह्निकम् ।

[इन्द्रियव्यतिरिक्तात्मप्रकरणम्]

अथेदानीमवसरप्राप्तं प्रमेयं परीक्षमाणः तदात्मादीति प्रथममात्मानं परीक्षितुं संशयमाह—

व्यपदेशस्योभयथासिद्धेः संशयः ।३।१।१।[1]

क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं व्यपदेशः । स चोभयथा दृष्टः । एकदेशेन समुदायस्य । स्तम्भैः प्रासादो ध्रियते, मूलैर्वृक्षस्तिष्ठतीति । अन्येन चान्यस्य । यथा परशुना वृश्चति, प्रदीपेन पश्यतीति । तथात्रापि व्यपदेशो दृष्टः । चक्षुषा पश्यति, मनसा विजानातीति । स चायं व्यपदेशः, किमेकदेशेन चक्षुषा शरीरेन्द्रियबुद्धिसंघातस्य मूलैर्वृक्षस्तिष्ठतीतिवत् ? आहोस्विदन्येन चक्षुषान्यस्यात्मनो व्यपदेशः, परशुना वृश्चतीति [वत्] संशयो भवतीति सूत्रार्थः ।३।१।१।

अत्रान्येनान्यस्य व्यपदेश इत्येतत्तत्त्वमित्याह—

दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ।३।१।२।

दृश्यतेऽनेनेति दर्शनं चक्षुः । स्पृश्यतेऽनेनेति स्पर्शनं त्वगिन्द्रियम् । आभ्यां दर्शनस्पर्शनाभ्यामर्थस्य ग्रहणमर्थग्रहणम् । तस्मादेकार्थग्रहणाद् दर्शनस्पर्शनाभ्यामेकस्य पुरुषस्यैकार्थविषयौ प्रत्ययौ भवत इति । प्रतिसन्धानेन दृष्टो यमहमद्राक्षं चक्षुषा तमहं स्पृशामि, यं चास्पाक्षं स्पर्शनेन तं पश्यामीति । न चैतत्प्रतिसन्धानमिन्द्रियाणां कर्तृत्वे सम्भवति । इन्द्रियान्तरेण दृष्टस्येन्द्रियान्तरेण प्रतिसन्धानाभावात् । नापि संघातेन । तस्यापि नानात्वेनान्यत्वाद्व्यावृत्तेः । न च मनसा तस्यापि का[क]रणत्वेन कर्त्रन्तरसापेक्षत्वात् । दर्शनस्पर्शनप्रत्यययोः य एकः प्रतिसन्धाता शरीरेन्द्रियबुद्धिवेदनाव्यतिरिक्तः स आत्मास्तीति सूत्रार्थः ।३।१।२।

तदेतन्नेत्याह—

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता ।

न विषयव्यवस्थानात् ।३।१।३।

न देहादिसंघातादन्यश्चेतनः । कस्माद् ? विषयव्यवस्थानात् । विषयव्यवस्थानेनेन्द्रियाणामचेतनत्वात् । सति चक्षुषि रूपग्रहणं भवति नासति । तथैवघ्राणादिष्वपि । ततश्चेन्द्रियभावाभावयोः विषयग्रहणस्य तथाभावात् । इन्द्रियाणामेव रूपादिविषयग्रहणानि, न तद्व्यतिरिक्तस्यात्मन इति सूत्रार्थः ।३।१।३।

दूषयति—

तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः ।३।१।४।

तेषामिन्द्रियाणां व्यवस्थानात् स्वं स्वं विषयं प्रति व्यवस्थितत्वात् । अव्यवस्थितविषयेण ज्ञात्रा भवितव्यम् । अन्यथा अव्यवस्थितविषयप्रतिसन्धानानुपपत्तेः । नापि व्यवस्थितविषयत्वेनेन्द्रियचैतन्यसम्भवः । तेषां चेतनोपकारकत्वेऽपि व्यवस्थितविषयस्योपपत्तेः । अतश्चेन्द्रियव्यवस्थानादेव देहादिसंघातव्यतिरिक्तस्यात्मनः सद्भावान्न विषयव्यवस्थानादिति पूर्वसूत्रेण योऽयं तस्य प्रतिषेधः स न प्रतिषेध इति सूत्रार्थः ।३।१।४।

[शरीरव्यतिरिक्तात्मप्रकरणम्]

यदि देहादिसंघातमात्र एवात्मा न तद्व्यतिरिक्तः कश्चित्तदानीं कृतनाशाकृतागमलक्षणानिष्टप्रसङ्ग इत्याह—

शरीरदाहे पातकाभावात् ।३।१।५।

शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघातः प्राणिभूतः [गृह्यते] तथाभूतं संघातान्तरमवधीत् । तस्य दाहे सति अन्यः संघात उत्पद्यते फलभोगसमये । ततश्च येन हिंसा कृता न तस्य फलभोगः [यस्य फलभोगो] न तेन हिंसा कृतेति कृतनाशाकृतागमौ स्यातामिति पातकाभावः । न च यच्छरीरचित्तसन्तानप्रभवं कर्म तच्छरीरचित्तसन्तानप्रभवं फलमिति कार्यकारणभावात् कर्तृत्वभोक्तृत्वव्यवहार इति वाच्यम् । कार्यकारणभावेऽपि सन्तानान्तरवदन्यत्वानुपगमात् । उक्तं च न कार्यकारणभावः प्रतिसन्धानादिकार्यनियामको व्यभिचारादितीच्छासूत्रे [१।१।१० वार्तिके] । तस्मादव्यक्तात्मवादिनः कृतनाशाकृतागमानिष्टप्रसङ्गो दुर्वार इति सूत्रार्थः ।३।१।५।

देहातिरिक्तलक्षणा[णेऽप्य]निष्टप्रसङ्ग इत्याह—

तदभावः सात्मकप्रदाहेऽपि तन्नित्यत्वात् ।३।१।६।

यस्यापि पातककारस्य शरीरं दह्यते [तस्यापि] तदभावस्तयोर्हिंसाफलयोरभावः। कस्मात्? तन्नित्यत्वात् तस्यात्मनो नित्यत्वेनाविकारित्वात् न हिंसा नापि फलभोगः। नित्यत्वेनाविकारित्वेन फलभोगलक्षणविकारासम्भवात्। सम्भवे वा नित्यत्वाभावप्रसङ्गादिति कृतनाशाकृतागमौ समानौ। अनुपपन्ने च हिंसातत्फलभोक्तृत्वे इति सूत्रार्थः ।३।१।६।

तदेतद्दूषयति—

न कार्याश्रयकर्तृवधात् ।३।१।७।

कार्यं सुखप्रतिसंवेदनं तस्याश्रयोऽधिष्ठानमिति कार्याश्रयशब्देन शरीरमुच्यते। कर्तृशब्देनापि विषयोपलब्धिकारणानीन्द्रियाणि कथ्यन्ते। तेषां वधः कार्याश्रयकर्तृवधः। तस्मात् कार्याश्रयकर्तृवधान्न नित्यस्यात्मनो वधः हिंसा। किं तर्हि? अनुच्छित्तिधर्मकस्य यदुपभोगाधिष्ठानं शरीरं तन्मयानि च विषयोपलब्धिसाधनानीन्द्रियाणि, तेषां वधो हिंसेत्युपचर्यते, गत्यन्तराभावात्। यस्य च प्रतिक्षणं विनाशिनः संस्काराः तस्यापि विनाशरूपाणां भावानां विनाशस्य हेतुकतया विलक्षणोत्पाद एव कारणव्यापारजन्य इति स एव हन्त्रा क्रियमाणपदार्थस्य हिंसेत्युपचरितव्यम्। तथा सति यस्य मते हन्तुः फलभोगसम्भवः स एवोपचारः स्वीकर्तव्यः। स च नित्यात्मवादिकार्याश्रयकर्तृवध इति सैव हिंसा। न च नित्यस्याविकारित्वेन फलभोगासम्भवः। क्षणभङ्गपरिणामनिरासे सति नित्यस्यापि सहकारिसमवधानवशाद्धर्मान्तराविर्भावतिरोभावयोः सम्भवात्।

तस्माद्देहादिव्यतिरिक्तात्मवादिपक्षेऽपि कृतनाशाकृतागमौ। अनुपपन्ने च हिंसातत्फलभोक्तृत्वे इति यदुक्तं पूर्वसूत्रेण तदयुक्तमिति सूत्रार्थः ।३।१।७।

[चक्षुरद्वैतनिराकरणप्रकरणम्]

यस्त्वेकस्मिञ्छरीरे चक्षुर्द्वित्वमभ्युपगम्य विषयप्रत्यभिज्ञानेनाप्यात्मसत्त्वं मन्यते तन्मतमुपन्यस्यति—

सव्यदृष्टस्येतरेण प्रत्यभिज्ञानात् ।३।१।८।

सव्येन चक्षुषा दृष्टमितरेणापि चक्षुषा दृष्ट्वा प्रत्यभिजानाति यमहमद्राक्षं तं पश्यामीति वा [प्रतिसन्धानं] प्रत्यभिज्ञानं [तस्य] स्मृतिपूर्वकत्वात् पूर्वापरप्रत्ययानामेककर्तृत्वं साधयतीति सूत्रार्थः ।३।१।८।

तदेतच्चक्षुरेकत्वेनाक्षिपति—

नैकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात् ।३।१।९।

एकमिदं चक्षुर्द्व्यधिष्ठानं मध्ये नासिकाव्यवहितम् । तस्मिन्नेकस्मिन्नासास्थिव्यवहिते द्वावेतौ गृह्यमाणाधिष्ठानभेदा[व]नुमीयमानौ द्वित्वाभिमानं प्रयोजयतः । यथैकस्य मध्यव्यवहितस्य दीर्घद्रव्यस्यान्ताविति न पुनः परमार्थतो द्वे चक्षुषी प्रमाणविरोधादिति सूत्रार्थः ।३।१।९।

भेदवाद्याह—

एकविनाशे द्वितीयाविनाशान्नैकत्वम् ।३।१।१०।

एकस्मिन्नुद्वृत्ते उपहते वा चक्षुषि द्वितीयमवतिष्ठत इति विषयग्रहणमनेनानुमीयते । यदि पुनरेकमेव चक्षुः स्यात् तदानीमेकोपघाते तस्योपहतत्वात् द्वितीयेन विषयो न गृह्येत, गृह्यते च विषयोऽन्यतरेण । तस्माद्विषयग्रहणादेकस्य विनाशे द्वितीयविनाशो नास्तीति द्वे चक्षुषीति सूत्रार्थः ।३।१।१०।

परिहरति—

अवयवविनाशेऽप्यवयव्युपलब्धेरहेतुः ३।१।११।

एकविनाशे द्वितीयाविनाशादित्ययं चक्षुर्द्वित्वे न हेतुः; अवयवविनाशेऽप्यवयव्युपलब्धेः । कतिपयावयवविनाशेऽपि परिशिष्टैरवयवैरवस्थितसंयोगजनितैरारब्धस्य वृक्षस्योपलब्धिरिति । स एवं चक्षुषः कतिपयावयवविनाशे व्यवस्थितैरेवावयवैरारब्धस्यावयव्यन्तरस्य चक्षुषोऽधिष्ठानान्तराश्रयस्य सम्भवेन विषयग्रहणोपपत्त्या प्राचीनस्य द्वितीयस्य चक्षुषोऽवस्थाने प्रमाणाभावात् । नाप्येकाधिष्ठानविनाशे चक्षुषो विनाशः सम्भवति । तस्याधिष्ठानान्तराश्रयत्वेनापि व्यवस्थानसम्भवात् । अपि च चक्षुर्द्वित्वेन परमाणुपरिमाणानां युगपदुभयाधिष्ठानासम्भवेन विकलाविकललोचनयोः तुल्योपलम्भः स्यात् । नाप्येकत्वे चक्षुषो नासावंशेनावपीडितेनाङ्गुल्यावपीडितलोचनवद्भिन्नावभासिता आगन्तुकावपीडनस्य भ्रमहेतुत्वेन स्वाभाविकस्य नासावंशावपीडनस्य तद्धेतुकत्वानुपपत्तेः । तस्मादेकमेव चक्षुरेकस्मिन् देह इति सूत्रार्थः ।३।१।११।

ये त्ववयवविनाशेऽप्यवयव्युपलब्धेरिति यथाश्रुतं सूत्रं वर्णयन्ति तेषां दूषणमाह—

दृष्टान्तविरोधादप्रतिषेधः ।३।१।१२।

न खलु कारणद्रव्यविभागे कार्यद्रव्यमवतिष्ठत इति प्रमाणमस्ति, दृष्टान्ताभावात् । तस्मात् दृष्टान्तविरोधात् यथाश्रुतं पूर्वसूत्रं चक्षुर्द्वित्वस्याप्रतिषेधकमिति सूत्रार्थः ।३।१।१२।

[आत्मन्यनुमानप्रमाणप्रदर्शनम्]

तदेवमात्मनि प्रत्यक्षं प्रमाणयित्वानुमानं प्रमाणयति—

इन्द्रियान्तरविकारात् ।३।१।१३।

कस्यचिदाहृतस्य गृहीतसाहचर्ये रूपे गन्धे वा गृह्यमाणे तत्साहचर्यद्रसानुभवजनितसंस्कारोद्‌बोधक्रमेण तद्रसस्मृतिरुपजायते । स्मृत्या च रसतृष्णया दन्तोदकसंप्लवलक्षणो रसनेन्द्रियविकारो जन्यते । सेयं रसनेन्द्रियविकारकारिणी स्मृतिः पूर्वापरज्ञानयोरेककर्तृत्वे सम्भवति नान्यथेति । तस्मादात्मानुमीयत इति सूत्रार्थः ।३।१।१३।

एतदाक्षिपति—

स्मृतेः स्मर्तव्यविषयत्वात् ।३।१।१४।

स्मृतिरात्मानं कारणत्वेन वा गमयेत् तद्विषयत्वेन वा । न तावत् कारणत्वेन, तस्याः संस्कारकारणत्वात् । न च विषयत्वेन, तस्याः स्मर्तव्यविषयत्वात् । न प्रकारान्तरेण । तस्मान्न तयानुमीयत इति सूत्रार्थः ।३।१।१४।

समाधत्ते—

तदात्मगुणत्वसद्भावादप्रतिषेधः ।३।१।१५।

तस्याः स्मृतेरात्मगुणत्वेन सद्भावादप्रतिषेध आत्मनः । यद्यपि तद्विषयत्वेन नात्मानं गमयति स्मृतिः, तस्याः स्मर्तव्यरसादिविषयत्वात् । तथापि कारणत्वेन गमयेत् । ननूक्तं संस्कारः कारणमिति । तत्रोपादानकारणत्वाभ्युपगमात् । न संस्कार उपादानकारणं, तस्य गुणत्वेन तथाभावानुपपत्तेः । न शरीरमुपादानं भूतचैतन्यप्रतिषेधात् । नापीन्द्रियमुपादानं, तेषामपि भौतिकत्वात् । न च विरोधः, भावरूपकार्यत्वात् । तस्मादाधारत्वेन यदुपादानकारणं स आत्मा तया कार्यभूतयाऽनुमीयत एवेति सूत्रार्थः ।३।१।१५।

[आत्मनो मनोव्यतिरेकप्रकरणम्]

चादेयति—

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात् ।३।१।१६।

य एत आत्मनः शरीरादिभ्यो व्यतिरेकप्रतिपत्तिहेतव उपदिष्टाः। एतेषां मनसि सम्भवात्। ते एते मनसि सम्भवन्ति। मनसः सर्वविषयत्वेन प्रतिसन्धानादिहेतुत्वसम्भवात्। एवं च न मनसो व्यतिरेक आत्मनः सिद्धयतीति सूत्रार्थः ।३।१।१६।

परिहरति—

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ।३।१।१७।

यथा ज्ञातारमभ्युपगच्छता ज्ञानसाधनं चक्षुरादि अभ्युपगम्यते। तथा मनसो ज्ञातृत्वे ज्ञप्तिसाधनेन कारणान्तरेण भवितव्यम्, अकारणिकायाः क्रियाया अदर्शनात्। न च मनसो ग्रहणे कारणान्तराभाव इति वाच्यम्। युगपत् ज्ञानानुत्पत्त्या लिङ्गादिज्ञानसहितस्य कारणत्वेन केवलस्य मनसो विषयत्वाभ्युपगमात्। एवमात्मज्ञानेऽपि केवलस्य कर्तृत्वाद्भोक्तृत्वादिधर्मसहितस्य कर्मत्वान्नैकस्य ज्ञातृज्ञेयभावः। एवं चात्मन्यात्मसंज्ञा न मृष्यते। मनसि च मनः संज्ञा न मृष्यत इति संज्ञाभेदमात्रत्वेनार्थभेदाभावात् मनोव्यतिरिक्तात्मसिद्धिरिति सूत्रार्थः। ।३।१।१७।

[आत्मनित्यताप्रकरणम्]

तदेवमुक्तेन प्रतिबन्धेनात्मनः शरीरादिव्यतिरेक उत्पत्तिप्रभृति यावत्प्रमाणं बाल्यकौमारयौवनाद्यवस्थाभेदेन शरीरभेदव्यवस्थानं च साधितम्। संप्रति देहविनाशादूर्ध्वमव्यवस्थानेन अनेकशरीरयोगोऽस्यास्ति वा नवेति विचारयितुं नित्यानित्यत्वसंशयमाह—

उभयथा दृष्टत्वात् संशयः[1] ।३।१।१८।

विद्यमानमुभयथा दृष्टं नित्यमनित्यञ्च। आत्मा च प्रमाणत उपलब्धेर्विद्यमानः। स च विद्यमानत्वाद्घटवदनित्यः स्यादाहोस्विदाकाशवन्नित्यः स्यादिति संशयो भवतीति सूत्रार्थः ।३।१।१८।

१—इतः पूर्वं नियमश्च निरनुमानः इति सूत्रं सर्वत्रोपलभ्यते परमिह तन्न दृश्यते भाष्यपंक्तिरियं च सूत्रतयेह परिगृहीतम्।

तत्र देहविनाशादूर्ध्वमपि व्यवस्थानेन नित्य इत्याह—

पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः ।३।१।१९।

जातमात्रः खल्वयं कुमारको विषयावगमासमर्थेषु इन्द्रियेषु हर्षभयशोकान् स्मितचलितरुदितानुमेयान् प्रतिपद्यमानः प्रमाणेन लक्षितः। तथाहि स्मितादिहेतुत्वेन हर्षादीनां यौवनाद्यवस्थासु दर्शनात् तथा हर्षादिहेतुत्वेन पूर्वाभ्यस्तस्मृत्यनुबन्धस्य तास्वेवावस्थासु दर्शनादस्यापि पूर्वाभ्यस्तस्मृत्यनुबन्धाद्हर्षभयशोका जायन्त इत्यनुमीयते। न च पूर्वाभ्यस्तस्मृत्यनुबन्धः पूर्वानुभवमन्तरेण भवतीति पूर्वानुभवः कल्प्यते। पूर्वानुभवेन पूर्वशरीरयोगः ततस्तत्राप्यनेन न्यायेन तत्प्राक्तनशरीरयोगः। ततः प्रागपि तथेत्येवमनादित्वेनाकारणत्वादनन्तत्वमप्याकाशादिवत्सिद्धयतीति नित्य आत्मेति सूत्रार्थः ।३।१।१९।

पूर्वाभ्यस्तस्मृत्यनुबन्धकारणत्वं हर्षादीनां नास्तीत्याक्षिपति—

पद्मादिषु प्रबोधसंमीलनविकारवत् तद्विकारः ।३।१।२०।

यथा पद्मादिषु प्रबोधनं संमीलनं च स्मृत्यनुबन्धाद्यदृष्टकारणं न भवति। तथा हर्षादयोऽपि स्मृत्यनुबन्धाद्यदृष्टकारणं न भवति विकारत्वात् पद्मादिविकारवदिति सूत्रार्थः ।३।१।२०।

परिहरति—

नोष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम् ।३।१।२१।

पद्मादिषु प्रबोधसंमीलनेन हर्षादीनां स्मृत्यनुबन्धादिकारणविशेषपूर्वकत्वं प्रतिषिध्यते, आहोस्वित् कारणमात्रपूर्वकत्वम्। न तावत् कारणमात्रपूर्वकत्वप्रतिषेध उष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्। एकभूतारब्धत्वेऽपि भूतान्तरावष्टंभेन वर्तमानत्वात् पञ्चात्मका उच्यन्ते पद्मादयो, न पुनः पाञ्चभौतिकत्वेन तद्विकाराणां प्रबोधादीनामुष्णशीतवर्षाकालनिमित्तत्वात्। तेन सनिमित्तत्वाद्धर्षादयोऽपि सनिमित्ता इति। नापि स्मृत्यनुबन्धादिविशेषपूर्वकत्वप्रतिषेधः। यस्यान्वयव्यतिरेकानुविधायि यत्कार्यं तत्तस्य कारणमिति प्रमाणप्रतीतस्य दृष्टान्तेनैवापह्नोतुमशक्यत्वात्। अन्यथा बोधादीनामपि उष्णादिकारणत्वाभावप्रसङ्गात्। तस्माद्धर्षादीनां यौवनाद्यवस्थासु पूर्वाभ्यस्तस्मृत्यनुबन्धहेतुत्वदर्शनात् बाल्यावस्थायामपि तद्धेतुकत्वसिद्धेः नानिमित्तत्वं, नानियतनिमित्तत्वं हर्षादीनामिति सूत्रार्थः ।३।१।२१।

सामान्येनोक्तं विस्पष्टमर्थं विशेषतः साधयति—

प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात् ।३।१।२२।

उत्पन्नमात्रस्य वत्सस्य प्रवृत्त्यनुमितस्तन्याभिलाषः प्रेत्याहाराभ्यासकृतः जन्मान्तरानुभवजनितसंस्कारोद्‌बोधकारितस्मरणानुबन्धकृतो यौवनाद्यवस्थासु तथाभूतस्मरणानुबन्धहेतुत्वेनाभिलाषविशेषस्य दर्शनादितोऽप्यनादित्वसिद्धिरिति सूत्रार्थः ।३।१।२२।

तदेतन्निमित्तत्वेन दूषयति—

अयसोऽयस्कान्ताभिगमनवत्तदुपसर्पणम् ।३।१।२३।

यथाऽयसोऽयस्कान्ताभिगमनमनिमित्तं तथोत्पन्नमात्रस्य वत्सस्य स्तनोपसर्पणमनिमित्तमिति सूत्रार्थः ।३।१।२३।

दूषयति—

नान्यत्रप्रवृत्त्यभावात् ।३।१।२४।

तदुक्तमयसोऽयस्कान्ताभिगमनमनिमित्तमिति तन्न, अन्यत्र प्रवृत्त्यभावात्। अयस्कान्त एव प्रवृत्तेरयसः कारणं नियमः कल्प्यते तं च केषाञ्चिददृष्टमिति। नानिमित्तं ततश्चायसोऽयस्कान्ताभिगमनमनिमित्तत्वे[न]दृष्टान्त इति सूत्रार्थः ।३।१।२४।

इतश्च नित्य आत्मा—

वीतरागजन्मादर्शनाच्च ।३।१।२५।

जायमानः खल्वयं कुमारकः सर्वोऽपि सरागो जायते। कस्मात् वीतरागाणां जन्मादर्शनात्। रागस्य च पूर्वानुभूतविषयानुचिन्तनं योनिः पूर्वानुभवश्च पूर्वशरीरादित्यनेन न्यायेनानेकशरीरयोगादनादित्वेनानन्तत्वमप्यात्मनः सिद्धमिति सूत्रार्थः ।३।१।२५।

अस्याक्षेपसूत्रम्—

[स] गुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ।३।१।२६।

तस्यात्मनः सरागस्योत्पत्तिः[न]पूर्वानुभूतविषयानुचिन्तनात्। किं तर्हि सगुणस्य घटादेर्द्रव्यस्य यथोत्पत्तिस्तथेति सूत्रार्थः ।३।१।२६।

परिहरति—

न सङ्कल्पनिमित्तत्वाद्रागादीनाम् ।३।१।२७।

उभयवादिसंप्रतिपन्नासु यौवनाद्यवस्थासु पूर्वानुभूतविषयानुचिन्तनलक्षण [स्य रागस्य]निमित्तान्तरजन्यत्वे प्रमाणाभावात् न रागाद्यधिकरणस्यात्मनो घटादिद्रव्यवदुत्पत्तिः संभवति कारणाभावात् । तस्मात् पूर्वानुभूतविषयानुचिन्तन-लक्षणसङ्कल्पनिमित्तत्वाज्जायमानस्य रागादेः अनेकविधशरीरयोगोऽनादिरपवर्गान्त इति सिद्धमात्मनो नित्यत्वमिति सूत्रार्थः ।३।१।२७।

[शरीरपरीक्षाप्रकरणम्]

अनन्तरमवसरप्राप्तं शरीरं परीक्षितुं संशयमाह—

[1]विप्रतिपत्तेः संशयः ।३।१।२८।

केचिदेकप्रकृतीदं शरीरं मन्यन्ते, केचिद्द्विभूतारब्धं, केचित् त्रिभूतारब्धं केचित् पञ्चभूतारब्धमिति तदेवं विप्रतिपत्तेः किं प्रमाणादिवदेकप्रकृतीदं शरीर-माहोस्विदनेकप्रकृतीति सूत्रार्थः ।३।१।२८।

तत्रैकप्रकृतीत्येतत् तत्त्वमित्याह—

पार्थिवं गुणान्तरोत्पत्तेः ।३।१।२९।

मानुषं शरीरं पार्थिवं, कस्माद् गुणान्तरोत्पत्तेः । यस्माच्छरीरेऽपि गन्धादेर्गुणान्तरस्योत्पत्तिरुपलब्धिः, तस्मात् पृथिवी । परमाणुद्वयारब्धैः द्वयणुकैः त्र्यणुकादि[त्रसरेण्वादि]क्रमेणारब्धं शरीरं पार्थिवं गन्धवत्त्वात् पार्थिवपरमाणुवत् । एवमेवाप्यं तैजसं वायवीयञ्च शरीरं वरुणलोकादिषु वर्तत इत्यागमादभ्युपेतव्यम् । यदि पार्थिवपाथःपरमाणुभ्यां द्वयणुकमारभ्येत तदा कारणगुणस्यैकस्यानारम्भकत्वात् निर्गन्धं स्यात् । नापि पार्थिवपरमाणुभ्यां पार्थिवपरमाणुनैकेन च कार्यारम्भः परमाणूनां बहूनामारम्भकत्वात् घटोपश्लिष्टपरमाणुवत् । तत्राप्यारंभकत्वे तत्राशेषकार्यान्तरानुपलब्धिप्रसङ्गः । न च पार्थिवाभ्यां द्वयणुकाभ्यामेकेन च द्वयणुकेन त्र्यणुकोत्पत्तिः[त्रसरेणूत्पत्तिः] विजातीयानामनारम्भकत्वस्य द्वयणुकेऽपि निश्चितत्वात् । एवमन्यत्रापि परमाणुद्वयारंभकपक्षे समानो दोषः । तथा त्रिचतुःपञ्चभूतारंभपक्षे यथा संभवं गुणानुत्पत्तिर्बोद्धव्या । तस्माद्गन्धादिगुणान्तरोत्पत्तेः द्वयणुकादिप्रक्रमेणैकभूतारब्धं शरीरमिति सूत्रार्थः । ।३।१।२९।

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीतमिति ।

तदेवमेकप्रकृतित्वं प्रमाणेन विनिश्चित्य द्वित्रिचतुःपञ्चप्रकृतित्वोपपादनार्थं परोक्तानां हेतूनां पाठमात्रेण फल्गुत्वं दर्शयितुमुपन्यस्यति—

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ।३।१।३०।

निश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ।३।१।३१।

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ।३।१।३२।

एकभूतसमवायिकारणत्वेऽपि भूतान्तरोपश्लेषवशात् तत्तद्गुणोपलब्धिः पृथिव्यादिष्विव संभवतीत्यन्यथासिद्धास्त एव हेतव इति सूत्रत्रितयपाठतात्पर्यार्थः ।३।१।३०-३२।

इममर्थं श्रुतिरुपोद्बलयति—

श्रुतिप्रामाण्याच्च ।३।१।३३।

सूर्यं चक्षुर्गमयताद्वात प्राणमन्ववसृजतादित्याद्यन्त्येष्टिप्रयोगमन्त्रे पृथिवी शरीरमिति शरीरस्य पृथिव्येकप्रकृतित्वं श्रूयते, न वेदवाक्यमप्रमाणं, मन्त्रायुर्वेदवदिति सूत्रे परमेश्वरप्रणीतत्वेन प्रामाण्यस्य साधितत्वात् । तस्मात् श्रुतिप्रामाण्याच्चैकभूतारब्धं शरीरमिति सूत्रार्थः । ३।१।३३।

[इन्द्रियभौतिकत्वपरीक्षाप्रकरणम्]

अथेदानीमवसरप्राप्तानीन्द्रियाणि परिचिक्षिषुस्तत्पूर्वरूपं संशयं विप्रतिपत्त्या दर्शयति—

कृष्णसारे सत्युपलम्भाद् व्यतिरिच्योपलम्भाच्च संशयः ।३।१।३४।

कृष्णसारे सत्युपलम्भाद्रूपस्य········दिति तस्मिन्ननुपलम्भात् कृष्णसारमेव चक्षुरिति केचित् । व्यतिरिच्योपलम्भात्कृष्णसारमप्राप्तस्य विदूरदेशावस्थितस्योपलम्भात् तद्व्यतिरिक्ततेजोद्रव्यमित्यपरे । तथा तद्व्यतिरिच्योपलम्भो न भौतिकत्वे संभवतीत्याहङ्कारिकं चक्षुरिति सांख्याः । भौतिकत्वेऽपि बहिर्विनिःसृतस्य तैजसस्य चक्षुषो गत्वरत्वात् विषयप्राप्तेर्व्यतिरिच्योपलम्भः सम्भवतीति नैयायिकाः । किं कृष्णसारमेव चक्षुः किंवा तदतिरिक्तं तेजः किमाहङ्कारिकं चक्षुः किं वा भौतिकमित्युभयविधः संशयो भवन्निन्द्रियान्तरेष्वप्येवं संशयमापादयतीति सूत्रार्थः ।३।१।३४।

तत्राभौतिकं चक्षुरित्याह—

महदणुग्रहणात् ।३।१।३५।

महच्चाणु च महदणुनी तयोर्ग्रहणं महदणुग्रहणं तस्मान्महदणुग्रहणात् । महतः शैलादेरणुनः सर्षपादेर्ग्रहणादभौतिकं चक्षुस्तस्यापि बहुत्वात् सर्वव्यापकत्वेनोभयग्राहकत्वसंभवात् । भौतिकन्तु यावत्तावदेव व्यापकमिति नोभयग्रहणं संभवतीति सूत्रार्थः ।३।१।३५।

तदेतद्दूषयति —

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ।३।१।३६।

तयोर्महदण्वोर्ग्रहणं कृष्णसाराधिष्ठानस्य भौतिकस्य तरसा बहिः……… प्रसरतो रश्मेरर्थस्य पृथिव्यादेः सन्निकर्षविशेषात् भवति । यतस्तस्मादन्यथासिद्धत्वान्न भौतिकत्वेऽपि कृष्णसारमात्रं चक्षुः । अपि तु तदतिरिक्तस्तदधिष्ठानो रश्मिविशेष इति सूत्रार्थः ।३।१।३६।

चोदयति—

तदनुपलब्धेरहेतुः ।३।१।३७।

तस्य कृष्णसाराधिष्ठानस्य रश्मेर्महत्त्वानेकद्रव्यत्व…………विशेषवियुक्तत्वेन उपलब्धुं योग्यस्यानुपलब्धेर्वाजिविषाणवदविद्यमानत्वाद्रश्म्यर्थसन्निकर्षविशेषान्महदण्वोर्ग्रहणं संभवतीति योऽयं हेतुः, स न हेतुरिति सूत्रार्थः ।३।१।३७।

नानुमीयमानस्य प्रत्यक्षततोऽनुपलब्धिरभावे हेतुः ।३।१।३८।

कुड्याद्यावरणेनानुमीयमानस्य रश्मेः प्रत्यक्षानुपलब्धिर्नाभावे हेतुः योग्यस्यापि क्वचित् प्रत्यक्षेणानुपलब्धिदर्शनात् । यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्येति सूत्रार्थः ।३।१।३८।

ननु चन्द्रमसः परभागस्य पृथिव्याश्चाधोभागस्य नित्यमर्वाग् भागव्यवस्थितत्वेन इन्द्रियसन्निकर्षाभावाद्योग्यत्वेऽप्यनुपलब्धिर्युक्ता । न च नायनरश्मेस्तथेन्द्रियसन्निकर्षाभाव इत्यत आह—

द्रव्यगुणधर्मभेदाच्चोपलब्ध्यनियमः ।३।१।३९।

दृष्टः खल्वयं द्रव्यगुणधर्मभेदो यथा हेमन्तशिशिरयोर्विषक्तावयवमाप्यद्रव्यं महत्त्वानेकं द्रव्यत्वे सत्यपि नोपलभ्यते । स्पर्शमात्रं तस्योपलभ्यते शैत्यम् । तथा

तैजसस्य तद्दशस्य द्रव्यस्य रूपं ग्रीष्मे महत्यनेकद्रव्यसमवाये सत्यपि नोपलभ्यते स्पर्शमात्रमुपलभ्यते, किं कारणं रूपविशेषाभावात्। तथा नायनस्य रश्मेरपि रूपविशेषाभावेनोपलब्धिः संभवति। द्रव्यगुणधर्मभेदेनोपलब्ध्यनियमस्य दृष्टत्वादिति सूत्रार्थः ।३।१।३९।

ननूद्भूतरूपस्पर्शवत्त्वं कस्मान्नायनस्य रश्मेर्नाभ्युपगतमित्यत आह—

[1]कर्मकारितश्चेन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ।३।१।४०।

इन्द्रियाणां **व्यूहो** रचनाविशेषः **पुरुषार्थतन्त्रः** पुरुषार्थाधीनः, अदृष्टकारितश्च शब्दो हेत्वर्थः। यस्मात् कर्मवशात् पुरुषाणां प्रवृत्तिनिवृत्त्यादिव्यवहारेण प्रयोजनसिद्ध्यर्थमिन्द्रियाणां व्यूहः कर्मकारितः। तस्मादनुद्भूतरूपस्पर्शो नायनो रश्मिरिति निश्चीयते। अन्यथाऽनुपलभ्यमानस्य कामिन्यादेरनेकरश्मिसन्निपाते दाहप्रसङ्गेन व्यवहारवियोगादिति सूत्रार्थः ।३।१।४०।

नन्वावरणानुमेयश्चाक्षुषो रश्मिरित्युक्तं कथमित्यत आह—

[2]द्रव्यविशेषे च प्रतिघातादावरणोपपत्तिः ।३।१।४१।

कुड्यादिद्रव्यविशेषे चाक्षुषस्य रश्मेः प्रतिघातात् प्रतिहन्यमानत्वादावरणोपपत्तिः। कुड्याद्यन्तरितस्योपलब्धिप्रसङ्गात्। तस्मादस्त्यावरणं तदनुमापकमिति सूत्रार्थः ।३।१।४१।

ननु भौतिकस्य रश्मेर्द्रव्यविशेषप्रतिघातादावरणोपपत्तिरुक्ता। तदयुक्तं काचाभ्रपटलादिषु अप्रतिघातादभौतिकत्वेनावरणानुपपत्तिरित्यत आह—

अव्यभिचारात्तु प्रतिघातो भौतिकधर्मः ।३।१।४२।

भौतिकानामपि प्रदीपरश्मिप्रभृतीनां काचाभ्रपटलादिषु स्वच्छद्रव्येष्वप्रतिघातदर्शनेन व्यभिचारान्नाभौतिकधर्मः प्रतिघातः। प्रतिघातस्त्वव्यभिचाराद्भौतिकधर्मः। तस्मादावरणोपपत्तिरिति सिद्धमावरणानुमेयत्वं चाक्षुषस्य रश्मेरिति सूत्रार्थः ।३।१।४२।

अथेदानीमेकदेशिमतेनोत्तरमाह—

१—इतः पूर्वम्—अनेकद्रव्यसमवायाद्रूपविशेषाच्च रूपोपलब्धिरिति सूत्रमत्र नास्ति।
२—अत्र भाष्यपंक्तिद्वयं सूत्रत्वेन परिगृहीतम्।

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ।३।१।४३।

तस्य चाक्षुषस्य रश्मेरनुपलब्धिः मध्यन्दिनोल्काप्रकाशानुपलब्धिवत् । यथा मध्यन्दिनोल्काप्रकाशः आदित्यप्रकाशेनाभिभूतत्वान्नोपलभ्यते तथा चाक्षुषोऽपि रश्मिः प्रकाशाभिभवान्नोपलभ्यत इति सूत्रार्थः ।३।१।४३।

तदेतद्दूषयति—

न रात्रावप्यनुपलब्धेः ।३।१।४४।

चाक्षुषस्य रश्मेरभिभवादनुपलब्धिरिति यदुक्तं तन्न । कस्मात्, रात्रावप्यनुपलब्धेः । दिवाभिभवादनुपलब्ध उल्काप्रकाशो यथा रात्रावुपलभ्यते । न तथा नायनं तेजो रात्रावप्युपलभ्यते । तस्माद्रात्रावप्यनुपलब्धेः, अभिभवान्नोपलभ्यत इत्येतन्नेति सूत्रार्थः ।३।१।४४।

इतोऽप्यभिभवो नास्तीत्याह—

बाह्यप्रकाशानुग्रहाद्विषयोपलब्धेरनभिव्यक्तितोऽनुपलब्धिः ।३।१।४५।

यत्राभिभवः तत्र बाह्यप्रकाशानपेक्षत्वं दृष्टमुपलब्धौ यथोल्काप्रकाशे । न च तथा चाक्षुषस्य रश्मेः बाह्यप्रकाशानपेक्षत्वं दृष्टं विषयोपलब्धौ । तस्मात् बाह्यप्रकाशाद्विषयोपलब्धेरनभिव्यग्रतयानुद्भूतरूपानुत्पत्तेरेवानुपलब्धिर्नाभिभूतस्येति सूत्रार्थः ।३।१।४५।

न केवलं बाह्यप्रकाशापेक्षित्वाभावादेवाभिभवाभावः । किं तर्हि अनुद्भूतरूपत्वादपीत्याह—

अभिव्यक्तौ चाभिभवात् ।३।१।४६।

अभिव्यक्तिरुद्भूतिरभिभवात् उल्काप्रकाशाद्वा यत्राभिव्यक्तिर्नास्ति तत्राभिभवो नास्ति । यथा विषक्तावयवे पाथसि । अनुद्भूतरूपश्च नायनो रश्मिस्तस्मान्न तस्याभिभवादनुपलब्धिरिति सूत्रार्थः ।३।१।४६।

न केवलमावरणानुमेयश्चाक्षुषो रश्मिः । किं तर्हि चाक्षुषादिलिङ्गानुमेयश्चेत्याह—

नक्तञ्चर[नयन]रश्मिदर्शनाच्च ।३।१।४७।

नक्तञ्चराणां वृषदंशप्रभृतीनां चक्षुषि रश्मिदर्शनात्तद्दृष्टान्तेन मानुषमपि चक्षू रश्मिवत् चक्षुष्ट्वात् नक्तञ्चरचक्षुर्वदित्यनुमातुं शक्यमेव । न च मार्जार-

मनुष्यत्वादिजातिभेदवदिन्द्रियाणां भेद इति वाच्यम्। उभयत्रावरणासद्भावेन रश्मिसद्भावस्यापह्नोतुमशक्यत्वात्। तस्मादस्ति चाक्षुषो रश्मिरिति सूत्रार्थः ।३।१।४७।

रश्म्यर्थसन्निकर्षविशेषात् महदणुग्रहणमित्युक्तं तदयुक्तमिन्द्रियाणामप्राप्यकारित्वादित्याह—

[अ]प्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ।३।१।४८।

अप्राप्य विषयमिन्द्रियाणि ग्रहणं कुर्वन्ति। तस्मात् काचाभ्रपटलस्फटिकान्तरितानां व्यवहितानामुपलब्धेः काचादिव्यवहितेष्वर्थेषु तृणादीनामिव संबन्धाभावेऽपीन्द्रियाण्युपलब्धिमुत्पादयन्ति यतस्तस्मादप्राप्यकारीणि। अतएवाभौतिकानीति सूत्रार्थः ।३।१।४८।

तदेतन्नेत्याह—

कुड्यान्तरितानुपलब्धेरप्रतिषेधः ।३।१।४९।

प्राप्तेः यदि प्राप्यकारित्वमिन्द्रियाणां न स्यात्तदा कुड्यादिव्यवहितानामनुपलब्धिर्न स्यात्। दृश्यते चानुपलब्धिः। अतो मन्यामहे नाप्राप्यकारीणीति सूत्रार्थः ।३।१।४९।

यत्पुनः काचादिव्यवहितेष्वर्थेषु तृणादीनामिवेन्द्रियाणामपि संबन्धाभाव इत्युक्तं तदयुक्तमित्याह—

अप्रतिघातात्सन्निकर्षोपपत्तिरिन्द्रियाणाम्[१] ।३।१।५०।

तद्व्यवहितेष्वर्थेष्विति सूत्रार्थः ।३।१।५०।

भौतिकस्यास्ति प्रतिघात इत्येतदपि नास्तीत्याह—

आदित्यरश्मेः स्फटिकान्तरितेऽपि दाह्येऽविघातात् ।३।१।५१।

आदित्यरश्मेः कुम्भाम्भसि अविघातात्प्रदीपरश्मेः स्फटिकान्तर्गतदृश्ये अविघाताद्विभावसोश्च दाह्ये भर्जनकपालस्थे अविघातात् भौतिकत्वेऽपीन्द्रियाणां प्रतिघातो नेति सूत्रार्थः ।३।१।५१।

१—अत्र इन्द्रियाणामित्यधिकपाठः सूत्रे।

चोदयति—

नेतरेतरधर्मप्रसङ्गात् ।३।१।५२।

कुड्यादिषु प्रतिघातः काचादिष्वप्रतिघात इत्येतन्न । कस्मात्, इतरेतरधर्मप्रसङ्गात् क्वचित्प्राप्तिः क्वचिदप्राप्तिरिन्द्रियाणामित्येतदयुक्तमिति सूत्रार्थः ।३।१।५२।

परिहरति—

आदर्शोदकयोः प्रसादस्वाभाव्याद् रूपोपलब्धिवत्तदुपलब्धिः ।३।१।५३।

यथा आदर्शोदकयोः दर्पणसलिलयोः प्रसादस्वाभाव्यात् प्रसादस्वच्छत्वात् रूपोपलब्धिर्मुखादिप्रतिबिम्बोपलब्धिः । न कुड्यघटयोरस्वच्छस्वभावत्वात् समानेऽपि वस्तुत्वे तथा । तदुपलब्धिः तस्य काचादिव्यवहितस्योपलब्धिः । न कुड्यादिव्यवहितस्य, समानेऽपि वस्तुत्वे इति सूत्रार्थः ।३।१।५३।

क्वचित् प्रतिघातः क्वचिदप्रतिघातः इत्येव कथं समानेऽपि वस्तुत्व इति नाशङ्कनीयं, वस्तुस्वभावस्यापर्यनुयोज्यत्वादित्याह—

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ।३।१।५४।

प्रमाणस्य तत्त्वविषयत्वात् येन स्वभावेनामी प्रमाणेन परिज्ञातास्तेनैव स्वभावेन तेऽवतिष्ठन्ते । न पुनरमीषां स्वभावान्तरमस्ति, तत्र प्रमाणाभावात् । ततश्च काचादिष्वव्यवधानं व्यवधानञ्च कुड्यादिषु इन्द्रियाणामुपलभ्यते । तर्हि तथाऽभ्युपगन्तव्यं नेतरेतरधर्मप्रसङ्गश्चोदनीय इति सूत्रार्थः ।३।१।५४।

[इन्द्रियनानात्वप्रकरणम्]

इदानीमिन्द्रियाणामेकानेकत्वं विचारयितुं संशयमाह—

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ।३।१।५५।

स्थानान्यत्वशब्देन नानास्थानत्वमेवोच्यते । नानास्थानत्वेन नानात्वं दृष्टं भिन्नभाजनगतानां तालफलानामवयविनश्चैकत्वं दृष्टं नानास्थानस्य । ततश्च नानास्थानत्वादवयविवदिन्द्रियाणामेकत्वमाहोस्विद्भिन्नभाजनगततालफलवदनेकत्वमिति संशयो भवतीति सूत्रार्थः ।३।१।५५।

पूर्वपक्षं परिगृह्णाति—

त्वगव्यतिरेकात् ।३।१।५६।

त्वगेकमिन्द्रियं, कस्मादव्यतिरेकात् सर्वेन्द्रियाधिष्ठानानां त्वचा व्याप्तत्वात् । यस्मात्सत्यां त्वचि सर्वेन्द्रियाद्यधिष्ठानव्यापिन्यां विषयग्रहणानि संभवन्ति नासत्याम् । तस्मात् सा त्वगेकमिन्द्रियमिति सूत्रार्थः ।३।१।५६।

दूषयति—

न युगपदर्थानुपलब्धेः ।३।१।५७।

यदि त्वगेकमिन्द्रियं स्यात्तदा तस्य करणत्वेन प्राप्यकारित्वादप्राप्तस्य विदूरदेशावस्थितस्य रूपादेः ग्रहणं न स्यादिति करणधर्मातिक्रमेणाप्राप्यकारित्वमभ्युपगन्तव्यम् । तथा सत्यप्राप्तस्य रूपादेर्युगपदुपलब्ध्या भवितव्यम् । नचैतदस्ति । तस्मात् युगपत्पदार्थानुपलब्धेः न त्वगेकमिन्द्रियमिति सूत्रार्थः ।३।१।५७।

तदेवं परपक्षभावं दूषयित्वा स्वपक्षसाधनमाह—

इन्द्रियार्थपञ्चत्वात् ।३।१।५८।

इन्द्रियाणामर्थाः इन्द्रियार्थाः प्रयोजनानि तेषां पञ्चत्वात् । पञ्च बाह्येन्द्रियाणि रूपरसगन्धस्पर्शशब्देषु मध्ये रूपग्रहणैकप्रयोजनं चक्षुरेवमितराण्यपि तत्तद्विषयैकप्रयोजनानीति प्रयोजनपञ्चत्वात् पञ्चेन्द्रियाणीति सूत्रार्थः ।३।१।५८।

चोदयति—

न तदर्थबहुत्वात् ।३।१।५९।

यदि प्रयोजनपञ्चत्वादिन्द्रियपञ्चत्वमभ्युपगम्यते, तर्हि प्रयोजनबहुत्वात् बहूनीन्द्रियाण्यपि प्रसज्येरन्निति न प्रयोजनपञ्चत्वादिन्द्रियपञ्चत्वं सिद्धयति । अतिप्रसङ्गदोषमापादयतीति सूत्रार्थः ।३।१।५९।

परिहरति—

गन्धत्वाव्यतिरेकात् गन्धादीनां[अ]प्रतिषेधः ।३।१।६०।

यद्यपि गन्धादीनां सौरभादिधर्मभेदात् प्रयोजनबहुत्वं तथापि गन्धत्वाव्यतिरेकाद्गन्धत्वसामान्येनोपढौकिता गन्धादयः पञ्चविधा एवेति प्रयोजनपञ्चत्वादिन्द्रियपञ्चत्वं सिद्धयन्नातिप्रसङ्गमापादयतीति सूत्रार्थः ।३।१।६०।

पुनश्चोदयति—

विषयत्वाव्यतिरेकादेकत्वम् ।३।१।६१।

यदि सौरभासौरभादिधर्मभेदेनानेकत्वेऽपि गन्धत्वादिसामान्योपश्लेषबलात् गन्धादयः पञ्चविधा इति प्रयोजनपञ्चत्वं तर्हि विषयत्वाव्यतिरेकाद्विषयत्वसामान्योपश्लेषणात् सर्वेषां विषयाणामेकत्वमिति प्रयोजनस्यैकत्वादेकमिन्द्रियं प्रसज्येतेति सूत्रार्थः ।३।१।६१।

परिहरति—

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ।३।१।६२।

न विषयत्वाव्यतिरेकादेकत्वमिन्द्रियाणाम् । कुतः ? बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः । बुद्धिलक्षणशब्देन प्रयोजनमुच्यते, अधिष्ठानशब्देनाश्रयो, गतिशब्देनेन्द्रियप्रवृत्तिः, आकृतिशब्देन प्रमाणं, जातिशब्देन भूतात्मकत्वं तेषां पञ्चत्वादिन्द्रियपञ्चत्वम् । यद्यपि प्रयोजनबहुत्वं सौरभासौरभाद् यद्यपि चैकत्वं विषयरूपेण, तथापि तत् करणान्तरप्रयोजकं न भवति । यथा गन्धग्रहणमिन्द्रियान्तरेणानुपपद्यमानं घ्राणेन्द्रियमुपस्थापयति, न तथा सौरभासौरभादिधर्मभेदः कारणान्तरमुपस्थापयति । घ्राणेनैव तदुभयग्रहणस्य सिद्धत्वात् । एवमिन्द्रियान्तरेष्वपि तत्तद्विषयग्रहणभेदानां प्रयोजकाप्रयोजकमूलत्वं सिद्धयति । एवमधिष्ठानगत्याकृतिजातिपञ्चत्वे तद्वतां पञ्चत्वदर्शनादूहनीयम् । नापि विषयत्वाव्यतिरेकेण प्रयोजनैक्यादेकत्वं युगपदुपलब्धिप्रसङ्गस्योक्तत्वात् । ततश्च बुद्धिलक्षणपञ्चत्वादिन्द्रियपञ्चत्वं सिद्धयति । एवमधिष्ठानगत्याकृतिजातिपञ्चत्वे तद्वतां पञ्चत्वदर्शनादिन्द्रियपञ्चत्वं सिद्धयतीति सूत्रार्थः ।३।१।६२।

ननु जातिशब्देन भूतात्मकस्योक्तत्वात् भूतपञ्चत्वादिन्द्रियपञ्चत्वमुक्तं तदेव भूतात्मकं कुतस्त्यमित्यत आह—

भूतगुणविशेषस्योपलब्धेस्तादात्म्यम् ।३।१।६३।

स एवार्थः स्वभावो यस्य सोऽयं तदर्थः तस्य भावः तादर्थ्यं भूतात्मकत्वमिन्द्रियाणामिति यावत् । तत्कुतः भूतगुणविशेषोपलब्धेः यस्य भूतस्य योऽसौ गुणविशेषः तस्य व्यञ्जकस्तदात्मकः । यथा हि भूतचन्दनगन्धव्यञ्जक सरकादिः पार्थिवो दृष्टः । तथा घ्राणं तस्मात् पार्थिवमिति । एवं तत्तद्भूत गुणविशेषस्य व्यञ्जकत्वात्तदात्मकत्वमिन्द्रियाणामिति सूत्रार्थः ।३।१।६३।

[अर्थलक्षणपरीक्षाप्रकरणम्]

इदानीमर्थलक्षणं परीक्षमाणः पृथिव्यादीनां द्रव्याणां गुणानाञ्च गन्धादीनामिन्द्रियैरस्मर्यमाणत्वलक्षणमर्थलक्षणं तेषामेकैकस्यैकैकगुणत्वे सर्वस्य वा सर्वगुणत्वे न संभवति। किं तर्हि कस्यचिदेकगुणत्वे कस्यचिद् द्विगुणत्वे कस्यचित् त्रिगुणत्वे कस्यचित् चतुर्गुणत्वे च संभवतीति गुणविनियोगं विकल्पपक्षावलम्बनेनाह—

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ।३।१।६४।

अप्तेजोवायूनां पूर्वपूर्वमपोह्याकाशस्योत्तरः ।३।१।६५।

गन्धरसरूपस्पर्शशब्दानां मध्ये स्पर्शपर्यन्ता गुणा पृथिव्या अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकृष्य त्रिगुणद्विगुणैकगुणत्वमाकाशस्योत्तरः स्पर्शपर्यन्तानां नियतेन्द्रियग्राह्यत्वं संभवतीति सूत्रद्वितयार्थः ।३।१।६४-६५।

चोदयति—

[न] सर्वगुणानुपलब्धेः ।३।१।६६।

न चतुस्त्रिद्व्येकगुणत्वं पृथिव्यादीनामिति विकल्पपक्षः संभवति। कस्मात् **सर्वगुणानुपलब्धेः**। यद्भूतात्मकं यदिन्द्रियं तेन तद्गुणस्य सर्वस्योपलब्ध्या भवितव्यम्। नचोपलभ्यते घ्राणादीनां गन्धादिष्वेवैकैकग्रहणे नैपुण्यस्य दृष्टातत्वात्, तस्मात् सर्वगुणानामनुपलब्धेर्न विकल्पेन संभवतीति सूत्रार्थः ।३।१।६६।

कथं तर्हि गुणविनियोग इति चेत्तत्राह—

एकैकश्येनोत्तरोत्तरगुणसद्भावादुत्तरोत्तराणां तदनुपलब्धिः ।३।१।६७।

एकैकश्येनेति सौत्रो निर्देशः। पृथिव्यादिष्वेकैकं भूतं प्रति गन्धानामेकैकापकर्षेणोत्तरोत्तरगुणसद्भावात् यथाक्रमेणैकैकगुणत्वादुत्तरोत्तराणां तदनुपलब्धिः। तस्य च न चतुस्त्रिगुणस्योपलब्धिः। तस्मात्तेषां भूतानां तदात्मकानां चेन्द्रियाणामेकैकगुणत्वेन गुणान्तराणामविद्यमानत्वेन ग्रहणानर्हत्वादिति सूत्रार्थः ।३।१।६७।

ननु गुणान्तरासंभवे कथमेकस्मिन्ननेकगुणा गृह्यन्त इत्यत आह—

संसर्गत्वानेकगुणत्वग्रहणम् ।३।१।६८।

पृथिव्यादीनामेकैकगुणत्वेऽपि भूतान्तरसंसर्गादनेकगुणग्रहणं न तद्गुणत्वेनैवेति सूत्रार्थः ।३।१।६८।

यदि संसर्गादनेकगुणग्रहणं तर्हि पृथिव्यादीनां त्रयाणां चतुस्त्रिगुणत्वनियमो नोपपद्यते । संसर्गस्योभयत्र समानत्वेनानियतगुणत्वप्रसङ्गादित्याह—

विष्टं ह्यपरं परेण ।३।१।६९।

विष्टत्वं संयोगो हि यस्मादपरं पृथिव्यादि परेणाबादिना विष्टं नापरेण परम् । तस्मात् समानेऽपि संयोगे विष्टत्वलक्षणे वह्निधूमयोः संवृत्तयोः धूमस्य व्याप्यत्वमिवापरात् परस्य विशेषो विद्यत इति चतुस्त्रिद्विगुणत्व-नियमव्यवहारः संभवतीति सूत्रार्थः ।३।१।६९।

न पार्थिवाप्ययोः प्रत्यक्षत्वात् ।३।१।७०।

यद्येकैकगुणत्वं तदा तेजस एव रूपत्वमिति नीरूपयोः पार्थिवाप्ययोः प्रत्यक्षत्वं न स्यात् । दृश्यते पार्थिवाप्ययोः प्रत्यक्षत्वं रूपवत्त्वेन । तस्मात् पार्थिवा-प्ययोर्द्रव्ययोः प्रत्यक्षत्वात् पार्थिवाप्ययोः रूपरसयोः प्रत्यक्षत्वान्न पृथिव्यादीना-मेकैकगुणत्वम् । नापि विष्टत्वस्य समानत्वेऽपि धूमस्य व्याप्यत्वमिव संसर्गि गुणग्रहणे विशेषलाभो व्याप्यत्वेऽप्यन्यगुणानामन्यत्रानुपलब्धेः । अतः पृथिव्यादी-नामेकैकगुणत्वमिति न नियोगपक्षः साधीयानिति सूत्रार्थः ।३।१।७०।

ननु माभून्नियोगपक्षस्तथापि विकल्पपक्षे सर्वगुणानुपलब्धिर्दोषत्वेन चोदितेत्यत आह—

पूर्वं पूर्वं गुणोत्कर्षात्तत्प्रधानम् ।३।१।७१।

तस्मान्न सर्वगुणोपलब्धिः घ्राणादीनाम् । पूर्वं पूर्वमिन्द्रियगन्धादिगुणो-त्कर्षात् तत्प्रधानं स्वोत्कृष्टगुणसमानजातीयगुणाभिव्यञ्जकं न स्वगुणसमान-जातीयगुणमात्रव्यञ्जकम् । तस्माच्चतुस्त्रिगुणत्वेऽपि न सर्वगुणोपलब्धिः । किं तर्हि, उत्कृष्टगुणसमानजातीयगुणोपलब्धिरिति सूत्रार्थः ।३।१।७१।

ननु पार्थिवत्वे समानेऽपि किञ्चिदेव पार्थिवं घ्राणं किञ्चिन्न त्येवमादि-व्यवस्थानं कुतस्त्यमित्यत आह—

तद्व्यवस्थानन्तु भूयस्त्वात् ।३।१।७२।

पुरुषार्थनिवृत्तिसमर्थस्य संसर्गः पुरुषादृष्टकारितो भूयस्त्वं, तस्मात् भूयस्त्वाददृष्टोपढौकितदृष्टिविशेषात् किञ्चिदेव पार्थिवादि कस्यचिदर्थस्य निवृत्तौ समर्थं मणिमन्त्रादिवदिति । तेषामिन्द्रियाणां व्यवस्थानं संभवतीति सूत्रार्थः ।३।१।७२।

यदि घ्राणादीनीन्द्रियाणि गन्धादीनां ग्राहकाणि तर्हि स्वगतगन्धादीनामपि ग्राहकाणि प्रसज्येरन्नविशेषादित्याशङ्क्य तत्सहचरितस्येन्द्रियाभावान्न तद्ग्रहणं संभवतीति परिहरति। स्वगुणं नोपलभन्त इन्द्रियाणि। कस्मादिति चेत्—

सगुणानामिन्द्रियाभावात् ।३।१।७३।

सूत्रार्थो निगदेन व्याख्यातः ।३।१।७३।

[1]न शब्दगुणोपलब्धेः ।३।१।७४।

स्वगुणं नोपलभन्त इन्द्रियाणीत्ययुक्तम्। कस्मात्, स्वगुणग्रहणस्य शब्दगुणे श्रोत्रे दृष्टत्वादिति सूत्रार्थः ।३।१।७४।

परिहरति—

तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात् ।३।१।७५।

तस्य गुणस्य शब्दस्य श्रोत्रेणोपलब्धिरितरेतरद्रव्यगुणवैधर्म्यादितरद्रव्यवैधर्म्यात् सगुणस्येन्द्रियभावाभावात् श्रोत्रस्येतरगुणवैधर्म्यात् स्वसमानजातीयगुणाभिव्यञ्जकाभावात्। शब्दस्य न पुनः सगुणस्येन्द्रियत्वेन स्वगुणाभिव्यञ्जकत्वादिति सूत्रार्थः ।३।१।७५।

इति श्रीभट्टवागीश्वरविरचितायां न्यायसूत्रतात्पर्यदीपिकायां
तृतीयाध्यायस्य प्रथमाह्निकं समाप्तम्।

१—इतः पूर्वं सूत्रमेकं "तेनैव तस्याग्रहणाच्चे"ति नात्र दृश्यते।

तृतीयोऽध्यायः ।

द्वितीयाह्निकम् ।

[बुद्धयनित्यत्वप्रकरणम्]

अथेदानीमवसरप्राप्तं बुद्धिलक्षणं परीक्षितुं तस्या नित्यत्वानित्यत्वे संशयमाह—

कर्माकाशसाधर्म्यात् संशयः ।३।२।१।

कर्म चाकाशं च कर्माकाशे ताभ्यां साधर्म्यं बुद्धेरस्पर्शत्वं तस्मात् **कर्माकाशसाधर्म्यात्** किं नित्या वा स्यादनित्या वा बुद्धिरिति संशयः । यदि नित्या, तदा बुद्धितत्त्वस्यान्तःकरणभूतस्य सांख्याभिमतस्य ज्ञानोपलब्ध्यादिव्यतिरिक्तस्य सिद्धेर्बुद्ध्यादिपर्यायिशब्दाभिधेयत्वं बुद्धिलक्षणमनुपपन्नं स्यात् । अनित्यायान्तु तस्यां ज्ञानोपलब्ध्याद्यव्यतिरिक्तस्य सिद्धेस्तत्पर्यायाभिधेयत्वं बुद्धिलक्षणमुपपन्नं स्यादिति सूत्रतात्पर्यार्थः ।३।२।१।

तत्र नित्यत्ववाद्याह—

विषयप्रत्यभिज्ञानात् ।३।२।२।

यं विषयं पूर्वमज्ञासिषं तमिमं जानामीति **विषयप्रत्यभिज्ञानं** दृष्टम् । न च चिद्रूपस्य कूटस्थनित्यस्यात्मन उभयवदनेकज्ञानादिवृत्तियोगः सम्भवति, विकारित्वप्रसङ्गात् । बुद्धेस्तु परिणामनित्यत्वात् तादृशज्ञानादिवृत्तियोगः सम्भवतीति । सैव पूर्वापरज्ञानयोरनुसन्धात्री विषयप्रत्यभिज्ञानादवतिष्ठमाना बुद्धिर्नित्येति सूत्रार्थः ।३।२।२।

सिद्धान्त्याह—

साध्यसमत्वादहेतुः ।३।२।३।

यथा बुद्धेर्नित्यत्वं साध्यं तथा प्रत्यभिज्ञानत्वमपि साध्यम् । कस्मात्; वेदनधर्मस्य करणेऽनुपपत्तेः । उत्पत्तौ वा कारणान्तरस्यावश्यं भावित्वेन संज्ञामात्रभेदप्रसङ्गात् । न च चिद्रूपस्य ज्ञातृत्वं, विकारित्वेन कूटस्थनित्यतापरित्यागात् । तस्माद्विषयप्रत्यभिज्ञानात् प्रत्यभिज्ञातुरात्मनो नित्यत्वं सिद्धयति न बुद्धेः । तस्यास्तत्राप्रतिभासमानत्वेन विषयप्रत्यभिज्ञानादिहेतोरसिद्धत्वादिति सूत्रार्थः ।३।२।३।

नित्याया बुद्धेरनित्या ज्ञानात्मिका वृत्तय इति सैव प्रत्यभिज्ञात्रीति पक्षेऽनिष्टप्रसङ्गं सूत्रद्वयेनाह—

न युगपदग्रहणात् ।३।२।४।

अप्रत्यभिज्ञाने च विनाशप्रसङ्गात् ।३।२।५।

नित्याया बुद्धेरनित्या वृत्तय इत्येतन्न। कस्माद्, **युगपदग्रहणात्** वृत्तिवृत्तिमतोरभेदेन वृत्तीनामव्यवस्थानाद्युगपद्विषया गृह्येरन्, न गृह्यन्ते। तस्माद् **युगपदग्रहणात्** नित्या बुद्धिः। तथाऽप्रत्यभिज्ञाने प्रत्यभिज्ञानलक्षणे वृत्तिविशेषेऽपि विनष्टे तदैक्यात् वृत्तिमत्या बुद्धेरपि विनाशप्रसङ्गात्। न नित्याया बुद्धेरनित्यज्ञानात्मकवृत्तिविशेषासम्भवेन प्रत्यभिज्ञातृत्वमिति सूत्रद्वितयार्थः ।३।२।४-५।

ननु नित्या व्यापिनी बुद्धिरन्तःकरणभूता युगपदनेकग्रहणप्रसङ्गात् नाभ्युपगम्यते। कथं तर्हि युगपदग्रहणमित्याशङ्क्याह—

क्रमवृत्तित्वादयुगपद्ग्रहणम् ।३।२।६।

परमाणुपरिमाणमविभु वैकमन्तःकरणं पर्यायेणेन्द्रियैः संबध्यत इति क्रमवृत्तित्वादयुगपद् ग्रहणं वृत्तिवृत्तिमतोर्नानात्वे न सम्भवतीति सूत्रार्थः ।३।२।६।

अप्रत्यभिज्ञानञ्च विषयान्तरव्यासङ्गात् ।३।२।७।

विषयान्तरव्यासक्ते मनसि वृत्तिवृत्तिमतोरत्यन्तभेदेनास्मत्पक्षे प्रत्यभिज्ञानाभावश्च सम्भवति न भवत्पक्ष इति सूत्रार्थः ।३।२।७।

अन्तःकरणरूपाया बुद्धेर्व्यापित्वेऽपि पर्यायेणेन्द्रियैः संयोगः कस्मान्नेष्यत इत्याशङ्क्याह—

न गत्यभावात् ।३।२।८।

न पर्यायेणेन्द्रियैः व्यापिन्या बुद्धेः संयोगः सम्भवति। कस्मात्? **गत्यभावात्** व्यापित्वेन व्योमवद्बुद्धेरपि गमनक्रियाया अभावेन पर्याययोगासम्भवात्। युगपदनेकविषयग्रहणस्य तादवस्थ्यात्। न च दीर्घशष्कुलीभक्षणन्यायेन तत्संभवः, पद्मपत्रशतव्यतिभेदप्रत्ययवदाशुतरविनाशित्वेऽनेकविषयग्रहणप्रत्ययस्य तत्रापि भ्रान्तत्वात्। तस्मान्न युगपदग्रहणं बुद्धिनित्यत्ववादिनः सम्भवतीति सूत्रार्थः ।३।२।८।

ननु बुद्धिनित्यत्वेऽपि पर्यायग्रहणाभावो दोष उक्तः पर्यायग्रहणस्यापारमार्थिकत्वादित्याह—

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ।३।२।९।

यथैकस्य स्फटिकमणेर्जपार्कणिकाद्यनेकोपाधिसंबन्धात् रक्तपीतादिभेदो न परमार्थः। एवमन्तःकरणमणेरपीन्द्रियप्रनाड़ि[णालि]कया विषयाकारपरिणतस्य तत्तद्विषयोपरागवशाद्ग्रहणभेद उपलक्ष्यते। तदुपरागाच्च प्रतिबिम्बोदयक्रमेण चिद्रूपाभेदेऽपि जीवे भोगचैतन्यभेद इति न पर्यायग्रहणाभावः सांख्यस्य दोषायेति सूत्रार्थः ।३।२।९।

[क्षणभङ्गभङ्गप्रकरणम् प्रासङ्गिकम्]

अत्र क्वचित्परमार्थभेदप्रत्ययं विनोपाधीनामपि भेदासम्भवेन तदुपाध्यधीनपारमार्थिकभेदस्य तेनैव स्फटिकदृष्टान्तेनानुपपत्तेः भेदप्रत्ययानां मानबाधितविषये परमार्थत्वात् प्रतिबिम्बन्यायेन भोगचैतन्यभेदस्य जीवे निरूपयितुमशक्यत्वात्। एकस्मिन् बोधे बोद्धृद्वित्वोपपत्तेश्च। तत्तद्विषयग्रहणानि परमार्थतो भिन्नानीति पर्यायग्रहणाभावदोषस्तदवस्थ एवेति परिहारोऽतिस्पष्ट इति मन्वानः शाक्यमतावलम्बनेन दूषणमाह—

स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद्व्यक्तीनामहेतुः ।३।२।१०।

स्फटिकान्यत्वाभिमानवत् बुद्धेरप्यन्यत्वाभिमानोऽपरमार्थ इत्ययं पूर्वोक्तपरिहारो न हेतुः। कस्मात्, स्फटिकेऽपरापरोत्पत्तेः, अपरस्यापरस्फटिकभेदस्योत्पत्तेः। श्वेतरक्तपीतादिस्फटिकभेदानां पृथक् पृथगुत्पत्तेः। एतच्च कुत इति चेत् क्षणिकत्वाद्व्यक्तीनां शरीरादिव्यक्तीनामाहारपरिणामवशादुपचयापचयप्रबन्धदर्शनेन प्रतिक्षणमन्यत्वेन क्षणिकत्वाद्दृष्टान्तेन स्फटिकादीनामपि सत्त्वेन क्षणिकत्वसिद्धेः। यत्सत् तत्क्षणिकं यथा शरीरम्,। तथा च विवादाध्यासिताः स्फटिकादय इति। तस्मात् स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमान इत्ययमहेतुरिति सूत्रार्थः ।३।२।१०।

अत्र क्षणस्थितिकालाः क्षणिका इति क्षणिकशब्देनाल्पकालसंबन्धित्वं विवक्षितं पूर्वापरभागरहितकालकलामात्रसंबन्धित्वं वा? न तावत्पूर्वः कल्पः सम्भवतीत्याह—

नियमहेत्वभावाद्यथादर्शनमभ्यनुज्ञा ।३।२।११।

उपचयापचयप्रबन्धदर्शनेन यद्यपि क्वचिच्छरीरादावल्पकालसंबन्धित्वं दृष्टं तथापि पाषाणप्रभृतिषूपचयापचयप्रबन्धदर्शनाभावेन तद्व्याप्तमल्पकालसंबन्धित्वं व्यापकनिवृत्त्या निवर्तत इति सत्त्वस्यापि तत्रापि वर्तमानत्वेनानैकान्तिकत्वेन सर्वत्राल्पकालसंबन्धित्वसाधकस्य नियमहेतोरभावात् क्वचिदल्प-

कालसंबन्धित्वं क्वचिद्बहुकालसंबन्धित्वमिति यथादर्शनं यथाप्रमाणमभ्यनुज्ञा न्यायेनेति सूत्रार्थः ।३।२।११।

अथ द्वितीयः कल्पो विवक्षित इति चेत्—

नोत्पत्तिविनाशकारणानुपलब्धेः ।३।२।१२।

उत्पत्तिकारणं तावदवयवोपचयः, विनाशकारणमवयवापचयः, तदुभयमवस्थितवस्तुविषयत्वात् पूर्वापरभागरहितकालक्षणमात्रं क्षणिकत्वमुपलक्ष्यते न हेतुना। सर्वभावानां क्षणिकत्वमेवं साधयति सत्त्वमर्थक्रियाकारित्वं भावस्य। तच्च क्रमाक्रमाभ्यां व्याप्तं प्रकारान्तरस्यासम्वात्। तौ च क्रमाक्रमौ स्थिरेषु न सम्भवतः। समर्थस्य क्षेपासंभवेन क्रमाभावादसमर्थस्य तेन प्रयोजनासम्भवात् कृतसकलकार्यस्य द्वितीयादिक्षणेष्वप्रसङ्गाच्च।

न च क्रमाक्रमवत्सहकारिसमवधानवशात् भावस्य क्रमाक्रमाभ्यां व्याप्तमर्थक्रियाकारित्वं वाच्यम्। सहकारिणा भावस्यातिशयसाधनस्यैव कारणत्वेन भावस्याकारणत्वप्रसङ्गात्। अनतिशयाधाने त्वनुपकारिण्यपेक्षाविरह इति सहकारित्वस्यैवासम्भवात्। तस्मात् क्रमाक्रमाभ्यां व्याप्तमर्थक्रियाकारित्वलक्षणं सत्त्वं तयोर्व्यापकयोरनुपलब्ध्या स्थिरेभ्यो व्यावर्तमानः क्षणिकात्मतयाऽवतिष्ठत इति तस्यापीदमेवोत्तरम्। **नोत्पत्तिविनाशकारणानुपलब्धेः।** निरन्वयात्पूर्वोत्पादने निरन्वयविनाशे च यत्कारणं प्रमाणमर्थक्रियाकारित्वलक्ष[ण]त्वं सत्त्वमुक्तं तस्यानुपलब्धेः। सापेक्षत्वानपेक्षत्वाभ्यां व्याप्तस्य तस्य तयोर्व्यापकयोरनुपलब्ध्या क्षणिकेष्वनुपलब्धेः। तथाहि क्षणिको हि भावः सापेक्षो वार्थक्रियां करोति निरपेक्षो वा ? न तावत्सापेक्षः, अपेक्षायाः स्थायिधर्मत्वेन क्षणिकेष्वसम्भवात्। नापि निरपेक्षः, कृष्यादिपरिकर्मनिरपेक्षात् कुसूलनिहितादपि बीजादंकुरादिकार्योत्पत्तिप्रसङ्गात्। न च परिकर्मसापेक्षस्य बीजस्याङ्कुरजननसामर्थ्यं न कुसूलनिहितस्येति वाच्यम्। निरपेक्षत्वहानिप्रसङ्गात्।

न च निरपेक्षत्वेऽपि स्वकारणपरम्परालब्धजन्मनां देवानामुपनतानामवनिपवनपाथःप्रभृतीनामज्ञत्वेनान्यतरविरत्यभावात् समर्थबीजक्षणोत्पत्तौ सान्निध्यमिति वाच्यम्। कृषीवलादेः ज्ञत्वेन विरतिसम्भवेन सान्निध्यप्रसङ्गात्। न च स्वोत्पत्तावन्त्यस्य बीजक्षणस्यान्यसापेक्षत्वं न पुनः स्वकार्यं इति वाच्यम्। उत्पद्यमानस्यान्यस्य समर्थबीजक्षणस्य स्वकारणबीजक्षणव्यतिरिक्तं तत्समानकालसलिलादिक्षणापेक्षत्वे नानाकारणजन्यस्य कार्यस्य नानात्वेनैकरूप्यबीजक्षणस्याभावप्रसङ्गात्। तत्कारणस्य बीजक्षणस्य स्वसमानकालवस्त्वन्तरापेक्षस्य तदुत्पादकत्वेन सापेक्षत्वात् क्षणिकत्वहानिप्रसङ्गः। न चोपादानसहकारितया कृतं कार्यंरूपवैषम्यं तद्भेदस्यैव शाक्यमतेऽशक्यनिरूपणत्वात्। तदेवं सापेक्षत्वानपेक्षत्वयोः व्यापकयोरनुपलब्ध्या.................सत्त्वहेतोः व्यावृत्तिर-

साधारणत्वम् । किञ्च क्वचिदक्षणिकानभ्युपगमे सत्त्वहेतोस्तस्माद्व्यावृत्तिरशक्य-निरूपणेति तत्सत्त्वसिद्धेर्हेतोरनैकान्तिकत्वम् । न च कल्पितस्थैर्यस्य रूपादेर्विपक्षत्वं, तन्मूलानुमानस्य काल्पनिकत्वेन क्षणिकत्वस्यापि काल्पनिकत्वापत्तेः ।

न च सहकारिणातिशयाधाने भावस्यान्यत्वं, धर्मधर्मिणोर्भेदाभ्युपगमेन धर्मोत्पादेऽपि धर्मिणस्तादवस्थ्यात् । नाप्यतिप्रसङ्गः, कल्प्यत्वाविशेषेऽपि कश्चि-देव कस्यचिद्धर्म इति व्याप्यव्यापकभाव इव प्रमाणसिद्धत्वात् । तस्मात् स्थिरस्य भावस्य क्रमवत्सहकारिसमवधानवशात् क्रमेण तत्तत्कार्यजनकत्वं गत्यन्तराभावा-दभ्युपगन्तव्यं सर्वैरिति ।

नापि कृतकभावस्य विनाशस्य ध्रुवभावित्वेन निर्हेतुकत्वात् क्षणिकत्व सिद्धिः । ध्रुवभावित्वस्य सहेतुकायां कलापादिसंततावपि सम्भवेनानैकान्ति कत्वात् । तस्मात् निरन्वयविनाशात् पूर्वोत्पादलक्षणक्षणिकत्वसाधनानां सत्त्वादि-हेतूनां प्रमाणत्वेनानुपलब्धेः न पूर्वापरकालरहितकालमात्रसंबन्धित्वं क्षणिकत्व-मिति द्वितीयः कल्पः सम्भवतीति सूत्रार्थः ।३।२।१२।

स्फटिकस्योत्पत्तिविनाशकारणानुपलब्धेः नोत्पत्तिविनाशाविति यदुक्तं पूर्वसूत्रेण तदयुक्तमित्याह—

क्षीरविनाशकारणानुपलब्धिवत् दध्युत्पत्तिवच्च तदुत्पत्तिः ।३।२।१३।

यथा क्षीरस्य विनाशानुपलम्भेऽपि नाशो, दध्नश्चोत्पत्तिकारणानुपलम्भेऽपि तदुत्पादोऽभ्युपगम्यते । तथा स्फटिकस्य प्रतिक्षणमुत्पादविनाशौ तत्कारणानु-पलम्भेऽप्यभ्युपगन्तव्याविति सूत्रार्थः ।३।२।१३।

अत्र कश्चित्परिहारमाह—

न पयसः परिणामो गुणान्तरप्रादुर्भावात् ।३।२।१४।

विनाशोत्पत्तिकारणानुपलम्भेऽपि क्षीरदध्नोर्विनाशोत्पादौ भवत इत्येतन्न । कस्मात् ? पयसः परिणामो गुणान्तरप्रादुर्भावात् पयो दधि भवतीत्यत्र न पयो द्रव्यविनाशः । किं तर्हि परिणामः । कः पुनः परिणामः ? पूर्वधर्मतिरोधानेन धर्मा-न्तरप्रादुर्भावः । पूर्वगुणनिवृत्तौ गुणान्तरप्रादुर्भावो वा । उभयत्रापि द्रव्यविनाशो-त्पत्त्यसम्भवात् कारणानुपलम्भेऽपि पयो द्रव्यं विनश्यति दध्युत्पद्यत इति यदुक्तं तन्नेति सूत्रार्थः ।३।२।१४।

सिद्धान्त्याह—

क्वचिद्विनाशकारणानुपलब्धेः क्वचिच्चोपलब्धेरनेकान्तः ।३।२।१५।

विनाशकारणानुपलब्धेरित्युपलक्षणं कारणानुपलब्धेरपि द्रष्टव्यम् । ततश्च विनाशोत्पत्तिकारणानुपलब्धेर्हेतोः क्वचित् क्षीरदध्नोर्विनाशोत्पादकयोरुपलब्धेः क्वचित् तस्मिन्नेव हेतौ सत्यपि घटादौ प्रतिक्षणविनाशोत्पादकयोरनुपलब्धेः हेतोरनैकान्तिकत्वात् । किमनुपलभ्यमानकारणकक्षीरदधिविनाशोत्पादवत् स्फटिकादिव्यक्तीनां विनाशोत्पादौ स्याताम् । आहोस्विदनुपलभ्यमानकारणककुम्भादिप्रतिक्षणविनाशोत्पादाभाववद्विनाशोत्पादौ न स्यातामित्ययमर्थोऽनेकान्तः ।

यदि संदिग्धोऽयमर्थः तर्हि भवदभिलषितमक्षणिकत्वं न स्फटिकादीनां सिद्धयतीत्याशङ्क्याह—योऽत्र साधकस्तस्याभ्यनुज्ञानादप्रतिषेधः । अत्र क्षणिके दधिवत् कुम्भवच्चेति दृष्टान्तद्वये यो दृष्टान्तः साधकः प्रमाणाविरुद्धत्वेन निषेद्धुमशक्यः । तस्य कुम्भादेरनुज्ञानात् स्फटिकादीनामक्षणिकत्वस्य प्रतिषेधः अविवादसिद्धेषु घटशरावादिषु विनाशोत्पादयोर्नियमेन सकारणत्वदर्शनात् । यत्र तयोः कारणं नोपलभ्यते, तत्र तौ न भवत इति प्रतिक्षणविनाशोत्पादयोः कारणं नोपलभ्यते । तत्र तौ न भवत इति प्रतिक्षणविनाशोत्पादयोः कारणाभावेन घटादिष्विवाभावात्, अबाधितप्रत्यभिज्ञया स्थिरत्वग्रहणाच्च । तस्यैव दृष्टान्तस्य साधकत्वादभ्यनुज्ञेयत्वं न पयोदृष्टान्तस्य तयोरुत्पादविनाशदर्शनेनैवाद्योत्पादविनाशवत् सकारणकत्वस्यानुमानप्रसिद्धत्वेन तत्कारणानुपलब्धेरसिद्धत्वात् । सत्कार्यवादानभ्युपगमेन परिणामवादप्रतिषेधाच्च । तस्मादक्षणिकाः पदार्थाः । नापि नित्या बुद्धिः किं तर्हि अनित्या, उपलब्ध्यादिपर्यायशब्दवाच्येति सूत्रार्थः ।३।२।१५।

अनित्यत्वे तस्य चाक्षुषप्रत्यक्षत्वेन बुद्धेर्गुणत्वे सिद्धे कस्यायं गुण इति चिन्तयितुं संशयमाह—

[1]सन्निकर्षोत्पत्तेः संशयः ।३।२।१६।

आत्मेन्द्रियमनोऽर्थानां सन्निकर्षादुत्पद्यमाना बुद्धिः किमात्मगुणः किं वेन्द्रियाणामाहोस्विदर्थानाम् अथ मनस इति विशेषादर्शनेन संशयो भवतीति सूत्रार्थः ।३।२।१६।

[बुद्धेरात्मगुणत्वप्रकरणम्]

आत्मे[ज्ञानमि]न्द्रियाणामर्थानां वा गुणो न भवतीत्याह—

१—एतत् सूत्रं न्यायसूचीनिबन्धादौ प्रामाणिकग्रन्थेषु च नोपलभ्यते ।

नेन्द्रियार्थयोस्तद्विनाशेऽपि ज्ञानावस्थानात् ।३।२।१७।

इन्द्रियार्थयोर्न ज्ञानं गुणः । कस्मात्, तद्विनाशेऽपि ज्ञानावस्थात् तयोरिन्द्रियार्थयोः विनाशेऽप्यद्राक्षमिति स्मरणज्ञानस्यावस्थानात् । यदि तयोः ज्ञातृत्वं तदा ज्ञात्रोस्तयोरभावे तदाश्रयज्ञानस्य वावस्थानं न स्यात् । दृश्यते चावस्थानम् । तस्मान्न तद्गुणः स्मृतिज्ञानं तद्दृष्टान्तेन ज्ञानान्तरमपि न तद्गुण इति सूत्रार्थः ।३।२।१७।

अस्तु तर्हि मनो गुणो ज्ञानमित्याशङ्क्याह—

युगपज्ज्ञेयानुपलब्धेश्च न मनसः ।३।२।१८।

युगपज्ज्ञेयानुपलब्धेर्हेतोर्यदनुमितं करणत्वेन न तस्य मनसो गुणो ज्ञानम् । तस्य ज्ञातृत्वेन करणत्वहानिप्रसङ्गादिति सूत्रार्थः ।३।२।१८।

कस्य तर्हि गुण इत्यत आह—

[1]ज्ञस्य वशित्वात् ।३।२।१९।

जानातीति ज्ञः आत्मा, तस्य गुणो ज्ञानम् । कुतः, वशित्वात् । वशी ज्ञाता अवश्यं करणम् । तद्गुणत्वे तस्य करणभावनिवृत्तिः स्यादिति वशिनः स्वतन्त्रस्यात्मनो गुण इति सूत्रार्थः ।३।२।१९।

आत्मगुणत्वे हेत्वन्तरमाह—

[2]युगपज्ज्ञेयोपलब्धेश्च ।३।२।२०।

योगी खलु ऋद्धौ प्रादुर्भूतायां विकरणधर्मा सेन्द्रियाणि देहान्तराणि निर्माय युगपज्ज्ञेयान्युपलभत इति दृष्टम् । तच्चैतद्विभौ ज्ञातर्युपपद्यते, नाणौ मनसीति योगिनो युगपज्ज्ञेयोपलब्धेश्च हेतोः विभुनो ज्ञानं गुण इति सूत्रार्थः ।३।२।२०।

ननु विभुत्वेऽन्तःकरणस्य युगपदुपलब्धिदोषप्रसङ्गादणुत्वमभ्युपगन्तव्यम् । स चात्मनो विभुत्वेऽपि समान इति युगपज्ज्ञेयोपलब्धिः योगिनो न स्यादित्याह—

तदात्मगुणत्वेऽपि तुल्यम् ।३।२।२१।

तस्य विभुत्वस्यात्मगुणत्वेऽपि युगपदिन्द्रियसंबन्धेन पर्यायसंबन्धाभावाद् युगपदुपलब्धिलक्षणं तुल्यमित्यात्मनोऽप्यणुत्वप्रसङ्गात् । युगपज्ज्ञेयोपलब्धिर्योगिनो न स्यादिति सूत्रार्थः ।३।२।२१।

१, २—एषा भाष्यपंक्तिरिह सूत्रतया परिगृहीता ।

परिहरति—

[1]सन्निकर्षाभावात्तदनुत्पत्तिः ।३।२।२२।

तस्या अनुत्पत्तिः युगपज्ज्ञेयोपलब्धेरनुत्पत्तिः । ततश्चात्मनोऽणुत्वप्रसङ्गा-भावात् विकरणधर्मत्वमणो विभुत्वेन कदाचिद्युगपज्ज्ञेयोपलब्धिश्च सम्भवतीति सूत्रार्थः ।३।२।२२।

आत्मेन्द्रियार्थसन्निकर्षमेव ज्ञानोत्पत्तौ कारणं नात्ममनः सन्निकर्ष इति चेत्तत्राह—

नोत्पत्तिकारणानपदेशात् ।३।२।२३।

यद्यात्ममनःसन्निकर्षो न कारणं तदात्मेन्द्रियार्थसन्निकर्षमात्रात् ज्ञानमुत्पद्यते, ओमिति चेन्न उत्पत्तिकारणानपदेशात् । तावन्मात्रादुत्पद्यत इत्यत्र कारणं प्रमाणं नापदिश्यते । तस्मात् कारणानपदेशाच्छरीराद्बहिरपि ज्ञानोत्पादप्रसङ्गाच्चात्ममनः सन्निकर्षोऽपि कारणमित्यर्थः ।३।२।२३।

बुद्धेरात्मगुणत्वे पूर्वदोषमाह—

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ।३।२।२४।

कारणविनाशाद्विरोधिगुणप्रादुर्भावाच्च गुणानां विनाशो भवति तदुभयमत्र नास्तीति विनाशकारणानुपलब्धेरवस्थाने तन्नित्यत्वप्रसङ्गः । तस्य……… दोषः प्रसङ्गदोष इति सूत्रार्थः ।३।२।२४।

परिहरति—

अनित्यत्वग्रहणात् बुद्धेर्बुद्ध्यन्तरविनाशः शब्दवत् ।३।२।२५।

बुद्ध्यन्तरनित्यत्वस्य साधितत्वात् सर्वैर्गृह्यमाणत्वाच्च बुद्ध्यन्तरविरोधः उत्तरोत्तरबुद्ध्या पूर्वपूर्वबुद्धेः विनाशः शब्दवत् । अन्त्यायास्तु बुद्धेरदृष्टक्षयाद्विनाश इति सूत्रार्थः ।३।२।२५।

मनसः सन्निकर्षस्य कारणस्यायौगपद्यात् युगपज्ज्ञेयानुपलब्धिरात्मनस्तर्हि यत्र कारणस्य संस्कारस्य यौगपद्यमस्ति तत्र स्मृतिज्ञानानि युगपदुत्पद्येरन्नित्याशङ्क्यैकदेशिमतेन परिहारमाह—

ज्ञानसमवेतात्मप्रदेशसन्निकर्षान्मनसः स्मृत्युपपत्तेः न युगपदुत्पत्तिः ।३।२।२६।

ज्ञायतेऽनेन स्मर्यमाणोऽर्थ इति ज्ञानं संस्कारः । तेन समवेतैरात्मदेशैः

१—इन्द्रियैर्मनसः इत्यधिकपाठः न्यायसूची निबन्धादौ दृश्यते ।

सन्निकर्षात् स्मृत्युपपत्तेर्न युगपत्स्मृतीनामुत्पत्तिस्तत्संस्कारसमवाय्यात्मप्रदेशानामनेकत्वेनान्तःकरणस्यायौगपद्यादिति सूत्रार्थः ।३।२।२६।

तदेकदेशिमतं दूषयति—

नान्तःशरीरवृत्तित्वान्मनसः ।३।२।२७।

मनसोऽन्तः शरीरं वृत्तित्वाद्यावत्प्रायणं शरीरमनस्सन्निकर्षात् तत्तत्स्मृत्यादिकार्योत्पत्तेः शरीराद्बहिर्ज्ञानसंस्कृतैरात्मप्रदेशैः सन्निकर्षाभावात् तत्संयोगपर्यायेण पर्यायोत्पत्तिः स्मृतीनामिति सूत्रार्थः ।३।२।२७।

चोदयति—

साध्यत्वादहेतुः ।३।२।२८।

शरीरमनस्सन्निकर्षस्यैव कार्योत्पादकत्वं नेतरस्येत्यस्य साध्यत्वादन्तश्शरीरवृत्तित्वमहेतुरिति सूत्रार्थः ।३।२।२८।

परिहरति—

स्मरतः शरीरधारणोपपत्तेरप्रतिषेधः ।३।२।२९।

यदि बहिर्विनिःसृत्य ज्ञानसंस्कृतैरात्मप्रदेशैः संयुज्य स्मृतिमुत्पादयति मनस्तर्हि स्मरतः पुरुषस्य धारकप्रयत्नाभावाच्छरीरधारणं न स्यात् । दृश्यते च शरीरधारणम् । तस्माच्छरीरधारणोपपत्तेर्मनसोऽन्तः शरीरत्वस्याप्रतिषेध इति सूत्रार्थः ।३।२।२९।

पुनश्चोदयति—

न तदाशुगतित्वात्[1] ।३।२।३०।

तस्य मनस आशुगतित्वात् बहिर्विनिःसृत्य कृतकार्यस्य द्रुतमागम्य धारकप्रयत्नोत्पादकत्वमुत्पाद्य वा गमनमिति स्मरतः शरीरधारणोपपत्तिर्नेति सूत्रार्थः ।३।२।३०।

परिहरति—

न स्मरणकालानियमात् ।३।२।३१।

किञ्चित्क्षिप्रं स्मर्यते किञ्चिच्चिरेण । यदा चिरेण तदा द्रुतागमनस्याभावात् शरीरधारणं न स्यात् । शरीरसंबन्धनिरपेक्षात्ममनस्सन्निकर्षस्य ज्ञानोत्पा-

१—मनसः इत्यधिक पाठोऽन्यत्र प्रामाणिकग्रन्थेषूपलभ्यते ।

दकत्वे तद्वैयर्थ्यञ्च स्यात्। तस्मात् कारणकालानियमान्न तदाशुगतित्वेन शरीरधारणमुपपद्यत इति सूत्रार्थः।३।२।३१।

तदेवं स्वमतेन शरीराद्बहिर्गमनं मनसः प्रतिषिद्धय तस्यैवैकदेशिमतेन प्रतिषेधमाह—

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ।३।२।३२।

न तावदात्मप्रेरणेनान्यार्थस्य स्मृतिहेतुसंस्कारोऽमुष्मिन्नात्मप्रदेशे समवेतस्तेन मनः संयुज्यतामित्यात्मप्रेरणेन तस्यार्थस्य स्मृतत्वेन स्मर्तव्यत्वाभावात्। नापि यदृच्छया सुस्मूर्षया मनः प्रणिधानस्य स्मृतिदर्शनेन यादृच्छिकत्वासंभवात्। न ज्ञतया मनसि ज्ञातृत्वस्य प्रतिषेधात्। तस्मादात्मप्रेरणयदृच्छाज्ञतानामहेतुत्वाद्गत्यन्तराभावाच्च न बहिः संयोगः सम्भवतीति सूत्रार्थः।३।२।३२।

तदेकदेशिमतं दूषयति—

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ।३।२।३३।

क्वचिद्दृश्ये व्यासक्तमनसः पुरुषस्यादृष्टया शर्करया कण्टकेन वा पादव्यथनहेतुः संयोगविशेषो भवति। सुखदुःखसंवेदनयोर्दृष्टत्वात्। न चात्मात्र प्रेरणादीति सम्भवति। अथ चास्ति संयोगविशेष इति देहाद्बहिरपि तद्वदेव स्यात्। अदृष्टवशादन्तःसंबन्ध इत्येतत् बहिरपि समानस्तस्माद्व्यासक्तमनसां पादव्यथनेन संयोगविशेषेण समानत्वान्न बहिर्गमनस्यायं परिहार इति पूर्व एव परिहारो न्याय्य इति सूत्रार्थः।३।२।३३।

ज्ञानसमवेतात्मप्रदेशसन्निकर्षादित्ययं स्मृतियौगपद्यप्रतिषेधे न हेतुः। कस्तर्हि हेतुरित्याशङ्क्याह—

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ।३।२।३४।

न केवलाः संस्काराः स्मृतिहेतवः किं तर्हि प्रणिधानलिङ्गादिज्ञानान्यपि। अतस्तेषामयुगपद्भावादयुगपद्भावः स्मृतीनाम्। न च प्रणिधानादिनिरपेक्षं स्मार्तमुपपद्यत इति वाच्यम्, तस्यानभ्युपगमात्। न चात्मनो निष्प्रदेशत्वेन सर्वसंस्काराणामेकदेशत्वान्मनः सन्निकर्षपर्यायाभावः संस्काराणां शब्दवद्बाह्यकरणसन्निधानापेक्षया व्यावृत्तित्वेन पर्यायसंबन्धसम्भवात् प्रणिधानादि सापेक्षस्य मनस्सन्निकर्षस्यायौगपद्यादन्तःकरणस्य युगपदनेकक्रियानिवृत्तौ सामर्थ्याभावाच्च युगपदस्मरणमिति सूत्रार्थः।३।२।३४।

चैतन्यमात्मन इच्छाद्वेषादयस्त्वन्तःकरणस्येति बुद्धिसमानाश्रयत्वमिच्छाद्वेषप्रयत्नादीनां सांख्या नानुमन्यन्ते तन्निराकरणार्थमाह—

ज्ञस्येच्छाद्वेषनिमित्तत्वादारम्भनिवृत्त्योः ।३।२।३५।

सुखसाधनं ज्ञात्वा तदिच्छया तदवाप्तये प्रवृत्तिरारम्भः। दुःखसाधनं ज्ञात्वा तद्द्वेषात्तत्परिहारायान्यत्र प्रवृत्तिर्निवृत्तिः। तयोरारम्भनिवृत्त्योरिच्छाद्वेषनिमित्तत्वादिच्छाद्वेषयोश्च ज्ञानमूलत्वात् ज्ञानादीनां भिन्नाश्रयत्वेऽतिप्रसङ्गात् बुद्धिसमानाश्रयत्वेन ज्ञस्य पुरुषस्यैवेच्छाद्वेषादयो नान्तःकरणस्येति सूत्रार्थः।३।२।३५।

यद्येकाधिकरणत्वेन पुरुषस्यैवैते इतीष्यते तर्ह्येकशरीराधिकरणत्वेनाप्येकाधिकरणत्वं सिद्ध्यतीति भूतचैतन्यं प्रसक्तमित्याह—

तल्लिङ्गत्वादिच्छाद्वेषयोः पार्थिवाद्येष्वप्रतिषेधः ।३।२।३६।

तै आरम्भनिवृत्ती लिङ्गे ययोरिच्छाद्वेषयोस्तौ तल्लिङ्गौ तयोर्भावस्तत्त्वम् तस्मात् तल्लिङ्गत्वात् प्रवृत्तिनिवृत्त्योः शरीरे दृष्टत्वात्तत्कारणयोरिच्छाद्वेषयोस्तन्मूलायाः बुद्धेरपि तदधिकरणत्वं भिन्नाधिकरणत्वेऽतिप्रसङ्गादिति पार्थिवाद्येषु चैतन्यादीनामप्रतिषेध इति सूत्रार्थः।३।२।३६।

परिहरति—

[1]नियमानियमौ तु तद्विशेषकौ ।३।२।३७।

प्रवृत्तिनिवृत्त्योः प्रयोज्यैकविषयत्वं **नियमो**ऽ**नियम**स्तदभावः तौ नियतानियतयोः भूतचैतन्याभूतचैतन्ययोः **विशेषकौ** भेदकावचेतनेषु परश्वादिषु प्रयोज्यत्वेनोभयवादिसिद्धेषु प्रवृत्तिनिवृत्त्योर्नियमेन दर्शनात्। प्रवृत्तिनिवृत्तिमतः शरीरस्यापि तद्दृष्टान्तेन प्रयोज्यत्वनिश्चयादज्ञत्वं परश्वादिवदेवमंशक्तिवत् ज्ञत्वे वावयवचैतन्यप्रसङ्गात् कार्यद्रव्यविशेषगुणानां कारणगुणपूर्वकत्वेन शरीरारम्भकेषु परमाणुषु चैतन्याभ्युपगमे प्रत्ययव्यवस्थानुमानाभावाच्च शरीरस्याज्ञत्वेन प्रवृत्तिनिवृत्त्योः बुद्धिरविनाभावात्तत्समानाश्रयत्वेन भूतचैतन्यप्रसङ्गो नेति सूत्रार्थः।३।२।३७।

मनसस्तर्हि चैतन्यं भविष्यति। तदेकत्वेनैकाधिकरणत्वसम्भवादवयवचैतन्यादिदोषप्रसङ्गाभावाच्चेत्यत आह—

यथोक्तहेतुत्वात् पारतन्त्र्यात् स्वकृताभ्यागमाच्च न मनसः ।३।२।३८।

यथोक्तहेतुत्वाद्दर्शनस्पर्शनाभ्यामेकार्थग्रहणादित्येवमादीनामात्मप्रतिसन्धातृत्वसाधकानां हेतुत्वस्याप्रतिषेधान्मनसस्तु कारणत्वेन पारतन्त्र्यात् स्वकर्मणः

१—इतः पूर्वं सूत्रमेकं परश्वादिष्वारम्भनिवृत्तिदर्शनात् इति प्रामाणिकग्रन्थेषूपलभ्यते नेह च तद् दृश्यते।

फलं स्वस्मिन्नेव गमिष्यतीति स्वकृताभ्यागमाच्चात्मन एव कर्तृत्वभोक्तृत्वसिद्धेः न मनसश्चैतन्यं सम्भवतीति सूत्रार्थः ।३।२।३८।

कस्य तर्हि चैतन्यमित्याह—

परिशेषाद्यथोक्तहेतूपपत्तेश्च ।३।२।३९।

आत्मनः प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्यमाणे संप्रत्ययस्तस्मात् परिशेषात् पृथिव्याद्याश्रयत्वेन प्रसक्तस्य चैतन्यस्य प्रतिषेधादन्यस्य तदाश्रयस्याभावाद्दर्शनस्पर्शनाभ्यामित्येवमादिभिर्यथोक्तहेतुभिरात्मन उपपत्तेः प्रमाणसिद्धत्वाच्चात्मन एव चैतन्यं सम्भवतीति सूत्रार्थः ।३।२।३९।

स्मरणं त्वात्मनो ज्ञस्वाभाव्यात् ।३।२।४०।

× × ×

प्रणिधानादिना ज्ञानानां युगपद्भावाद्युगपदस्मरणमित्युक्तं तदिदानीं दर्शयदि—

प्रणिधाननिबन्धनाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसंबन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ।३।२।४१।

प्रणिधानमवधानम्, निबन्धनमर्थानामेकग्रन्थोपनिबन्धः, अभ्यासो ज्ञानावृत्तिः, लिङ्गमविनाभूतं । लक्षणं चिह्नं, सादृश्यमन्योन्यस्वरूपता, परिग्रहः स्वस्वामिसंबन्धः, आश्रयः रक्षकः, आश्रितो रक्ष्यः, सम्बन्धः शिष्योपाध्यायाद्यनुरक्तसंबन्धविशेषः, आनन्तर्यं क्रमनिर्दिष्टेषु पौर्वापर्यं, वियोगो विरहः, एककार्यं बहूनामेकार्थकरणत्वं, विरोधः [विजिगीषमाणयोरन्यतरदर्शनेनान्यतरस्मरणम्] अतिशयोऽपूर्वगुणप्राप्तिः, प्राप्तिः अभिलषितार्थसंभावना, व्यवधानं नियतावधारणं, सुखमनुकूलवेदनीयम्, दुःखं प्रतिकूलवेदनीयम्, इच्छा स्नेहः, द्वेषः प्रज्वलनात्मकः, भयं दुःखहेतुसन्निपातकृतो विकारः, अर्थित्वमाच्छादनादिद्रव्याकांक्षित्वं, क्रिया कार्यं, रागः कामिन्यासक्तिः, धर्मोऽभ्युदयसाधनःअधर्मस्तु विपरीतसाधनः तदेतेभ्यो निमित्तेभ्यः स्मृतिर्भवतीति तेषामयुगपद्भवितुमर्हतीति सूत्रार्थः ।३।२।४१।

[बुद्धेरुत्पन्नापवर्गित्वप्रकरणम्]

तदेवं बुद्धेरात्मगुणत्वमनित्यत्वञ्च प्रसाध्य तत्र विशेषचिन्तार्थं संशयमाह—

उत्पन्नापवर्गित्वात्[1] ।३।२।४२।

कालान्तरावस्थायित्वाच्चानित्यानां संशयो विद्युदादिषु नित्यानामुत्पन्नापवर्गित्वं दृष्टं कुम्भादिषु कालान्तरावस्थायित्वम्, ततश्चानित्यत्वसामान्यधर्मदर्शनात् किमुत्पन्नापवर्गिणी बुद्धिराहोस्वित् कालान्तरावस्थायिनीति संशयो भवतीति सूत्रार्थः ।३।२।४२।

उत्पन्नापवर्गिणीत्याह—

कर्मानवस्थायिग्रहणात् ।३।२।४३।

कर्मणोऽनवस्थायिनो ग्रहणादनवस्थायिनी बुद्धिः सिद्धेति कुम्भादिष्वपि बुद्धिरनवस्थायिनी बुद्धित्वात् कर्मबुद्धिवत् । व्यवहिते प्रत्यक्षत्वनिवृत्तिदर्शनादिति सत्रार्थः ।३।२।४३।

चोदयति—

अव्यक्तग्रहणमनवस्थायित्वाद्विद्युत्संपाते रूपाव्यक्तग्रहणवत् ।३।२।४४।

अनवस्थायिन्यापि विद्युता प्रकाश्यमानानां घटादीनां यथा रूपस्याव्यक्तस्य ग्रहणमिति सूत्रार्थः ।३।२।४४।

परिहरति—

[2]न प्रदीपार्चिः सन्तत्यभिव्यक्तिग्रहणवत्तद्ग्रहणम् ।३।२।४५।

अनवस्थायित्वेऽपि यथा प्रदीपार्चिषां सन्तत्या वर्तमानानां तद्ग्राहिणीनां च बुद्धीनामनवस्थायित्वेऽप्यभिव्यक्तिग्रहणं दृष्टं तद्वत् बुद्धेरनवस्थायित्वेऽपि घटादीनामभिव्यक्तिग्रहणं सम्भवति । तथा विद्युत्संपाताव्यक्तग्रहणवचने बुद्धेरनवस्थायित्वाभ्युपगमात्सर्वस्यापि ग्रहणस्य विषये व्यक्तत्वाच्चानवस्थायित्वेनोत्पन्नापवर्गिणी बुद्धिरिति सूत्रार्थः ।३।२।४५।

[बुद्धेः शरीरगुणव्यतिरेकप्रकरणम्]

भूतेन्द्रियमनसां चैतन्यप्रतिषेधेनार्थाच्छरीरचैतन्यं प्रतिषिद्धमपि तत्त्वनिश्चयार्थपरतया विप्रतिषेद्धुं संशयमाह—

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता ।

२—इतः पूर्वं सूत्रमेकं हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा इति वर्ततेऽन्यत्र ।

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ।३।२।४६।

द्रव्ये पाथसि स्वगुणो द्रवत्वमुपलभ्यते परगुणश्चोष्णतोपलभ्यते । न च शरीरे चैतन्यं तत्किं शरीरगुणः किंवाऽन्यगुण इति तत्रोपलभ्यमानत्वाविशेषादर्शनसन्निहितत्वात् संशयो भवतीति सूत्रार्थः ।३।२।४६।

शरीरगुणश्चेतन इत्याह—

यावच्छरीरभावित्वाद्रूपादीनाम् ।३।२।४७।

ये शरीरविशेषगुणा रूपादयस्ते यावच्छरीरभाविनो दृष्टाश्चेतनापि चेच्छरीरविशेषगुणस्तयापि यावच्छरीरभाविन्या भवितव्यं न त्वेतदस्ति । तद्रहितस्यावस्थानदर्शनात् । नापि संयोगादिवत् सामान्यगुणः । तस्याः स्वसमवेतविशेषणविशिष्टत्वे सति स्वाश्रयैकजातीयावच्छेदकत्वेन विशेषगुणत्वात् तस्माच्छरीरगुणवैधर्म्यान्न शरीरगुणश्चेतनेति सूत्रार्थः ।३।२।४७।

ननु पार्थिवे द्रव्ये श्यामादेः विशेषगुणस्य यावद्द्रव्यभावित्वं दृष्टं तथा चेतनाया अपि भविष्यतीत्याशङ्क्याह—

न पाकजगुणान्तरोत्पत्तेः ।३।२।४८।

यद्यप्यौष्ण्यापेक्षादग्निसंयोगात् घटाद्यामद्रव्यस्य श्यामादेर्गुणस्य निवृत्तिस्तथापि तादृशादग्निसंयोगात् पूर्वरूपादिप्रध्वंसापेक्षात् पाकजस्य रक्तादेर्गुणान्तरस्योत्पत्तेः न रूपादिहीनं कार्यलक्षणं वा परमाणुलक्षणं वा द्रव्यं कदाचिदभ्युपलभ्यते । शरीरे तु न तथा चेतनांशे तत्समानजातीयगुणान्तरमुपलभ्यते तद्रहितस्यैव शरीरस्य दाहावस्थानात् । तस्मात्पाकजगुणान्तरोत्पत्तेः न श्यामादिगुणस्यायावद्द्रव्यभावित्वं सम्भवतीति सूत्रार्थः ।३।२।४८।

इतोऽपि श्यामादिवैषम्यमित्याह—

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ।३।२।४९।

पाकजानां रक्तादीनां गुणानामुत्पत्तौ तत्प्रतिद्वन्द्विनां श्यामादीनां निवर्तमानानां सिद्धेः सहानवस्थानविरोधेनायावद्द्रव्यभावित्वं तेषु सम्भवति । नत्वेवं चेतनायाः प्रतिद्वन्द्वित्वेन निवर्त्यत्वं रक्तादिस्थानीयस्य निवर्तकस्याभावात् । अचेतनत्वस्याभावत्वेनागुणत्वात् । तस्मात् पाकजानामप्रतिद्वन्द्वित्वेनैव श्यामादेरयावद्द्रव्यभावित्वे सिद्धे तद्विधर्मिणि चैतन्ये प्रसक्तस्य यावद्द्रव्यभावित्वस्याप्रतिषेध इति सूत्रार्थः ।३।२।४९।

इतोऽपि न शरीरगुण इत्याह—

शरीरव्यापित्वात् ।३।२।५०।

अविशेषात् शरीरावयवा अपि चेतना इति चैतन्यस्य शरीरव्यापित्वात् प्रत्यवस्थानानुमा न स्यात् । अनेकचेतनसंघातत्वाच्छरीरस्येति सूत्रार्थः ।३।२।५०।

चोदयति—

न केशनखादिष्वनुपलब्धेः ।३।२।५१।

केशनखादिशरीरावयवेषु चैतन्यानुपलब्धेस्तद्दृष्टान्तेनावयवान्तरेष्वपि न चैतन्यं सम्भवतीति प्रत्ययव्यवस्थाया न विरोध इति सूत्रार्थः ।३।२।५१।

परिहरति--

त्वक्पर्यन्तत्वाच्छरीरस्य केशनखादिष्वप्रसङ्गः ।३।२।५२।

इन्द्रियाश्रयः शरीरमिति शरीरलक्षणेन शरीरस्य त्वक्पर्यन्तत्वात् केशनखादीनां संयोगादिद्रव्यत्वेन शरीरावयवसिद्धेस्तेषु चैतन्यस्य प्रसङ्ग एव नास्ति । तद्दृष्टान्तेनावयवान्तराणामचैतन्यस्य साधनमसङ्गतमिति सूत्रार्थः ।३।२।५२।

इतश्च न शरीरगुण इत्याह—

शरीरगुणवैधर्म्यात् ।३।२।५३।

ये हि शरीरगुणास्ते बाह्यकरणप्रत्यक्षा वा [अतीन्द्रिया वा । विधान्तरं तु चेतना ।] तस्याः स्वसंवेद्यत्वेनान्तःकरणप्रत्यक्षत्वात् तस्याः शरीरगुणत्ववैधर्म्यात् न शरीरगुणश्चेतनेति सूत्रार्थः ।३।२।५३।

चोदयति—

न रूपादीनामितरेतरवैधर्म्यात् ।३।२।५४।

यथा रूपादीनामितरेतरवैधर्म्येऽपि चेतनायाः शरीरगुणत्वहानिर्नेति सूत्रार्थः ।३।२।५४।

परिहरति—

ऐन्द्रियकत्वाद्रूपादीनामप्रतिषेधः ।३।२।५५।

रूपरसादिभेदेनेतरेतरवैधर्म्येऽपि रूपादीनामैन्द्रियकत्वात् बाह्येन्द्रियग्राह्यत्वस्याव्यभिचारेण प्रत्यक्षस्य शरीरगुणबाह्येन्द्रियग्राह्यत्वस्यावश्यंभावित्वात्

चेतनायाः शरीरगुणत्वप्रतिषेधकस्य शरीरगुणवैधर्म्यादिति हेतोरप्रतिषेध इति सूत्रार्थः ।३।२।५५।

[मनः परीक्षाप्रकरणम्]

इदानीमवसरप्राप्तं मनः परीक्षमाणः प्रथमं तावत्तस्य प्रतिशरीरमेकत्वे हेतुमाह—

ज्ञानायौगपद्यादेकं मनः ।३।२।५६।

यद्यनेकमेकस्मिन् देहे मनः, तदा मनसस्तस्य तेन तेनेन्द्रियेण संवन्धादिन्द्रियान्तरग्राह्येषु रूपरसादिषु प्रत्ययपर्यायो न स्यात्। दृश्यते च प्रत्ययपर्यायस्तस्मात् प्रत्ययपर्यायिलक्षणात् ज्ञानायौगपद्यात् प्रतिशरीरमेकं मन इति सूत्रार्थः ।३।२।५६।

चोदयति—

न युगपदनेकक्रियोपलब्धेः ।३।२।५७।

एकस्याध्येतुः पुरुषस्य गमनमध्ययनं कमण्डलुधारणं मार्गनिरीक्षणं वनगजशब्दग्रहणमित्याद्यनेकक्रियायाः युगपदुपलब्धेः प्रत्ययपर्यायो नेति सूत्रार्थः ।३।२।५७।

परिहरति—

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात् ।३।२।५८।

यथालातस्य भ्रमतो विद्यमानः क्रमो नोपलभ्यत इत्यविच्छेदबुद्ध्यैकत्वदर्शनं तथा तस्याः क्रियाया अयौगपद्येऽपि युगपदुपलब्धिर्भ्रान्त्या भवति। तस्मादाशुसञ्चारान्मनसो द्रुतगतित्वेन क्रमग्रहणस्याशक्यत्वात् युगपदुपलब्धेः सर्वत्र विप्रतिपन्नत्वेनाविवादसिद्धदृष्टान्ताभावात्। अयुगपदुपलब्धेस्तु क्वचिदुभयवादिसिद्धदृष्टान्तत्वेनान्यत्रापि शक्यसाधनत्वाद्युगपदुपलब्धिरसिद्धेति सूत्रार्थः ।३।२।५८।

अणुत्वमतएव सिद्ध्यतीत्याह—

यथोक्तहेतुत्वाच्चाणु ।३।२।५९।

यथोक्तो हेतुर्यस्य तद्यथोक्तहेतुः। तस्य भावस्तत्त्वं तस्माद्यथोक्तहेतुत्वात् ज्ञानायौगपद्यादणु च मन इति सूत्रार्थः ।३।२।५९।

[शरीरस्यादृष्टनिष्पाद्यत्वप्रकरणम्]

इदानीं मनःसंबन्धिशरीरोत्पत्तिविचारमुखेन मनो विचारयंस्तत्र संशयमाह—

[1]विप्रतिपत्तेः संशयः ।३।२।६०।

कर्मनिरपेक्षैर्भूतैः शरीरमारभ्यत इति केचित् । ततश्चाचार्यविप्रतिपत्तेः समीपस्थस्य कर्मसापेक्षा वा अकर्मनिमित्ता वा शरीरोत्पत्तिरिति संशयो भवतीति सूत्रार्थः ।३।२।६०।

तत्र कर्मसापेक्षेति पक्षः प्रेक्षावद्भिः पक्षीकर्तव्य इत्याह—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ।३।२।६१।

पूर्वशरीरोपार्जिता वाक्बुद्धिशरीरारम्भलक्षणा प्रवृत्तिः, पूर्वकृतं तस्य फलं, धर्माधर्मलक्षणं कर्म, तस्यानुबन्ध आत्मसमवेतत्वेनावस्थानं तस्मात् पूर्वकृतफलानुबन्धात्तदुत्पत्तिः तस्य शरीरस्योत्पत्तिः । पुरुषगुणविशेषप्रेरितभूतैरारब्धं पुरुषार्थक्रियासमर्थं रथादि दृष्ट्वा शरीरमपि पुरुषगुणविशेषप्रेरितभूतैरारब्धं पुरुषार्थक्रियासमर्थत्वाद्रथादिवदिति पूर्वकृतफलानुबन्धात् प्रयोजकात्तस्य शरीरोत्पत्तिरित्यनुमातव्येति सूत्रार्थः ।३।२।६१।

चोदयति—

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ।३।२।६२।

मूर्तिशब्देन मूर्तमुच्यते भूतेभ्यः पृथिव्यादिभ्यो मूर्तानां पाषाणशर्कराप्रभृतीनां पुरुषार्थक्रियासमर्थानां यथोपादानं तथा कर्मनिरपेक्षैर्भूतैस्तस्य शरीरस्योपादानं भविष्यतीति पूर्वसूत्रोक्तसाधनमनैकान्तिकमिति सूत्रतात्पर्यार्थः ।३।२।६२।

नानैकान्तिकत्वमित्याह—

[2]साध्यसमत्वाद्यथाशरीरोत्पत्तेः ।३।२।६३।

कर्मसापेक्षत्वं साध्यं तथा पाषाणादीनामपि कर्मनिरपेक्षत्वं साध्यमिति न तैर्व्यभिचारः सम्भवति । तेषामपि साध्यसमानधर्मत्वेन सपक्षत्वात्तद्विप्रतिपत्तौ वा पक्षत्वादिति सूत्रार्थः ।३।२।६३।

१—भाष्यपंक्तिरियं सूत्रतयेह परिगणिता ।

२—न साध्यसमत्वात् इति प्रामाणिकं सूत्रमन्यत्रोपलभ्यते ।

कर्मनिरपेक्षत्वे पाषाणादिसर्गस्य न तत्साधर्म्यं शरीरसर्गस्य सम्भवतीत्याह—

नोत्पत्तिनिमित्तत्वान्मातापित्रोः ।३।२।६४।

मातापितृशब्देन शुक्रशोणितयोरभिधानं शुक्रशोणितयोर्बीजभूतयोः शरीरोत्पत्तिनिमित्तत्वात् कर्मसापेक्षा शरीरोत्पत्तिः शुक्रशोणितकार्यत्वात्। यत्कर्मसापेक्षं न भवति तच्छुक्रशोणितकार्यमपि न भवति। यथा पाषाणादीति वैधर्म्येणापि कर्मसापेक्षत्वं सिद्धयतीति नातीव साधर्म्यमारम्भणीयमिति सूत्रार्थः ।३।२।६४।

तथाहारस्य ।३।२।६५।

अशितपीताद्याहारस्य मातृशरीरे निविशमानस्य प्रनाड्या गर्भोपचयत्वेन शरीरोत्पत्तिनिमित्तत्वात् पाषाणादिषु तदभावात् कर्मसापेक्षत्वं वैधर्म्यानुमानेन पूर्ववत् सिद्धयतीति सूत्रार्थः ।३।२।६५।

प्राप्तौ चानियमात् ।३।२।६६।

प्राप्तिर्दम्पत्योः संयोगस्तस्यानियमः प्राप्तिमात्रस्य गर्भशरीरानुत्पादकत्वम्। यदि कर्मनिरपेक्षा शरीरोत्पत्तिः, तदा प्राप्तिमात्रस्य तदुत्पादकत्वं स्यान्नत्वेतदस्ति। तस्मात् प्राप्तौ चानियमादविनाभूतमात्रकार्या शरीरोत्पत्तिरिति सूत्रार्थः ।३।२।६६।

यदि कर्मसापेक्षा शरीरोत्पत्तिः, तस्य कर्मणस्तस्यात्मनः संयोगजत्वात्सन्निकर्षस्य सर्वात्मनां साधारण्यात् तदुत्पाद्यस्य कर्मसापेक्षस्य शरीरस्यापि साधारण्यं प्रसज्यत इत्याशंक्याह—

शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ।३।२।६७।

शरीरोत्पत्तौ यथा कर्म निमित्तं भवति तथा संयोगोत्पत्तावपि निमित्तम्। न चानयोरितरेतराश्रयत्वं पूर्वपूर्वकर्मापेक्षायां पूर्वपूर्वसंयोगोत्पत्तेरनादित्वेन तदभावात्। न च कर्मणोऽपि साधारणत्वं तस्य सुखदुःखोत्पत्तिव्यवस्थया व्यवस्थितपुरुषभोगाधिष्ठानशरीरव्यापारसापेक्षकारणजन्यत्वेन साधारणत्वात्। तस्मान्न शरीरसंयोगादीनां सर्वात्मसाधारण्येनातिप्रसङ्ग इति सूत्रार्थः ।३।२।६७।

एतेनानियमः प्रत्युक्तः ।३।२।६८।

एतेन कर्मसापेक्षोत्पत्तिपक्षव्यवस्थाकथनेन तन्निरपेक्षोत्पत्तिपक्षे योऽयमनियमः प्रतिपुरुषं शरीराव्यवस्था तया प्रत्युक्तो निराकृत इति सूत्रार्थः ।३।२।६८।

न केवलं कर्मनिमित्ते शरीरसंसर्गे व्यवस्थानाभाव एव दोषः। किं तर्हि मोक्षोऽपि तस्मिन् पक्षे न स्यादिति दर्शयितुं स्वपक्षे मोक्षोपपत्तिमाह—

[1]उपपन्नश्च तद्वियोगः कर्मक्षयोपपत्तेः ।३।२।६९।

तस्य शरीरस्य वियोग आत्यन्तिको विनाश उपपन्नश्चास्मिन् पक्षे। कस्मात् कर्मक्षयोपपत्तेः कर्मणामागतानां च समाधिबलादेकीकृत्योपभोगेन च क्षयस्योत्पत्तिविनाशलक्षणस्य यथायोगमुपपत्तेः। न चेदृशः शरीरवियोगः कर्मनिरपेक्षपक्षे सम्भवति। तदारम्भकस्य पृथिव्यादेर्भूतमात्रस्य सार्वकालीनत्वादिति सूत्रार्थः ।३।२।६९।

इदानीं सांख्यमतमुपन्यस्य निरस्यति—

तददृष्टकारितमिति चेत्पुनस्तत्प्रसङ्गोऽपवर्गे ।३।२।७०।

तच्छरीरमदृष्टकारितमदृष्टमदर्शनं प्रकृतिपुरुषविवेकादर्शनकारितमिति चेन्नैतद्युक्तं पुनस्तत्प्रसङ्गोऽपवर्गे। यतः सर्गादौ प्रकृतिपुरुषविवेकप्रागभाव इवापवर्गसमयेऽपि तत्प्रध्वंसाभावोऽस्ति। न चानयोर्दर्शनत्वे कश्चिद्विशेषोऽस्तीति पुनस्तस्य शरीरस्य प्रसङ्गोऽपवर्गे स्यात्। ततश्च संसारानुच्छेद इति सूत्रार्थः ।३।२।७०।

ये तु जरन्तो जैनाः परमाणुमनोगुणमदृष्टं वर्णयित्वा स्वकादेवादृष्टात् परमाणवः परस्परं संयुज्य शरीरमारभन्ते मनश्च स्वकादेवादृष्टात्तस्य प्रविश्य तस्य जीवसंयोगमनुभवतीति मेनिरे तेषामपि मोक्षावस्थायां शरीरमनःसंयोगस्याप्युच्छेद इति संसाराभावो नेत्याह—

मनः कर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः ।३।२।७१।

मनः कर्मनिमित्वान्मनोऽदृष्टनिमित्तत्वान्मनसः प्रवेशस्य चकारात् परमाणुकर्मनिमित्तत्वात्परमाणूनां परस्परसंयोगस्य शरीरारम्भकस्य तस्य च परमाणुगतस्य तद्गतरूपादिगुणान्तरवदपवर्गावस्थायां व्यवस्थानात्संयोगाव्युच्छेदः आत्मनि शरीरसंयोगस्य तदवच्छिन्नजीवाख्यमनः संयोगस्य चाव्युच्छेदः वियोगाभावस्ततश्च मनःसंसारानुच्छेद इति सूत्रार्थः ।३।२।७१।

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ।३।२।७२।

अपि चात्मगतादृष्टनिरपेक्षत्वे शरीरारम्भकसंयोगस्य तदवच्छिन्नात्ममनःसंयोगस्य च तादवस्थ्येन प्रायणाभावान्नित्यत्वप्रसङ्गः। स्वभावतस्तु

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता।

प्रायणे प्रायणभेदो न स्यात्। तस्मात् प्रायणानुपपत्तेस्तन्नित्यत्वप्रसङ्गः शरीरस्यानवस्थानप्रसङ्ग इति सूत्रार्थः ।३।२।७२।

चोदयति—

अणुश्यामतानित्यत्ववत् स्यात् ।३।२।७३।

यथाणौ श्यामताऽकारणिकाप्यनित्या दृष्टा तथा शरीरारम्भकपरमाणुगतस्यादृष्टस्याकारणस्यानित्यता स्यात्। ततश्च शरीरस्याप्यनित्यत्वं स्वकारणादृष्टवशात् सिद्ध्यतीति प्रायणोपपत्तिरिति सूत्रार्थः ।३।२।७३।

परिहरति—

नाकृताभ्यागमप्रसङ्गात् ।३।२।७४।

अकृतस्यासमीचीनकृतस्याप्रामाणिकस्याभ्युपगमोऽभ्यागमः। तस्य प्रसङ्गस्तस्मात् अकृताभ्यागमप्रसङ्गादिति। परमाणुश्यामतायाः पार्थिवरूपत्वेन लोहितादिरूपवत् पाकजत्वेन सकारणत्वादकारणविनाशस्य नासौ दृष्टान्तः साध्यविकलत्वादिति। परमाणुगतस्यादृष्टस्याकारणकस्य विनाशाभ्युपगमो प्रामाणिकार्थाभ्युपगम इति प्रसक्तम्। अथवा परमाणुगतरूपादिवत्तद्गतादृष्टस्यापि नित्यत्वेन केनचिदकृतत्वादकृतस्य कर्मणः फलं पुरुषेणोपभुज्यत इत्यकृताभ्यागमप्रसङ्गस्तस्मादुभयविधाकृताभ्यागमप्रसङ्गात् पूर्वसूत्रार्थो नेति सूत्रार्थः ।३।२।७४।

आत्मा शरीरं करणं तदर्थो
बुद्धिर्मनश्चेति पदार्थषट्कम् ॥
प्रमेयसूत्रात्क्रमशोऽमुष्य
विचारितं सूत्रकृताऽत्र सूत्रैः ॥

इति भट्टवागीश्वरविरचितायां न्यायसूत्रतात्पर्यदीपिकायां
तृतीयाध्यायः समाप्तः।

चतुर्थोऽध्यायः ।

प्रथमाह्निकम् ।

[प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्]

अथ मनःपरीक्षानन्तरमुद्देशक्रमानुरोधेन प्रवृत्तिः परीक्षितुं युक्ता। सा कस्मान्न परीक्षितेत्यत आह सूत्रकारः—

प्रवृत्तिर्यथोक्ता ।४।१।१।

प्रवृत्तिर्यथालक्षिता तथा परीक्षिता। प्रवृत्तिर्द्विविधा कारणरूपा कार्यरूपा वा। तत्र कारणरूपा वाग्बुद्धिशरीरारम्भलक्षणा विंशतिप्रकारभिन्ना[1] स्पष्टैव। कार्यरूपा तु धर्माधर्मसमाख्यातैव। तस्याः पुनः संसारहेतुत्वं पूर्वकृते-त्यादिना ३।२।६०। अपवर्गहेतुत्वम् दुःखेत्यादिना।१।१।२। प्रायणादिदर्शना-दनित्यत्वं कार्यत्वे सत्यात्मसमवायात् तद्गुणत्वमित्यादि सर्वं धर्माधर्माश्रय-परीक्षयैवामीषां बहु परीक्षितमिति न पृथक् परीक्षति सूत्रार्थः।४।१।१।

प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह—

तथा दोषाः ।४।१।२।

बुद्धिसमानाश्रयत्वेनात्मगुणत्वाद्वीतरागजन्मादर्शनेना[ना]दित्वान्मिथ्या-ज्ञाननिवृत्त्या निवर्तनात् कार्यप्रवृत्तितुल्यदोषाः। अतस्तत्परीक्षयैवामीषां बहु परीक्षितमिति सूत्रार्थः।४।१।२।

[दोषत्रैराश्यपरीक्षाप्रकरणम्]

ननु प्रवर्तनालक्षणा दोषा[१।१।१८]इति दोषाणां लक्षणमुक्तम्। तदयुक्तं मानादिष्वपि सम्भवेनातिव्यापकत्वादित्यत आह—

१—तुलनीया प्रवृत्तिलक्षणसूत्रवार्त्तिकम्

"सेयं प्रवृत्तिः प्रत्येकं दशविधा पुण्या पापा च। पुण्या कायेन परित्राणं परिचरणं दानम्। वाचा सत्यं हितं प्रियं स्वाध्यायश्च। मनसा दया अस्पृहा श्रद्धा चेति। विपर्ययेण पापा दशविधैव"। न्या० सू०।१।१।१७।

तत्त्रैराश्यं रागद्वेषमोहार्थान्तरभावात् ।४।१।३।

तेषां दोषाणां **त्रयो राशयः** पक्षाः रागपक्षः, द्वेषपक्षः, मोहपक्ष इति। तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्ष इति। मोहपक्षो मिथ्याज्ञानं विचिकित्सा मानं प्रमाद इति। कुत एतत्? **रागद्वेषमोहार्थान्तरभावात्** सक्तिलक्षणो रागः, ज्वलनात्मको द्वेषः मिथ्याप्रवृत्तिलक्षणो मोह इति। आन्तर्गणिकलक्षणापेक्षया भेदोपपत्तेरिति। एवञ्च मानादीनामपि लक्ष्यत्वेन संग्रहात् न दोषलक्षणस्यातिव्यापकत्वेनापि त्रित्वविरोधः। [न च सामान्यमेकत्वे कारणम्, तथा च सामान्यस्यैवाभावः स्यात्। तस्मात्] सामान्यलक्षणयैकत्वेऽप्यवान्तरभेदविवक्षया त्रित्वोपपत्तेरिति सूत्रार्थः ।४।१।३।

एकेनैकप्रत्यनीकभावात् ।४।१।४।

नार्थान्तरं रागादयः। कस्मात्? **एकप्रत्यनीकभावात्**। **एकेन** तत्त्वज्ञानेन विरुद्धयमानत्वात्। एकसंयोगेन विरुद्धयमानविभागवत् नानेकत्वमिति सूत्रार्थः ।४।१।४।

परिहरति—

व्यभिचारादहेतुः ।४।१।५।

एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधित्वात्। न चामीषामेकत्वमित्यनैकान्तिकत्वेन व्यभिचारादेकं यत्प्रत्यनीकं [तत्]रागादीनामेकत्वे न हेतुरिति सूत्रार्थः ।४।१।५।

एकप्रत्यनीकभावोऽन्यथासिद्ध इत्याह—

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ।४।१।६।

तेषां दोषाणां मध्ये रागमोहयोः मोहः पापीयान्। कुतः? **नामूढस्येतरोत्पत्तेः**, अमूढस्येतरोत्पत्तिर्न भवतीति यतः। ततश्च मोहनिदानत्वात् रागद्वेषयोस्तत्त्वज्ञानात्तन्निवृत्तौ तयोरपि निवृत्तिरित्येका प्रत्यनीकभावोपपत्तिः। न पुनरेकत्वादित्येकप्रत्यनीकत्वमन्यथासिद्धमिति सूत्रार्थः ।४।१।६।

मोहस्य दोषान्तर्भावमसहमानः प्रत्यवतिष्ठते—

निमित्तनैमित्तिक[1]निर्देशान्मोहार्थान्तरभावो दोषेभ्यः ।४।१।७।

नामूढस्येतरोत्पत्तिरित्यत्र मोहस्य निमित्तत्वं रागद्वेषयोश्च तज्जन्यत्वेन नैमित्तिकत्वमिति निमित्तनैमित्तिकनिर्देशान्मोहस्य दोषेभ्योऽर्थान्तरभावः । पृथक्त्वेनादोषत्वं तन्निमित्तत्वाद्रूपादिवदिति सूत्रार्थः ।४।१।७।

परिहरति—

न दोषलक्षणावरोधान्मोहस्य ।४।१।८।

नात्र निमित्तनैमित्तिकभावेन पदार्थानां तज्जातीयत्वमतज्जातीयत्वं वा सिद्ध्यति, किन्तु लक्षणस्याभेदात् । दोषलक्षणं च मोहेऽस्तीति मोहस्य दोषत्वेन दोषनिमित्तत्वं साधयतीति सूत्रार्थः ।४।१।८।

हेतोरनैकान्तिकत्वमप्याह—

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ।४।१।९।

तुल्यजातीयानामपि बुद्ध्यादीनां निमित्तनैमित्तिकभावोपपत्तेः हेतोरनैकान्तिकत्वेन मोहादर्थान्तरस्याप्रतिषेध इति सूत्रार्थः ।४।१।९।

[प्रेत्यभावपरीक्षाप्रकरणम्]

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ।४।१।१०।

उत्पादोच्छेदौ प्रेत्यभावौ न चात्मनो नित्यस्य तौ न [?]स्तः । तस्मादस्पन्दनेन युक्तः प्रेत्यभावः । वैनाशिकानान्तु दर्शनसत्त्वोत्पत्तिः । पूर्वाभ्यस्तसूत्रेण [३।१।१९।] आत्मनित्यत्वस्य व्यवस्थापनात् । सत्त्वोत्पादोच्छेदपक्षे च कृतनाशाकृताभ्यागमदोषप्रसङ्गात् । देहेन्द्रियबुद्धिवेदनासम्बन्धोत्पादविनाशौ नित्यस्याप्यात्मनो जन्मप्रायणे । तथा च तादृशप्रेत्यभावोऽस्मद्दर्शन एवोपपद्यते न भवद्दर्शन इति सिद्धान्तः । ४।१।१०।

प्रेत्यभाव इत्यत्र भावनप्रायणयोः समानकर्तृत्वाभिधानेन स्पष्ट एवेति मन्वानः सूत्रकारः शरीरादीनामुत्पत्तिप्रकारं विचारयति—

व्यक्ताद्व्यक्तानामुत्पत्तिः प्रत्यक्षप्रामाण्यात् ।४।१।११।

किं धर्मकात् कारणादिदं शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यत इति चेत् व्यक्तादिति । किं पुनर्व्यक्तमुपलब्धिलक्षणप्राप्तं रूपादिवद् द्रव्यं तत्सामान्या-

---

१—°'क भावादर्थान्तरभावो' इति प्रथितः पाठः ।

द्रूपादिगुणयोगात् परमाणुलक्षणं पृथिव्यादिकारणमपि व्यक्तमुच्यते। तस्मात्परमाणुलक्षणात् कारणादिदं शरीरेन्द्रियमहाभूतादि व्यक्तमुत्पद्यते। कस्मात्? **प्रत्यक्षप्रामाण्यात्**। दृष्टा हि रूपादिगुणप्रयुक्तेभ्यो मृत्प्रभृतिभ्यः कारणेभ्यस्तथाभूतस्य द्रव्यस्योत्पत्तिर्दृष्टेन चादृष्टस्य कारणभावोऽनुमीयत इति सूत्रार्थः।४।१।११।

चोदयति—

न घटाद् घटानिष्पत्तेः।४।१।१२।

घटात् व्यक्तात् **घटस्य** व्यक्तस्यानिष्पत्तेः निष्पत्त्यभावाद्व्यक्ताद्व्यक्तस्योत्पत्तिरित्येतन्नेति सूत्रार्थः।४।१।१२।

परिहरति—

व्यक्ताद्घटनिष्पत्तेरप्रतिषेधः।४।१।१३।

यद्यपि सर्वं व्यक्तं सर्वस्य व्यक्तस्य न कारणम्। तथापि यदुत्पद्यते व्यक्तं तद्व्यक्तादेव। ततश्च व्यक्तस्य व्यक्तहेतुत्वप्रतिषेधो नेति सूत्रार्थः।४।१।१३।

[शून्यतोपादानप्रकरणम्]

तदेवं स्वाभिमतं तत्त्वं निरूप्य पराभिमतदर्शनान्युपन्यस्यति—

अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्।४।१।१४।

विश्वं हि शून्यताया एव जायते। कस्मात्? **नानुपमृद्य प्रादुर्भावात्** कारणमनुपमृद्य कार्यं न भवति। यथा दृष्टा हि कारणोपमर्दन कार्यस्योत्पत्तिः वीजाङ्कुरादौ तथान्यत्रापीत्यसदुपादानमपि विश्वमिति सूत्रार्थः।४।१।१४।

दूषयति—

न [1]विनष्टेभ्योऽनिष्पत्तेः।४।१।१५।

बीजादिकारणविनाशश्चदङ्कुरादिकार्योत्पत्तिहेतुस्तर्हि विनष्टे बीजादौ कारणे तदवयवेषु परस्परविच्छिन्नेष्वसति तेषां व्यूहान्तरे कस्मादङ्कुरादिकार्यं न भवति। तस्माद्विनष्टेभ्योऽङ्कुराद्यनुत्पत्तेरसति व्यूहान्तरे न बीजादिविनाशः कारणम् अङ्कुरादिकार्यस्य। नाप्युपमर्द्योपमर्दकभावः सम्भवति, व्याघातात्। तस्माद्दृष्टान्तत्वेनासदुपादानं विश्वमित्युक्तमिति सूत्रार्थः।४।१।१५।

१—एतत्सूत्रात् पूर्वमिह न्यायसूचीनिबन्धे न्यायसूत्रोद्धारे चोपलभ्यते सूत्रद्वयं 'व्याघातादप्रयोगः'। 'नातीतानागतयोः कारकशब्दप्रयोगात्'। एतयोः सूत्रयोरिह वृत्तौ नास्ति समावेशः।

कारणविनाशस्य कार्यात् प्राक्कालवर्तित्वं चान्यथासिद्धमित्याह—

क्रमनिर्देशान्न प्रतिषेधः ।४।१।१६।

पूर्वं विनाशः पश्चादङ्कुरोत्पत्तिरिति क्रमस्य विनाशोत्पत्त्योः पौर्वापर्यनियमस्य विद्यमानत्वाभावः कारणमिष्यते तर्हि तस्मादेव क्रमनिर्देशादस्मन्मतस्याप्रतिषेधः। पूर्वं व्यूहान्तरं पश्चात्कार्यान्तिरोत्पत्तिरिति। न चावृत्ते पूर्वव्यूहेऽवयवानां शक्यं व्यूहान्तरेण भवितुमिति, विनाशस्य प्राक्कालवर्तित्वम्। तस्मादन्यथासिद्धपौर्वापर्यनियमात् व्यूहान्तरस्य कार्यजनकत्वं न विनाशस्य। तस्यान्यथा सिद्धत्वात्। तथा च सदुपादानमेवेदं विश्वमिति सूत्रार्थः ।४।१।१६।

[ईश्वरोपादानताप्रकरणम्]

अथापर इदानीमाह—

ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात् ।४।१।१७।

ईश्वरो ब्रह्म ईशनाशक्तियोगात्, ज्ञानशक्ति[: क्रियाशक्ति]श्चेशना सा चास्ति ब्रह्मणीति ब्रह्मेश्वरः कारणं जगतः। परिणामो वा तद्विवर्तो वा प्रपञ्च इति। ननु चेतनाशक्तियोगात् तत्कर्मनिबन्धनोऽयं प्रपञ्चो भविष्यतीति कृतमत्रेश्वरेण [इति]। अत उक्तम् पुरुषकर्माफल्यदर्शनात्, पुरुषश्चेत् चेतयते नैष [चेतयेन्नैवं] निष्फलं कर्मारभेत, निष्फलं तु विद्वान् प्रवर्तमानः कथं चेतनो नाम। तस्मात्पुरुषकर्माफल्यदर्शनेन चेतनाशक्त्यभावात् न जीवकर्मनिबन्धनं जगत्, अपि तु ब्रह्मेश्वर कारणं जगदिति सूत्रार्थः ।४।१।१७।

दूषयति—

न पुरुषकर्माभावे फलानिष्पत्तेः ।४।१।१८।

यद्यपि ब्रह्मेश्वरस्येशनायोगस्तथापि न तत्परिणामोऽयं नामरूपप्रपञ्चः। सर्वात्मना परिणामपक्षे तत्त्वविघातात् [अनित्यत्वम् एकदेशेन पारणामे] सांशत्वेऽनित्यत्वप्रसङ्गात्। नापि तद्विवर्तः विभागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य ब्रह्मणः सत्त्वरूपाग्रहणासामान्यान्निबन्धनविपरीतज्ञानगोचरत्वासम्भवेनाविद्योपधानभेदाभावात्। तस्मान्न ब्रह्मेश्वरोपादानं जगत्। किं तर्हि तन्निमित्तं संवेदनापेक्षं कारणमित्युच्यते। न चैतद्युक्तम्। कस्मात्? पुरुषकर्माभावे फलानिष्पत्तेः। निरपेक्षेश्वराधीना चेत् फलनिष्पत्तिः पुरुषस्य समीहामन्तरेणापि फलं निष्पद्येत। न चैतद् दृष्टमिष्टं वा। तस्मान्न निरस्यते ।४।१।१८।

स्वाभिमतेश्वरनिराकरणे च नायं हेतुरित्याह—

तत्कारितत्वादहेतुः ।४।१।१९।

परमाणूपादानस्य हि जगतः पुरुषकर्म तदपीश्वरनिमित्तमेव। न च यदपेक्षते तस्यानिमित्तत्वं पर्यायिकर्तृत्वाभ्युपगमात्। नापि पर्यायिकर्तृत्वे सत्यकर्तृत्वमदर्शनात्। न चान्यकार्याकर्तृत्वमनादित्वात्।

ननु तथाभूतेश्वरनिमित्तत्वे किं प्रमाणमिति चेदनुमानम्। तथाहि विवादाध्यासितास्तरुगिरिसागरादयः स्वोपादानाद्यभिज्ञकर्तृका उत्पत्तिमत्त्वात् यदुत्पत्तिमत् तत्सर्वं स्वोपादानाद्यभिज्ञकर्तृकम्। यथा प्रासादादि। तथा च विवादाध्यासितास्तरुगिरिसागरादयस्तस्मात्तथेति। तदेवमीश्वरादेव कारितत्वात् पुरुषकारस्य, तत्सहाय ईश्वरो निमित्तकारणं परमाणूपादानस्य जगत इत्यस्य पक्षस्य निराकरणे पुरुषकर्माभावे फलानिष्पत्तेरित्यहेतुः। निरपेक्षेश्वरनिमित्तत्वनिराकरणे हेतुरेवेति सूत्रार्थः ।४।१।१९।

[आकस्मिकत्वप्रकरणम्]

पर इदानीमाह—

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् ।४।१।२०।

यथा कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चित्रतेत्यादि निर्निमित्तं संस्थानभेदवच्च दृष्टम्। तथा शरीरादेर्भावस्योत्पत्तिरनिमित्ता। तस्मात् संस्थानभेदस्य तत्रापि विद्यमानत्वादिति सूत्रार्थः ।४।१।२०।

अत्रादृश्यमाननिमित्तानां शरीरादिकण्टकादीनां पक्षनिक्षेपात् पक्षेण व्यभिचारानुद्भावने वा सर्वानुमानोच्छेदप्रसङ्गात्, सर्वत्र तस्य सुलभत्वात्। घटादिदृष्टान्तेन संस्थानवत्त्वाच्छरीरादीनां निर्निमित्तानुमानमिति राद्धान्तः। कर्मनिमित्तः शरीरसर्ग इत्यस्य प्रतिषेधात् सूचित इति मन्वानः **सूत्रकारो** मतान्तरेण परिहारमाह—

अनिमित्तनिमित्तत्वान्नानिमित्ततः ।४।१।२१।

अनिमित्ततो भावोत्पत्तिरित्युच्यते। यतश्चोत्पत्तिस्तन्निमित्तमनिमित्तस्य निमित्तत्वान्नानिमित्ता भावोत्पत्तिः, किन्तु सनिमित्तेति सूत्रार्थः ।४।१।२१।

तदेतद्दूषयति—

निमित्तानिमित्तयोरर्थान्तरभावादप्रतिषेधः ।४।१।२२।

अन्यन्निमित्तमन्यच्च प्रत्याख्यातम् । तथाहि **निमित्तमि**त्यर्थान्तराभ्यनुज्ञा **अनिमित्तमिति** तस्य प्रतिषेधः । न चानुज्ञाप्रतिषेधयोरेकत्वं युक्तम् । यथानुदकः कमण्डलुरिति नोदकप्रतिषेधयोरेकत्वं भवति । तस्मान्निमित्तानिमित्तयोरर्थान्तर-भावात्पूर्वोक्तप्रतिषेधो नेति सूत्रार्थः ।४।१।२२।

[सर्वानित्यत्वनिराकरणप्रकरणम्]

अन्ये तु मन्यन्ते—

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात् ।४।१।२३।

भौतिकमभौतिकं शरीरादि बुद्ध्यादि सकलमनित्यम् । तस्मादुत्पत्ति-विनाशधर्मकत्वात् पूर्वापरकालयोरभावात् मध्ये च भावादिति सूत्रार्थः ।४।१।२३।

तत्रोत्पत्तिविनाशधर्मकत्वस्य हेतोरनुपसंहार्यत्वात् व्यापकत्वेऽतिस्फुट ………इति मन्वानः सूत्रकारः प्रथमं तावत् परोक्तदूषणमाह—

नानित्यतानित्यत्वात् ।४।१।२४।

सर्वमनित्यमिति ब्रुवाणः प्रष्टव्यः किं सर्वस्यानित्यता नित्या, आहोस्विद-नित्या ? यदि तावन्नित्या न तर्हि सर्वमनित्यम् । अथानित्या अनित्यताया अभावात् सर्वमनित्यमिति व्याहतो हेतुरिति सूत्रार्थः ।४।१।२४।

तदेतद्दूषयति—

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत् ।४।१।२५।

यथाग्निर्दाह्यं विनाश्यानुविनश्यति । एवं सर्वस्यानित्यता सर्वं विनाश्या-नुविनश्यतीति सूत्रार्थः ।४।१।२५।

इदानीं परमसिद्धान्तमाह—

नित्यस्याप्रत्याख्यानं यथोपलब्धिव्यवस्थानात् ।४।१।२६।

अयं खलु वादो नित्यं प्रत्याचष्टे । नित्यस्य प्रत्याख्यानमनुपपन्नम् । कस्माद् ? **यथोपलब्धिव्यवस्थानात्** । यस्योत्पत्तिविनाशधर्मकत्वमुपपद्यते प्रमाण-

तस्तदनित्यम्। यथा घटादि। यस्य नोपपद्यते तन्नित्यम्। यथाकाश-परमाण्वादि। नह्युत्पत्तिविनाशधर्मकत्वमाकाशादेरुपलभ्यते प्रमाणतः। तस्माद्यथोपलब्धिव्यवस्थानात् किञ्चिन्नित्यं किञ्चिदनित्यमिति सूत्रार्थः ।४।१।२६।

[सर्वनित्यत्वनिराकरणप्रकरणम्]

अयमन्य एकान्तः—

सर्वं नित्यं पञ्चभूतनित्यत्वात् ।४।१।२७।

पञ्च भूतात्मकं गोघटादिकार्यजातमखिलमुपलभ्यते, व्यपदिशन्ति मृद्घटो मृच्छरीरमिति लौकिकाः। भूतानि च नित्यानि, तेषामुच्छेदस्य नैयायिकैरनभ्युपगमात्। तेन तदात्मकानां गोघटादीनामपि नित्यतेति सूत्रार्थः ।४।१।२७।

परिहरति—

नोत्पत्तिविनाशकारणोपलब्धेः ।४।१।२८।

भूतेभ्यो भौतिकानि। नहि परमसूक्ष्मा परमाणव एव गोघटादयः। परमाणुवत् तेषामप्यतीन्द्रियत्वेन सर्वाग्रहणप्रसङ्गात्। तस्माद्ग्रहणाग्रहणलक्षण-विरुद्धधर्मयोगादन्ये भौतिका भूतेभ्यः। तथा च तेषामुत्पत्तिविनाशकारणोपलब्धेर्नित्यत्वं भूतनित्यत्वमिति सूत्रार्थः ।४।१।२८।

पुनरपि नित्यत्वमाशङ्कते—

तल्लक्षणावरोधादप्रतिषेधः ।४।१।२९।

तेषामुत्पत्तिविनाशकारणमुपलभ्यत इति मन्यसे न तेऽपि भूतलक्षण विलक्षणा गृह्यन्ते भूतलक्षणावरोधाद् भूतात्मका इत्यमीषां नित्यत्वस्याप्रतिषेध इति सूत्रार्थः ।४।१।२९।

परिहरति—

नोत्पत्तिकारणोपलब्धेः ।४।१।३०।

कारणसमानगुणस्य कार्यस्योपलब्धिरुत्पत्तिः। उत्पत्तिश्च तत्कारणश्चोत्पत्तिकारणे तयोरुपलब्धेरुत्पत्तिकारणोपलब्धेः। यस्मात् कारणेन समानगुणस्य कार्यस्योत्पद्यमानस्य तत्कारणस्य चोपलब्धिरस्ति प्रामाणिकी। किं तस्मात् ? तयोरुपलब्ध्योः भूतादन्यस्य भौतिकस्य भूतानुमापकस्य विद्यमानत्वेन तल्लक्षणावरोधस्यान्यथाप्युपपत्त्या भूतात्मकत्वस्यासिद्धेः कर्मादिष्वव्यापनाच्च हेतोर्न सर्वनित्यत्वं सिद्ध्यतीति सूत्रार्थः ।४।१।३०।

[सर्वपृथक्त्वनिराकरणप्रकरणम्]

अयमप्यपर एकान्तः —

[1]सर्वं पृथक् भावलक्षणपृथक्त्वात् ।४।१।३१।

सर्वं नाना न कश्चिदेकोऽस्ति भावः। कस्मात्? **भावलक्षणपृथक्त्वात्** भावो लक्ष्यतेऽनेनेति **भावलक्षणस्य** समाख्याशब्दस्य **पृथक्त्वादनेकार्थाभिधायित्वात्** सर्वं नानार्थाभिधायकशब्दवाच्यत्वात्सेनावदिति सूत्रार्थः ।४।१।३१।

दूषयति—

नानेकलक्षणैरेकभावनिष्पत्तेः ।४।१।३२।

अनेकविधैर्लक्षणैर्गुणावयवादिभिः सम्बन्धस्यैकस्य घटादेर्भावस्य उत्पत्तेर्हेतोस्तद्वाचकस्य घटादिशब्दस्य तदर्थाभिधानमुखेन तदनुषङ्गचनेकार्थाभिधायकत्वं लक्षणया न साक्षादित्यनेकार्थाभिधायकशब्दवाच्यत्वमन्यथासिद्धमिति सूत्रार्थः ।४।१।३२।

असिद्धश्चायं हेतुरित्याह—

तल्लक्षणव्यवस्थानादेवाप्रतिषेधः ।४।१।३३।

तल्लक्षणस्य तद्वाचकशब्दस्य **व्यवस्थानात्** यं कुम्भमद्राक्षं तं स्पृशामीति प्रत्यभिज्ञाबलेनैकविषयत्वस्य वानेकविषयत्वस्यासिद्धत्वात्, एकस्याप्रतिषेधः। साध्यसाधनविकलश्च सेनादिदृष्टान्त इति सूत्रार्थः ।४।१।३३

[सर्वशून्यतानिराकरणप्रकरणम्]

अयमपर एकान्तः—

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ।४।१।३४।

यावज्जातभावं [यावद्भावजातं] तत्सर्वमभावः। कस्माद्? **भावेष्वितरेतराभावसिद्धेः**। असन् गौरश्वात्मनेति अनश्वो गौः। एवमसन्नश्वो गवात्मनेत्याह गौरश्व इतीतरेतराभावसिद्धेः असत्प्रत्ययप्रतिषेधाभ्यां भावशब्दस्य सामानाधिकरण्यात्। प्रयोगश्च भावशब्दा असद्विषया असत्प्रत्ययभावप्रतिषेधशब्दाभ्यां सामानाधिकरण्यादनुत्पन्नप्रध्वस्तघटवाचकशब्दवदिति सूत्रार्थः ।४।१।३४।

१—इतः पूर्वं सूत्रमेकं 'न व्यवस्थानुपपत्तेः' इति प्रामाणिकपुस्तकेषूपलभ्यते नास्त्यत्र।

दूषयति—

न स्वभावसिद्धेर्भावानाम् ।४।१।३५।

सर्वमभाव इत्येतन्नास्ति। कस्मात्? **स्वभावसिद्धेर्भावानां** स्वभावः स्वरूपं भावानाम्। येनामी भावाः स्वभावाद्व्यावर्तन्ते, तस्य सिद्धेः। कथं भावेष्वितरेतराभावसिद्धेरित्यभावो भवताभिधीयते। न चेतरेतराभावानभ्युपगमे इतरस्येतरस्मिन्नभावः शक्यते प्रतिपादयितुम्। प्रतिपादयति च भवान्। अतो मन्यामहे स्वभावसिद्धिरभ्युपगता भवतेति। ततश्च विरुद्धो हेतुरसत् प्रत्यय-प्रतिषेधशब्दाभ्यां सामानाधिकरण्यञ्च भावशब्दानामसद्विशेषणं सदभिधायक-त्वेऽप्युपपत्तिरित्यन्यथासिद्धिश्चेति सूत्रार्थः ।४।१।३५।

चोदयति—

न स्वभावसिद्धेरापेक्षिकत्वात् ।४।१।३६।

सर्व एव हि भावा भिन्नस्वभावा भिन्नत्वञ्चैषामन्यापेक्षम्। तथाहि नीलं भिन्नं पीताद्यपेक्षया न तु स्वभावात्। एवं ह्रस्वत्वदीर्घत्वपरत्वादयोपि परस्परा-पेक्षा द्रष्टव्याः। यच्च परापेक्षं न तत्स्वाभाविकम्। यथा जपाकुसुमापेक्ष स्फटिकस्यारुणिमा परापेक्षाश्च भिन्नस्वभावा भावास्तस्मान्न स्वाभाविका इति सूत्रार्थः ।४।१।३६।

परिहरति—

व्याहतत्वादहेतुः[1] ।४।१।३७।

अत्र भिन्नत्वादयो धर्माः न वस्तुस्वभावाः किंतु तद्धर्माः। तेषाञ्च न स्वोत्पत्तौ परापेक्षत्वमपि तु स्वरूपनिरूपणे। यद्यप्यपेक्षाबुद्धिजन्यानामुत्पत्तावपि परापेक्षत्वमपि तु स्वर्न [?] स्यात्। तदापेक्षाया अपि भेदाभावाद्दीर्घादि-प्रत्ययानामव्यवस्था स्यात्। अस्ति च व्यवस्था दीर्घाद्दीर्घतरमित्यादिका। तस्मात् स्वभावसिद्धिः सिद्धा भावानामिति परापेक्षत्वं व्याहतत्वेन सिद्धत्वाद-हेतुरिति सूत्रार्थः ।४।१।३७।

[संख्यैकान्तवादनिराकरणप्रकरणम्]

अथेमे संख्यैकान्तवादाः सर्वमेकं सदविशेषात् सर्वञ्चैतन्नित्यानित्यभेदा-दित्यादि तत्प्रतिषेधद्वारकसूत्रम्—

१—°दयुक्तमिति प्रथितः पाठः।

संख्यैकान्तासिद्धिः कारणोपपत्त्यनुपपत्तिभ्याम् ।४।१।३८।

सर्वमेकं सदविशेषादित्यादौ यदि साध्यसाधनयोर्नानात्वमेकान्तो न सिद्धयति, व्यतिरेकात् । अथ साध्यसाधनयोरभेदः, एवमप्येकान्तो भावो न सिद्धयति, साधनाभावात् । नहि साधनमन्तरेण साध्यमस्ति । तस्मात् कारणोपपत्त्यनुपपत्तिभ्यां सर्वमेकं सदित्येकान्तवादानामसिद्धिरिति सूत्रार्थः ।४।१।३८।

चोदयति—

न कारणावयवभावात् ।४।१।३६।

न संख्यैकान्तानामसिद्धिः । कस्मात् ? **कारणस्य** साधनस्य **साध्यावयवभावात्** । एवञ्च न साध्यव्यतिरिक्तं साधनम् । न चासाधना साध्यसिद्धिरिति सूत्रार्थः ।४।१।३६।

परिहरति—

निरवयवत्वादहेतुः ।४।१।४०।

साध्यावयव एव साधनमित्यहेतुः । कस्मात् ? **निरवयवत्वात्** प्रतिज्ञातार्थस्य । सर्वमेकमित्यादि प्रतिज्ञातार्थे न कश्चिदवशिष्यते यो हेतुः स्यात् । न च साध्यमेव हेतुर्भवति । स्वात्मनि क्रियायाः विरोधात् तस्मात्तदवयवत्त्वेनापि संख्यैकान्तो न युक्तः ।

ननु मा भूत्, संख्यैकान्तवादस्तु कुतः ? उच्यते । अत्र तावद्घटपटादि पदार्थभेदप्रतिभासो न चासति बाधके तस्यापारमार्थिकत्वम् । न चाद्वैतप्रतिपादिका श्रुतिर्बाधिका । तस्याः परमेश्वरविषयतायाः गुणवादत्वेन चोपपत्तेः । नापि प्रत्यक्षस्य विधातृत्वेन भेदप्रतिपादकत्वाभासः, तद्भासकत्वमन्तरेण तस्यावस्थितघटादिविषयविधातृत्वस्यैवानुपपत्तेः । न च विधातृत्वेऽपि प्रत्यक्षस्य पदार्थभेदग्राहित्वं स्वरूप·········ग्र विषयत्वाभ्युपगमात् भेदोऽपि न गृह्यत इति चेत् ? मा भूत् सावधिकं भेदग्रहणमयमस्माद्भिन्न इति । तथापि स्वरूपग्रहणे सति तदपर्यवसानाद् भेदोऽपि परिस्फुरत्येव निर्विकल्पकज्ञाने प्रमाणान्तरेषु तथादर्शनात् ।

नापि सावधिकसविकल्पकप्रत्ययान्तरेण भेदग्रहणेऽन्योन्याश्रयत्वमनवस्था वा भविष्यतीति व्याप्यमपूर्वमेव स्वेतरव्यावृत्ततया गृहीतस्यार्थस्यावधित्वेन तस्मादस्य भेदग्रहणेऽन्योन्याश्रयताभावात् तत्तत् पूर्वावधिग्रहणमपि संसारस्यानादित्वेन तत्तत्पूर्वकालभावः सिद्धयतीति नानवस्था भयावहा । सर्वेषामेक-

कालग्राहकत्वाभावात् । न च मानान्तरेण बाधस्तस्यैवासम्भवात् । प्रत्युतात्मभेदग्राहकं प्रमाणमस्ति एककालवर्त्यस्मदाद्यनेकशरीराणि प्रतिनियतभोक्तृभोगाधिष्ठितानि अयोनिसंबन्ध्येककालविविधविरुद्धभोगाधिष्ठानत्वात् । यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति । यथा··············शरीरम् । न च तथैतानि । तस्मात् प्रतिनियतभोक्तृभोगाधिष्ठानानीति । श्रुतिरप्यस्ति भेदग्राहिका द्वे ब्रह्मणी वेदितव्ये इति परश्चापरश्चेत्यादिका । तस्मात् प्रत्यक्षादिभिरवधार्यमाणस्य भेदस्य बाधकः । प्रमाणं सूत्रितं येन दूषयता सूत्रकारेणार्थात् स्वपक्षसाधनमप्युक्तमिति सूत्रतात्पर्यार्थः । ते खल्वेते संख्यैकान्तवादाः प्रत्ययाभासनिरासका इति तत्सिद्ध्यर्थं तत्परीक्षाच्छलेन निराकृता ।४।१।४०।

[फललक्षणपरीक्षाप्रकरणम्]

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ।४।१।४१।

लौकिकी प्रवृत्तिस्तात्कालिकफला कर्षत्यादिका । इयञ्च प्रवृत्तिरग्निहोत्रादिका वैदिकी । तत्र सन्देहः किमियं तात्कालिकलोकपक्षपातादिफला उत कालान्तरोपभोग्यस्वर्गादिफलेति । एवञ्च फलपदार्थलक्षणं तत्स्वरूपनिश्चयाभावेन संदिग्धविषयत्वादसम्बद्धमिति सूत्रार्थः ।४।१।४१।

परिहरति—

न सद्यः कालान्तरोपभोग्यत्वात् ।४।१।४२।

न तावदग्निहोत्रादिप्रवृत्तीनां सद्यः सञ्जायमानं लौकिकपक्षपातादिफलम् । कस्मात् ? श्रूयमाणस्य स्वर्गशब्दस्यार्थवादगतसुखातिरेकवाचकत्वे सम्भवत्युपचरितलोकपक्षपाताद्यर्थत्वायोगात् । न च लोकपक्षपातादेरनुष्ठानफलं सम्भवति प्रच्छन्नमनुतिष्ठतां तदभावेन तस्य तदुपलम्भत्वेन निश्चयेनाफलत्वात् । न च कल्पनागौरवं, प्रमाणसिद्धस्यानिवार्यत्वात् । न चाफलं तत्, क्रियानुष्ठानवैधुर्यात् । तस्मात् कालान्तरोपभोग्यस्वर्गादेः फलनिश्चयान्न संदिग्धाश्रयत्वं फललक्षणस्येति सूत्रार्थः ।४।१।४२।

चोदयति—

कालान्तरेणानिष्पत्तिर्हेतुविनाशात् ।४।१।४३।

कालान्तरेणाग्निहोत्रादिक्रियाफलस्य स्वर्गादेरनिष्पत्तिः । कस्माद्धेतोरग्निहोत्रादिकर्मणः क्षणिकत्वेन विनष्टस्य कालान्तरे फलोदयसमयेऽसत्त्वेनाकारणत्वादिति सूत्रार्थः ।४।१।४३।

परिहरति—

प्राङ् निष्पत्तेर्वृक्षफलवत्तु तस्य ।४।१।४४।

यथा वृक्षमूले कृतं सेकादि परिकर्म पाकजोत्पत्तिन्यायेनावान्तरव्यापार-जननाद्विनष्टमपि कालान्तरे पल्लवकुसुमादिकं फलं जनयति । एवमग्निहोत्रादि-कर्म फलनिष्पत्तेः प्राक् स्वयं विनष्टमपि पुरुषाश्रयापूर्वलक्षणावान्तरव्यापारा-वैयर्थ्यात् [फलं जनयत्येवेति] न सदसत् । तस्मात्सदसतोर्जननद्वारेण कालान्तरोपभोग्यस्वर्गादिफलहेतुर्भवतीति यदुक्तं हेतुविनाशादिति तदसंबद्धमिति सूत्रार्थः ।४।१।४४।

चोदयति—

नासन्न सन्न सदसत् सदसतोर्वैधर्म्यात् ।४।१।४५।

किमेतत्फलमुत्पत्तेः प्राक् सद्वाऽसद्वा सदसद्वाऽनुभयं वा ? तत्र न तावदसत् उपादाननियमदर्शनात्, खुरविषाणाद्युत्पत्तिदर्शनाच्च । नापि सत् कारक-व्यापारवैयर्थ्यात् । न सदसत् । कस्मात् ? सदसतोर्वैधर्म्यात् । धर्मस्वभावविरुद्धो धर्मोऽपि विधर्मा तस्य भावो वैधर्म्यम् । तस्मात् वैधर्म्यात् परस्परविरुद्धस्वभाव-योरेकत्र समावेशाभावादिति । नाप्यनुभयं तत्स्वरूपानिर्देशान्न प्रकारान्तरमस्ति । तस्मात्फलाभाव इति ।४।१।४५।

परिहरति—

बुद्धिसिद्धन्तु तदसत् ।४।१।४६।

तत्कार्यमुत्पत्तेः प्रागसद्भावि । कस्मात् ? कारकव्यापारदर्शनात् । नन्वसत् कार्यपक्ष उपादाननियमो न स्यादित्युक्तमित्यत आह बुद्धिसिद्धं तु इति । यस्मादिदमनेन शक्यं निर्वर्तयितुमिदमनेनेत्यनुमानबुद्ध्या सिद्धं कृतवान् कार्यं तस्मात् तदुत्पत्तेः, यथा समर्थं तदुपादत्ते न सर्वं, नहि सर्वस्मात् सर्वमुत्पद्यमानमनेन दृष्टमिति । यच्च खुरविषाणाद्युत्पत्तिस्थान इति । तदसत् स हि खुरविषाणम-सत्वान्नोत्पद्यते, अपि तु कारणाभावात् । न च सत्त्वमनुत्पत्तौ हेतुः, किन्तु सतोऽ-नुत्पत्तेरसदुत्पद्यत इति सत्कार्यपक्षे च सर्वथा कारकव्यापारवैयर्थ्यमुपादाननियमा-भावश्च । एकत्वात्सर्वार्थिनामित्येकपक्षस्वीकरणमितरेषामसाधुत्वं सूचयतीति मन्तव्यम् । ततश्च नासन्न सन्न सदसन्नोभयं नानुभयमुत्पद्यमानं कार्यमिति पक्षत्रयमभ्युपगमेनैव परिहृतमिति सूत्रार्थः ।४।१।४६।

पुनश्चोदयति—

आश्रयव्यतिरेकाद्वृक्षफलोत्पत्तिवदित्यहेतुः ।४।१।४७।

विनष्टमपि कर्म संस्काराधानद्वारेण मूलसेकादिपरिकर्मवत् फलं जनयिष्यतीति यदुक्तं निदर्शनं तन्न हेतुः । कस्मादाश्रयव्यतिरेकात् । सेकादिपरिकर्म पर्णादिफलञ्चोभयमेकवृक्षाश्रयं दृष्टम् । न चैवं कर्मफलयोराश्रयैक्यमत्र सम्भवति । कृतकर्मणो देहस्य विनाशे देहान्तरे फलनिष्पत्तिदर्शनात् । तस्मादाश्रयव्यतिरेकात् वृक्षफलोत्पत्तिवदित्ययुक्तमुक्तमिति सूत्रार्थः ।४।१।४७।

परिहरति—

प्रीतेरात्माश्रयत्वादप्रतिषेधः ।४।१।४८।

यद्यपि कृतकर्मणो देहस्य विनाशस्तथापि तदधिष्ठातुरात्मनस्तादवस्थ्यात् कर्मफलयोरेकाश्रयत्वं सम्भवति । देहव्यतिरिक्तात्मनः सत्वनित्यत्वयोः साधितत्वात् । तस्मात् **प्रीतेः** सुखातिरेकस्य तत्कारणव्यापारस्य **चात्माश्रयत्वेनै**काश्रयत्वाद् वृक्षफलोत्पत्तिवदित्यस्याप्रतिषेध इति सूत्रार्थः ।४।१।४८।

पुनश्चोदयति—

न पुत्रपशुस्त्रीपरिच्छेदहिरण्यान्नादिफलनिर्देशात् ।४।१।४९।

न प्रीतिमात्रमेव कर्मफलम् । पुत्रकामो यजेत पशुकामो यजेतेत्येवमादिभिर्वाक्यैः पुत्रपशुस्त्रीपरिच्छेदहिरण्यादेः फलत्वेन निर्देशात् । तस्य चात्माश्रयत्वासम्भवेनैकाश्रयत्वानुपपत्तेरिति सूत्रार्थः ।४।१।४९।

परिहरति—

तत्सम्बन्धात्फलनिष्पत्तेस्तेषु फलवदुपचारः ।४।१।५०।

न पुत्रादेः स्वरूपेण कर्मफलत्वं सम्भवति, अपुरुषार्थत्वात् । तथापि सम्बन्धात्फलस्य प्रीतिलक्षणस्यात्मन्युत्पत्तेः, तेषु पुत्रादिषु फलवदुपचारः, न स्वरूपतः फलत्वं तेषाम् । ततश्च कर्मफलयोरेकाश्रयत्वमत्रापि सम्भवतीति सूत्रार्थः ।४।१।५०।

[दुःखलक्षणपरीक्षाप्रकरणम्]

बाधनालक्षणं दुःखमिति [१।१।२१] सूत्रेण बाधनया दुःखेन लक्ष्यमाणमनुषज्यमानं शरीरादि सुखसहितं दुःखमित्युक्तम् । तदयुक्तमनुकूलवेदनीयस्य दुःखत्वानुपपत्तेः । यदि दुःखानुषङ्गात्सुखं तद्धेतुत्वाच्छरीराद्यपि दुःखं स्यात् ।

तर्हि सुखानुषङ्गाद् दुःखं सुखहेतुत्वाच्छरीराद्यपि सुखं स्यात्। तस्मात् लोकयात्रानुरोधेन सुखमस्ति दुःखमप्यस्तीति वक्तव्यम्। ततश्च सर्वं शरीरादिबाधनालक्षणं दुःखमिति दुःखलक्षणमनुपपन्नमित्याशङ्क्याह—

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ।४।१।५१।

जायत इति जन्म शरीरादित्यस्य स्वर्गनरकादिस्थानेष्वाविर्भावमुत्पत्तिर्दुःखमेवेति [दुःखसंज्ञा] भावयितव्या। अस्मात् विविधबाधनायोगादनेकविधदुःखयोगेन हेयपक्षनिक्षेपात् पुनः सुखमेव नास्तीति वक्तव्यम्। यच्च सुखानुषङ्गाद्दुःखं तद्धेतुत्वाच्छरीराद्यपि सुखं स्यादित्युक्तम्। तदयुक्तमुपादेयानुषङ्गात्। हेयस्योपादेयत्वादर्शनात्। यथा विषसंपृक्तान्नस्य। नहि तस्य विषानुषङ्गाद्धेयत्वं, मध्वनुषङ्गादुपादेयत्वं दृष्टम्। तस्मात्सुखस्य तद्धेतोः शरीरादेः सद्भावेऽपि दुःखानुषङ्गात्तेषु दुःखसंज्ञा भावयितव्या। न सुखदुःखसंज्ञा मुमुक्षुणेति दुःखलक्षणमुपपन्नं स्यादिति सूत्रार्थः ।४।१।५१।

ननु कस्मात् सुखं स्वरूपतो दुःखमेवेति नैयायिका इत्यत आह—

न सुखस्याप्यन्तरालनिष्पत्तेः ।४।१।५२।

न सुखस्य दुःखाभावात्मकत्वेन स्वरूपतो नास्तित्वं वक्तव्यम्। किं तर्हि, दुःखाभावेनैवोपदेष्टव्यम्। कस्मात्? सुखस्याप्यन्तरालनिष्पत्तेः। दुःखान्तरालेषु प्रत्यात्ममनुकूलवेदनीयस्य सुखस्यापि निष्पत्तेः। ततश्चानुभवसिद्धस्य सुखस्यापह्नोतुमशक्यत्वात् वैराग्यसिद्धयर्थं दुःखाभावेनैवोपदेष्टव्यमिति सूत्रार्थः ।४।१।५२।

इतश्च दुःखसंज्ञाभावनं न सुखस्य प्रतिषेध इत्याह—

बाधनाऽनिवृत्तेर्वेदयतः पर्येषणादोषादप्रतिषेधः ।४।१।५३।

प्रकारपर्येषणदोषान्तरादीत्येवं वेदयतः पुरुषस्य बाधनायाः दुःखस्यानिवृत्तेः सुखे दुःखभावनोपदेशः क्रियते। लक्षणसूत्रेण तेन सुखस्य स्वरूपतो न प्रतिषेध इति सूत्रार्थः ।४।१।५३।

नन्वन्तरा सुखमनुभवन्नपि कस्माद् बहुदुःखमनुभवन् स्वयमेव निर्वेत्स्यति, किं दुःखभावेनोपदेशेनेत्यत आह—

दुःखविकल्पे सुखाभिमानाच्च ।४।१।५४।

यद्यपि विवेकिनः बहुदुःखसम्भिन्नं सुखमिति मन्यमानस्य स्वयमेव वैराग्यं तथाप्यविवेकिनां सुखाय यतमानानां तदनुक्ते दुःखविकल्पे दुःखविशेषे दुःखा-

भिमानः सुखबुद्धिश्चास्ति तदङ्गभावेन। ततश्च तद्बुद्धया तदर्थं पुनःपुनर्यतमानस्यास्य संसारनिवृत्तिः स्यात्। तस्माद् दुःखविकल्पे सुखाभिमानाद्धेतोः संसारनिवृत्तिर्माभूदिति सुखादिषु दुःखभावनोपदेशोऽर्थवानिति सूत्रार्थः।४।१।५४।

[अपवर्गपरीक्षाप्रकरणम्]

अथापवर्गलक्षणं परीक्षमाणस्तत्साधनानुष्ठानस्यावसराभावेन तदसम्भवमाह—

ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः।४।१।५५।

ऋणं यज्ञब्रह्मचर्यादि। क्लेशः सुखदुःखादिः। प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः। तदनुबन्धः सर्वकालसम्बन्धः। तस्मादृणक्लेशप्रवृत्त्यनुबन्धात्। "जरया वा एष एतस्मात् विप्रमुच्यत" इत्यादिवचनात् यावत् प्रायणमग्निहोत्रकर्मानुष्ठानस्यापरित्यागेन ऋणानुबन्धस्तथा सुखदुःख मोहरागद्वेषादिविषक्तस्य न कदाचिदप्यवस्थानं सम्भवति। क्लेशानुबन्धादप्रवर्तमानस्यानवस्थानेन प्रवृत्त्यसम्बन्धाच्च ब्राह्मणस्य तुरीयांशप्राप्तेरवसराभावेन मोक्षोपायानुष्ठानाभावादपवर्गो न सम्भवतीति सूत्रार्थः।४।१।५५।

तत्रर्णानुबन्धादित्यस्य परिहारमाह—

समारोपणादात्मन्यप्रतिषेधः।४।१।५६।

"प्राजापत्यामिष्टिं निरूप्य तस्याश्च सर्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य [ब्राह्मणः प्र]व्रजेदिति" वचनेन प्रयाणात्प्रागेवात्मन्यग्निसमारोपसम्भवात् "जरया ह वा" इत्यादेश्च मुख्यार्थासंभवेन गुणवादत्वात् फलगामिनो जीर्णपरत्वेन व्याख्यानात्। अन्यथा मृत्युनैवेत्यनेन सिद्धत्वेन तस्य वैयर्थ्यप्रसङ्गात्। असक्तस्यान्तेवास्यादिवाह्यशक्तिविधानाच्च तुरीयाश्रमप्राप्तेरवसरत्वेन मोक्षोपायानुष्ठानसम्भवादपवर्गस्य प्रतिषेधो नेति सूत्रार्थः।४।१।५६।

इतश्च ऋणानुबन्धो नेत्याह—

पात्रचयान्तानुपपत्तेश्च फलाभावः।४।१।५७।

"आहिताग्निमग्निर्दहन्ति[ति] यज्ञपात्रैश्चेति" वचनेनाहिताग्न्यादीनामन्त्येष्टिविधौ प्रत्यवयवं यज्ञपात्रनिधानेन पात्रचयान्तता दृष्टा। साग्निहोत्रादि[देः] जरामर्ये कर्मण्यविशेषेण फलकामिनं पुरुषं प्रति यावदायुषं प्रवर्तमाने वीतरागाणामेषणात्रय[1]व्युत्थानेन प्रवृत्तिजातानां नान्त्यकर्मण्यपि

१—पुत्रैषणा वित्तैषणा लोकैषणेति एषणात्रयम् बृहदारण्यकोपनिषदि प्रसिद्धम्।

प्रवर्तते। तेषां वहनादिप्रकारेणान्त्यकर्मश्रवणात्। तस्मात् सर्वपात्रचयान्तताऽनुपपत्तेः फलस्य सर्वत्र प्रयोजकत्वाभावः। ततश्च फलकल्पनारहितस्य तुरीयाश्रमप्राप्त्या मोक्षोपायेश्वरध्यानाद्यनुष्ठानसम्भवादपवर्गाभावो नेति सूत्रार्थः ।४।१।५७।

क्लेशानुबन्धादित्यस्य परिहारमाह—

[सुषुप्तस्य] स्वप्नदर्शने क्लेशाभावादपवर्गः ।४।१।५८।

यथा सुप्तस्य स्वप्नदर्शिनस्तदवस्थायां सुखदुःखमोहानुबन्धो नास्ति। चित्तस्य निरिन्द्रियात्मप्रदेशावस्थानेन करणे व्यापाराभावात्। तथापवर्गावस्थायामपि क्लेशानुबन्धो नास्ति, निष्कारणत्वात्। 'अशरीरं वावसन्त'मित्यादिश्रुतौ तदात्मा कदाचिन्निरस्तसमस्तविशेषगुण अनित्यविशेषगुणत्वे सति नित्यत्वात् पार्थिवपरमाणुवत्। तदेवं क्लेशानुबन्धस्य कादाचित्कत्वादपवर्गोऽस्तीति सूत्रार्थः ।४।१।५८।

प्रवृत्त्यनुबन्धादित्यस्य परिहारमाह—

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ।४।१।५९।

हीनक्लेशस्य मिथ्याक्लेशरागद्वेषादिवियुक्तस्य पुरुषस्य प्रवृत्तिर्विद्यमानापि मिथ्यासङ्कल्पितादिलक्षणसहकारिकारणाभावात् प्रतिसन्धानाय पुनः शरीरोत्पादकादृष्टोत्पादनाय न भवतीति प्रवृत्त्यनुबन्धोऽपि मोक्षाभावे न हेतुरिति सूत्रार्थः ।४।१।५९।

क्लेशानुबन्धो नास्तीत्येतदमृष्यमाण आह—

न क्लेशसन्ततेः स्वाभाविकत्वात् ।४।१।६०।

नास्ति क्लेशानुबन्धविच्छेदः। कस्मात्? क्लेशसन्ततेः स्वाभाविकत्वादिति सूत्रार्थः ।४।१।६०।

इदानीमन्य एकदेशी परिहरति—

प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकत्वेऽप्यनित्यत्वम् ।४।१।६१।

यथा प्रागुत्पत्तेः प्रागभावनित्यत्वं स्वाभाविकत्वेऽपि भावोत्पत्त्या तथा स्वाभाविक्या अपि क्लेशसन्ततेरनित्यत्वं सम्भवतीति सूत्रार्थः ।४।१।६१।

इदानीमन्य एकदेशी [भावमेव दृष्टान्तयतीत्याह]

अणुश्यामताऽनित्यत्ववद्वा ।४।१।६२।

यथा पार्थिवस्याणोः श्यामताऽनादित्वेनागमसिद्धा तथान्यस्याप्यग्निसंयोगाद्विनाशेनानित्यता तथा क्लेशसन्ततिरनादिरप्यनित्या भवितुमर्हतीति सूत्रार्थः ।४।१।६२।

तत्रानित्यत्वस्य कारणसत्तासम्बन्धरूपत्वेनासद्रूपस्य प्रागभावस्य तदसम्भवाद्व्यपदेशस्य भाक्तत्वादणुश्यामतायाश्च पार्थिवरूपत्वेन रक्तादिरूपवदनित्यत्वेनानादित्वाभावेनास्मदादिप्रश्नपूर्वकत्वाभावमात्रेणानादिव्यपदेशस्यागमस्योपपत्तेः । नैतद् दृष्टद्वयं क्लेशसन्ततेः स्वाभाविक्या अनित्यत्वे सम्भवतीति स्वमतेन परिहारमाह—

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ।४।१।६३।

सङ्कल्प्यतेऽनेनेति **सङ्कल्पो** मिथ्याज्ञानं **चकारो**ऽनुक्तसमुच्चयार्थः । **रागादीनां** क्लेशानां प्रबन्धेन वर्तमानानां सङ्कल्पनिमित्तत्वात् । कर्मनिमित्तत्वादिरहितनिमित्तत्वाच्च । तस्यापि कूटस्थतयानादित्वाभावात् । तत्त्वज्ञानेनापूर्वेण गुरूपदेशादिना लब्धेनाभ्यासादिना सरिसत्वेन [?] विरोधिना सवासनस्य मिथ्याज्ञानलक्षणस्य सङ्कल्पस्य निवृत्तौ तत्कार्यरागद्वेषादिदोषनिवृत्तिक्रमेण द्वितीयसूत्रो[१।१।२।क्तेन क्लेशसन्ततेर्भाविन्याबुद्भेदोपात्तायाश्च समाधिबलादेकीकृत्योपभोगेन प्रक्षयादखिलक्लेशसन्ततिवियुक्तस्यात्मनोऽवस्थानं सम्भवतीति न क्लेशानुबन्धाविच्छेदेनापवर्गाभावः । सर्वेषां रागादीनां सङ्कल्पनिमित्तत्वे नानावित्त··············भावादिति सूत्रतात्पर्यार्थः ।४।१।६३।

इति न्यायसूत्रतात्पर्यदीपिकायां चतुर्थाध्यायस्य
प्रथमाह्निकम्

———

चतुर्थोऽध्यायः ।

द्वितीयाह्निकम् ।

[तत्त्वज्ञानोत्पत्तिप्रकरणम्]

तदेवं छलसंशयप्रमाणप्रमेयाणि परीक्षितानि । प्रयोजनादयोऽपि प्रमाण-प्रमेयान्तर्गतत्वेन "यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग" [२।१।७] इति तत्पदार्थ-परीक्षाङ्गभूतसंशयनिराकरणसमाधानहेतुप्रकारातिदेशतश्च कथञ्चित् परीक्षिताः । वादजल्पवितण्डानां चाग्रे काचित् परीक्षा वर्तिष्यते । तत्रेतरेषां तत्त्वज्ञानं प्रमेयतत्वज्ञानाङ्गतया प्रमेयतत्वज्ञानन्तु साक्षान्निःश्रेयसहेतुरिति चोक्तम् । [१।१।१।वार्त्तिके]

अथेदानीं चिन्त्यते, किं सर्वप्राणभृत्संबन्ध्यात्मा प्रमेयविषयं तत्त्वज्ञानं मिथ्याज्ञाननिवृत्तिक्रमेण निःश्रेयसहेतुः ? आहोस्वित् स्वसंबन्ध्यात्मादिविषय मिति । तत्र प्राणतन्मात्रसंबन्ध्यात्मादिप्रमेयाणामानन्त्येन तद्विषयतत्त्वज्ञान-स्याशक्यकरणीयत्वात् तद्विषयमिथ्याज्ञानस्यानिवृत्तेः, अन्यविषयत्वज्ञानेनान्य-विषयमिथ्याज्ञाननिवृत्तावतिप्रसङ्गाच्चानिर्मोक्षता स्यादिति संबन्ध्यात्मादि-विषयतत्त्वज्ञानमेव तद्विषयमिथ्याज्ञानादिनिवृत्तिक्रमेण मोक्षहेतुरित्याह—

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ।४।२।१।

दोषनिमित्तानां शरीरादीनां दुःखादीनां प्रमेयाणां **तत्त्वज्ञानादहङ्कार-निवृत्तिः** तद्विषयाहमिति मिथ्याज्ञाननिवृत्तिस्तद्व्यतिरिक्तात्मनां तत्त्वाघ्यारोप-निवृत्तिश्च । स्वसंबन्धिशरीरादिदुःखान्तप्रमेयमहमिति बुद्ध्वा तदुपचाराय घटमानः प्रवृत्त्यादिजननद्वारेण संसारमनुधावति न परशरीरादि । तत्र मा निवर्तिष्ट, तद्विषयमिथ्याज्ञानम् । निवर्ततां वा स्वशरीरादिदृष्टान्तेन, न तेनास्य संसारनिवृत्तिं प्रति कश्चिदुपयोगः । तस्मात् स्वसंबन्धिनां शरीरादीनां दोष-निमित्तानां तत्त्वज्ञानानां तद्विषयमिथ्याज्ञानादिनिवृत्तिक्रमेण द्वितीयसूत्रोक्तेन [१।१।२।] निःश्रेयसप्राप्तिर्भवतीति सर्वमवदातमिति सूत्रार्थः ।४।२।१।

ननु संबन्धिषु शरीरादिषु सवासनविपर्ययज्ञानशमनायोत्पद्यमानं तत्त्वज्ञानं कस्मिन् विषये प्रथममुत्पद्यते इत्यत्राह—

दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः ।५।२।२।

रूपादयो विषया इन्द्रियार्थाः **सङ्कल्पकृताः** मिथ्याज्ञानेन विषयीकृताः कामरागं प्रवर्तयन्तीति त एव प्रथमं **दोषनिमित्तम्** । अतस्तेषु प्रथमं प्रसंख्यानं कृत्वा तद्विषयं मिथ्याज्ञानं निवर्त्य पश्चादध्यात्मशरीरादिषु प्रसंख्यानाभ्यासेन तद्विषयमिथ्याज्ञाननिवृत्तिः कर्तव्येति सूत्रार्थः ।४।२।२।

तदिदमर्थादिषु प्रमेयेषु निवर्तमानमिथ्याज्ञानावयव्याद्यर्थं निरासमुखेन निवर्तनीयं किंतु [नु] तद्विषयाशुभसंज्ञाभावनामुखेनेत्याह—

तन्निमित्तं त्ववयव्यभिमानः ।४।२।३।

तेषां दोषाणां निमित्तं **तन्निमित्तमवयव्यभिमान** अवयविनि कामिन्यद्यावित्थमवयवीव न केवलेनोपमानम्—इत्थं दन्ता दाड़िमबीजप्रख्यापनमित्थमोष्ठौ बिम्बोपमान इत्याद्यभिमानः । कस्मात् ? तस्य शुभसंज्ञात्वे तथाभिमन्यमानस्य कामिन्यादिविषयरागानतिवृत्तेः । न पुनः कामिन्याद्यवयविसत्त्वं तन्निमित्तम् । तत्सत्त्वेऽपि केशलोममांसशोणितास्थिस्नायुकफपित्तोच्चाराद्याश्रयत्वेनाशुभसंज्ञां तत्र भावयतः तद्विषयरागाद्यनुत्पत्तेस्तस्मादशुभसंज्ञाभावनामुखेन तद्विषयमिथ्याज्ञानं निवर्तनीयं न तदसत्त्वप्रतिपादनेनेतरस्यः व्रणसिद्धत्वेन निवर्तयितुमशक्यत्वादिति सूत्रार्थः ।४।२।३।

[अवयवावयविप्रकरणम् प्रासङ्गिकम्]

इदानीमर्थनिरासमुखेन प्रसंख्यानमुपदिश्य तामुपदर्शयिष्यन् प्रथममवयविनिरासाय संशयमाह—

विद्याऽविद्याद्वैविध्यात् संशयः ।४।२।४।

विद्या वेदनमुपलब्धिः **अविद्या** अवेदनमनुपलब्धिः । तयोर्द्वैविध्यादुपलभ्यमानस्य चानुपलभ्यमानस्य च सदसत्त्वेन द्वैविध्यदर्शनादवयविन्युपलभ्यमानेऽनुपलभ्यमाने च सत्त्वासत्त्व इत्युभयथापि संशयो भवतीति सूत्रार्थः ।४।२।४।

प्रमाणसिद्धेऽवयविनि संशयोक्तिमसहमानः सिद्धान्त्याह—

तदसंशयः पूर्वहेतुप्रसिद्धत्वात् ।४।२।५।

तस्मिन्नवयविनि संशयो न युक्तः । कस्मात् ? **पूर्वहेतुप्रसिद्धत्वात्** पूर्वोक्तहेतुभिः प्रसिद्धत्वात् । अवयविनः प्रसिद्धे च तस्मिन् संशयानुपपत्तिरिति सूत्रार्थः ।४।२।५।

उक्तसाधकप्रमाणादुच्यमानं वृत्त्यनुपपत्तिलक्षणं बाधकप्रमाणं बलवदिति मनसि निधाय तेनावयविनं निराकृत्य तदसिद्धत्वेन तद्विषयसंशयं निराचिकीर्षुः प्रथममवयवानामवयविनिवृत्तिप्रतिषेधेनावयव्यभावमाह—

[1]कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ।४।२।६।

अवयवा अवयविनि वर्तमानाः कृत्स्नेऽवयविनि वर्त्तेरन्नकेदेशे वा ? न तावत् कृत्स्ने । महापरिमाणस्यावयविनोऽल्पपरिमाणेनावयवेनाव्याप्तेरेकद्रव्यत्वाभावाच्च । नाप्येकदेशे । प्रकृतावयवव्यतिरेकेणावयविन एकदेशान्तराभावात् । भावेऽपि तद्वदेवावृत्तेः । तस्मात्कृत्स्नैकदेशावृत्तित्वादवयवानां नास्त्यवयवीति सूत्रार्थः ।४।२।६।

अथावयवेष्ववयवी वर्तत इति पक्षः सोऽपि न युक्त इत्याह—

तेषु चावृत्तेः [अवयव्यभावः] ।४।२।७।

अवयवेष्ववयवी वर्तमान एकदेशेन वा कात्स्न्र्येन वा वर्तते ? न तावदेकदेशेन । अवयवव्यतिरेकेणैकदेशान्तराभावात् । भावे चानवस्थापातात् । नापि कात्स्न्र्येन एकस्मिन्नवयवे परिसमाप्तस्य अन्यत्र वृत्त्यभावात् । वृत्तौ चानेकत्वप्रसङ्गात् । एकद्रव्यस्य कारणविभागासम्भवेन नित्यत्वप्रसङ्गाच्च । तस्मन्नावयवेष्ववयवी वर्तत इति सूत्रार्थः ।४।२।७।

मा भूदवयवेष्ववयविनो वृत्तिस्तथाप्यन्यत्र वर्ततामित्याशङ्क्याह—

पृथक् चावयवेभ्यः [अवृत्तेः] ।४।२।८।

पृथगन्यत्रावयविनोऽवृत्तेरसंभवेनानाधारत्वेन वृत्त्यभावो नित्यत्वप्रसङ्गश्चेति सूत्रार्थः ।४।२।८।

अवयवा एव केनचिदवस्थाविशेषेणानुगृहीतोऽवयवीति वृत्तिकल्पो न युक्त इति चेत्तत्राह—

नावयव्यवयवाः ।४।२।९।

अवयवा एव नावयवी भवितुमर्हन्ति । अभेदे धर्मिभावानुपपत्तेः । मतुप्प्रत्यययोगासम्भवाद् भेदाभेदपक्षस्यानभ्युपगमाच्चेति सूत्रार्थः ।४।२।९।

---

१. इतः पूर्वं सूत्रमेकं "वृत्त्यनुपपत्तेरपि तर्हि न संशयः" प्रथितमस्ति । तस्याशयोऽत्र दृश्यते उपक्रमे परं सूत्रचर्चा तद्वृत्तिर्वा नोपलभ्यते ।

नन्ववयव्यग्रहणे सर्वाग्रहणं प्रसज्यत इत्याशङ्क्याह—

[1]केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः ।४।२।१०।

प्रत्येकमनुपलभमानानां केशानां समूहे यथा तैमिरिकस्योपलब्धिस्तद्वदेषां प्रत्येकमनुपलभ्यमानानां समूह उपलभ्यते । ततश्चोपलब्धेरणुसञ्चयस्यत्र विषयत्वेनावयव्यनभ्युपगमेऽपि सर्वथा ग्रहणं न प्रसज्यत इति सूत्रार्थः ।४।२।१०।

तमेनं वृत्तिविकल्पं स्वाश्रयव्याघातेन दूषयति—

[2]अवयवावयविप्रसङ्गश्चैवमाप्रलयात् ।४।२।११।

तत्रावयवा अवयविनि वर्तन्त इति पक्षोऽनभ्युपगमेन प्रतिक्षिप्तः । अवयवी अवयवेषु वर्तमानः किमेकदेशेन सर्वात्मना वेति विकल्पः । समानन्यायतया तत्तदवयवादिष्ववयवावयवित्वेन प्रसज्यमानः प्रलयाद्वा निवर्तेत उत परमाणुतो वा । न निवर्तेत वा । न तावत् प्रलयात्, तस्य सर्वोपाख्यारहितस्य दर्शनविषयत्वानुपपत्त्या विकल्पस्यानाश्रयत्वेनात्मलाभाभावात् । तथा परमाणोरप्यतीन्द्रियत्वेन दर्शनविषयत्वानुपपत्तेः । विकल्पस्यानाश्रयत्वेनासम्भव एव । तथा निवृत्तिपक्षेऽप्याद्यस्यानिश्चयान्नानाश्रयत्वमेव । तस्माद्वृत्तिविकल्पमभ्युपगच्छताऽवयवावयविप्रसङ्गभीत्या प्रलयादापरमाणोरानिवृत्तेर्वा विकल्पविषयोऽवयव्यभ्युपेतव्यः । तथा सति वृत्तिविकल्प एव स्वाश्रयसिद्ध्यर्थमवयविनं साधयतीति सूत्रार्थः ।४।२।११।

ननु चाप्रलयादिति सूत्रैकदेशेन प्रलयस्त्वयाऽभ्युपेत इत्यर्थस्यासत्त्वं प्रसज्यत इत्याशङ्क्याह—

न प्रलयोऽणुसद्भावात् ।४।२।१२।

नास्ति प्रलयः । कस्मादणुसद्भावाद्विभागे त्वल्पतरप्रसङ्गस्य यतो नाल्पीयस्तत्रावस्थानात् परमाणुरस्ति । यदि तत्राप्यवयवविभागे नाल्पतरप्रसङ्गः स्यात्, तदानन्तावयवत्वेन त्रसरेणुरपि मेरुणा तुल्यः स्यात् । न चैतद्दृष्टमिष्टं वा । नापि प्रलयान्तता विभागस्य । विभज्यमानस्याभावेन विभागस्याप्यभाव-

---

१—इतः पूर्वं सूत्रद्वयं न्यायसूचीनिबन्धेऽन्यत्र चोपलभ्यते न तयोरिह समावेशः । ते च "एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः" "अवयवान्तराभावेऽप्यवृत्तेरहेतुः" ।

२—इतः पूर्वं सूत्रमेकं दृश्यते न्यायसूचीनिबन्धेऽन्यत्र च । न चात्र तदुपलभ्यते "स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः"

प्रसङ्गात् । तस्मादस्ति निरवयवः परमाणुरिति नानर्थस्यासत्त्वं प्रसज्यत इति सूत्रार्थः[1] ।४।२।१२।

[निरवयवपरीक्षाप्रकरणम्]

निरवयवस्य परमाणोः सत्त्वेन प्रलयान्ततानिराकरणमसहमानो **योगाचारः** प्रत्यवतिष्ठते—

आकाशव्यतिभेदात्तदनुपपत्तिः ।४।२।१३।

आकाशासर्वगतत्वं वा ।४।२।१४।

तदनुपपत्तिस्तस्य परमाणोः निरवयवत्वस्यानुपपत्तिः । कस्मात् ? **अकाशव्यतिभेदात्** आकाशेनात्यन्तव्यतिभिन्नो यदि परमाणुस्तदा सावयवः स्यात् । अथ न व्यतिभिन्न आकाशस्यासर्वगतत्वं प्रसज्यते । न चान्या गतिरस्ति । तस्मात् सावयवः परमाणुरिति सूत्रद्वितयार्थः । ४।२।१३-१४।

इतश्च सावयवः परमाणुरित्याह—

[2]मूर्तिमताञ्च संस्थानोपपत्तेरयवव्यभावः ।४।२।१५।

यद्यपि मूर्तिमतामपि षष्ठ्या निर्देशस्तथापि हेतुपरत्वेन व्याख्येयम् । परमाणुः सावयवो मूर्तिमत्त्वात् संस्थानवत्त्वाच्च । यन्मूर्तिमत् संस्थानवच्च तत्सावयवं दृष्टम् । यथा घटस्तथा च परमाणुस्तस्मात्सावयव इति सूत्रार्थः ।४।२।१५।

इतोऽपि सावयव इत्याह—

संयोगोपपत्तेश्च ।४।२।१६।

पूर्वसूत्रस्थ संस्थानशब्देन यद्यपि प्रलयाख्यः संयोगविशेषो विवक्षितस्तथापि संयोगमात्रस्यानेन सूत्रेण हेतुत्वेनोपादानं न पौनरुक्त्यम् । मध्ये सन्नणुः पूर्वापराभ्यां दक्षिणोत्तराभ्यामुपर्यथो[धो]वृत्तिभ्यां च परमाणुभ्यां युगपत्संयुज्य परस्परं षण्णामपि व्यवधानं करोति । तेनानुमीयते तद्भागेन तेनाणुना संयुज्यत

१—अस्मिन् प्रकरणे सूत्रमेकमधिकं प्रसिद्धमस्ति "परं वा त्रुटेः" इति । तस्य चर्चाप्यस्यां वृत्तौ न दृश्यते ।

२—इतः पूर्वं सूत्रत्रयं न्यायसूचीनिबन्धेऽन्यत्र चोपलभ्यते "अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः । शब्दसंयोगविभवाच्च सर्वगतम् । अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः । एतेषां समुल्लेखोऽत्र वृत्तौ नास्ति ।

इति सावयवत्वमितरथा सर्वेषां समानदेशत्वेन पिण्डस्याणुमात्रत्वप्रसङ्ग[1] इति सूत्रार्थः ।४।२।१६।

[बाह्यार्थभङ्गनिराकरणप्रकरणम्]

तदेवं परमाणूनां सावयवत्वं प्रसाध्य सावयवस्य सर्वस्यापि बुद्धया विवेचने क्रियमाणे घटादिवद्याथात्म्यं नोपलभ्यत इति प्रमेयमात्रस्यासत्त्वान्निरालम्बन-प्रमेयमात्रमेवावशिष्यत इत्याह—

बुद्धया विवेचनात्तु भावानां याथात्म्यानुपलब्धेस्तन्त्वपकर्षणे-सद्भावानुपलब्धिवत् [तदनुपलब्धिः] ।४।२।१७।

यथायं तन्तुरयं तन्तुरिति तन्तुषु बुद्धचापकृष्यमाणेषु तन्तुव्यतिरेकेण न कश्चिदुपलभ्यते, पटबुद्धेर्विषयः । एवमश्वादिषु सर्वपदार्थेषु बुद्धया विविच्यमानेषु न कश्चित् बुद्धेर्विषयः स्यात् । तत्त्वादिपदार्थास्तावद्यावत् प्रलय इति सर्वभावानां बुद्धया विवेचनाद्याथात्म्यानुपपत्तेः स्वाकारबाह्यविषयं विज्ञान-मात्रमेव विद्यते नात्रार्थ इति [2]सूत्रार्थः ।४।२।१७।

ननु बाह्यं वस्तु सर्वं नास्तीति ब्रुवाणो भवान् यदि तत्र न प्रमाणं ब्रवीति तर्हि प्रमाणाभावात् बाह्यस्य सर्वस्यासन्निति न सिद्धयति । अथवा सर्वस्य बाह्यस्यासत्त्वं प्रमाणभावस्यापक्षपितत्वात् । अथ प्रमाणं ब्रवीति तर्हि तस्य प्रमाणस्य सविषयत्वेन बाह्यविषयत्वाभ्युपगमात् । बाह्यं वस्तु सन्नास्तीति व्याहन्येतेत्याशङ्क्याह—

१—न तदेकं न चानेकं विषयः परमाणुशः ।
न च ते संहता यस्मात् परमाणुर्न सिद्ध्यति ॥
षट्केन युगपद् योगात् परमाणोः षडंशता ।
षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रकः ॥

विज्ञप्तिमात्रतासिद्धिग्रन्थस्य विंशतिकायां वसुबन्धुनामा प्रसिद्धः बौद्धाचार्यः कारिके इमे लिखितवान् तदर्थस्यैव संवादः न्यायवार्त्तिके दृश्यते । ततश्च दीपिकाकृता संकलितेयं कथा । प्रकरणेऽस्मिन् सूत्रमेकमधिकं न्यायसूचीनिबन्धेऽन्यत्र च । तात्पर्यदीपिकाकारस्तु नोल्लिखति तत् । सूत्रं तु—"अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः" परमाणुसावयवत्वसाधक हेतुनिराकरणपरं सूत्रम् ।

२—बुद्धया विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः ॥
इति माध्यमिककारिकाभावसंवादोऽत्र सूत्रार्थे ।

[1]स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ।४।२।१८।

यथा स्वप्ने विषया न सन्ति अथ च प्रतिभान्तीत्यभिमानः कल्पनामात्रेण । तथा प्रमाणप्रमेयभावोऽपि न वास्तवः कश्चिदस्ति । किन्त्वनादिवासनानिबन्धनः काल्पनिकस्तथा च सांवृतेनापरमार्थसता प्रमाणप्रमेयभावेन बाह्यार्थशून्यता सिध्यति [परमार्थं सती] प्रत्ययानां दृष्टा च मिथ्याज्ञानानां तत्त्वप्रतिपत्तिहेतुता वनस्पतिविषयमिथ्याहस्तिज्ञानस्येव वनस्पतितत्त्वबुद्धौ । तथाच पटादिप्रत्ययो मिथ्या प्रत्ययत्वात् स्वप्नप्रत्ययवदिति निरालम्बनत्वं विज्ञानानां सिद्धमिति सूत्रार्थः ।४।२।१८।

तदेतद् योगाचारमतं दूषयति—

मिथ्योपलब्धिविनाशस्तत्त्वज्ञानात् विषयाभिमानप्रणाशवत् प्रतिबोधे ।४।२।१९।

यथा प्रतिबोधे स्वप्नविषयानुपलब्धिलक्षणात् तत्त्वज्ञानात् बाधात् स्वप्न विषयाभिमानस्य स्मर्यमाणस्यानुभूयमानत्वाध्यारोपस्य प्रणाशनस्मृतिवत् स्मरण विषयस्य वा तथा जाग्रत्प्रत्ययानामपि तत्त्वज्ञानात् बाधकादध्यारोपितमिथ्योपलब्धिविनाशो भवते ? विषयस्य पटादेरिति स्वप्नादिदृष्टान्तविकल्पत्वम् । न च यासहा ? मात्रनिवन्धनत्वेन काल्पनिकत्वं प्रमाणप्रमेयभावस्य प्रत्याय्यभेदमन्तरेण प्रत्ययभेदानुपपत्त्या तद्भेदाया वासनाया भेदाभावेन वैचित्र्यानुपपत्तेस्तदधीन काल्पनिकप्रमाणप्रमेयभेदव्यवहारानुपपत्तेः । ततश्च परार्थसता प्रमाणेन निरालम्बनत्वं प्रत्ययानां साधनीयम् । यथा च तेनैव सूत्रावयवेनाकाशव्यतिभेदादित्येवमादीनामपि परपक्षसाधनाभासानां मिथ्योपलब्धित्वात् तत्तदज्ञानाद्बाधकाद्विनाशः सूचितो भवतीत्यपि मन्तव्यम् ।

तत्र यत्तावदाकाशव्यतिभेदात्परमाणोः सावयवत्वमाकाशासर्वगतत्वं वेति तदयुक्तमन्तरितकार्यस्य कारणविशेषवचनत्वेनाकार्यस्य परमाणोरन्तर्देशाभावेनाकाशस्य तद्विषयसंयोगाभावेन व्यतिभेदाभावात् ।

न च तावताकाशस्यासर्वगतत्वं सर्वमूर्तसंयोगस्य सर्वगतत्वे विद्यमानसंयोगाभावेऽपि सर्वगतत्वसिद्धेः । नापि मूर्तिमत्वात्सावयवत्वं तदभ्युपगतः । सावयवपरमाण्ववयवेनानवस्थाभीत्या तु काचन समानपरिमाणप्रसङ्गभीत्या च निरवयवत्वेन विकल्पते । न व्यभिचारात् । नापि संस्थानपक्षे त्वत सावयवत्वमवयवरचना

१—इतः पूर्वं सूत्र चतुष्टयं न्यायसूचीनिबन्धेऽन्यत्र चोपलभ्यते व्याहतत्वादहेतुः । तदाश्रयत्वादपृथग् ग्रहणम् । प्रमाणतश्चार्थप्रतिपत्तेः । प्रमाणानुपपत्त्युपपत्तिभ्याम् । इति । तात्पर्यदीपिकायामेतेषां न दृश्यते समावेशः ।

विशेषस्यैव संस्थानत्वेन साध्यसमत्वात् । नापि षट्कयोगेन व्यवधायकत्वात् सावयवत्वं, निरवयवत्वेऽपि मूर्तत्वेन व्यवधायकत्वसिद्धया षट्कयोगस्यान्यथा सिद्धत्वात् । न च निरवयवत्वे समानदेशत्वेन षट्परमाणुकस्य पिण्डस्याणुमात्रत्वं, विकल्पानुपपत्तेः । किं च परमाण्वपेक्षया समानदेशत्वेऽप्येकत्र निहितषड्घटिक-दीर्घवत् स्थौल्यस्याविरोधात् । न च संयोगानामपि समानदेशत्वं तत्तत्पर-माण्वपेक्षया द्विष्ठस्य संयोगस्य समानदेशत्वाभावात् ।

नापि बुद्धयापि चानाद्यात्मानुपलब्धिरिति न्यायेन निरालम्बनत्वतद्विवेचन स्यैवावधिभूतबाह्यवस्त्वभावेऽनुपपत्तेर्यद्व्यतिरेकेणेदं नास्तीति तन्त्वादिषु विविच्य मानेषु कश्चिदवधिभूतोऽर्थो न गृह्यते । तथानवस्थाया बाह्यार्थस्यासत्त्वं न सिद्धयेत् । अनन्तरावयवत्वेन तु·········रपरिमेय······तदेवं परपक्षसाधनानाम-सत्वात् स्वपक्षे च मदीयाश्चित्तादर्थानन्तरं विषया मदीयाहङ्कारानास्पदत्वे सति सामान्यविशेषवत्त्वात् सत्तानन्तरचित्तवदित्याद्यनुमानेन प्रत्यक्षेण प्रत्ययानां सालम्बनत्वसिद्धेर्न **योगाचारपक्षः** पाक्षिकैः पक्षीकर्तुं युक्त इति तात्पर्यार्थः ।४।२।१९।

यस्तु **माध्यमिको** मिथ्याबुद्धिदृष्टान्तेन बाह्यार्थापह्नवं कृत्वा तेनैव दृष्टान्तेन ज्ञानापह्नवं कृत्वा विचारासहत्वं भावानां व्यवस्थापयांबभूव । तं प्रत्याह—

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् ।४।२।२०।

मिथ्याबुद्धेश्चार्थवत् प्रतिषेधः । अर्थे हि निषिद्धे भवेदप्येतत् । तद्व्यवस्थापने तद्वदेवाप्रत्यूहं बुद्धिसद्भावोऽपि सिद्धयति । न चैवं वादिनः प्रमाणमस्ति । असता च प्रमाणेन विचारसहत्वं भावानां संस्थापयन्न परपक्षं प्रतिषेद्धुमर्हन्ति । अप्रामाणि-कायाः सिद्धेस्तत्रापि समानत्वात् । तस्मादस्ति बुद्धिः । तथा च बुद्धेरप्येवमर्थ-वन्निमित्तेन सत्तासद्भावोपलम्भात् । अथवा भवन्मते बुद्धे मिथ्यारूपायाः सामान्या दिदर्शनेन निमित्तेन सत्तासद्भावोपलम्भात् अपरमार्थसत् । तत्कल्पनामूलत्वे तु मिथ्याज्ञानस्यानुत्पत्तेः, सर्वमभावो भावेष्वितरेतराभावसिद्धेः [४।१।३४।] रित्यत्र शून्यवादिमतस्य दूषितत्वाच्चानर्थस्यासत्त्वमसत्त्वबुद्धेरप्यसत्त्वं सिद्ध्यतीति तन्निरासमुखेन प्रसंख्यानं कर्तव्यमिति सूत्रार्थः[१] ।४।२।२०।

[तत्वज्ञानविवृद्धिप्रकरणम्]

नन्वागमाद्युक्तितश्चोपपन्नतत्त्वज्ञानस्यापि दोषनिमित्तेषु पदार्थेषु अहङ्कारा-दिमिथ्यानुवृत्तिदर्शनात् साक्षात्कारणस्य तत्त्वज्ञानस्योत्पत्तावुपायाभावात्कथं

१—तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः । इति सूत्रंप्रकरणेऽस्मिन् दृश्यते न्यायसूची निबन्धेऽन्यत्र च परमिह वृत्तौ तदनुपलब्धिः ।

सवासनमिथ्याज्ञाननिवृत्तिः शरीरादिषु संभवतीत्याशङ्क्यास्त्येवोपायः साक्षात्कारस्येत्याह—

समाधिविशेषाभ्यासात् ।४।२।२१।

इन्द्रियेभ्यः प्रत्याहृतस्य मनसो धारकेण प्रयत्नेन धार्यमाणस्यात्मना क्वचिदात्मप्रदेशे संयोगः **समाधिस्तस्य विशेषः** तत्त्वबुभुत्सा तद्विशिष्टत्वम् । तेन हि सुष्ठु व्यवस्थातः समाधिर्विशिष्यते, **तस्याभ्यासो** धारकप्रयत्नावृत्तिः । तस्मात् **समाधिविशेषाभ्यासात्** साक्षात्कारकारणं तत्त्वज्ञानमुपपद्यते । तेन चोत्पन्नेन तत्त्वज्ञानेन सवासनस्य शरीरादिविषयस्य निवृत्तिः सम्भवतीति सूत्रार्थः ।४।२।२१।

चोदयति—

नार्थविशेषप्राबल्यात् ।४।२।२२।

[१]अनिच्छतोऽपि बुद्ध्युत्पत्तेः ।४।२।२३।

क्षुधादिभिः प्रवर्तनाच्च ।४।२।२५।

न समाधिविशेषाभ्यासो युक्तः । कस्मा**दर्थविशेषप्राबल्यात्** । **अनिच्छतः** अबुभुत्समानस्यापि स्तनयित्नुशब्दप्रभृतिषु **बुद्ध्युत्पत्तेः** बुद्ध्युत्पाददर्शनात् । तथा क्षुत्पिपासादिभिरुपहतस्यानिच्छतोऽपि **प्रवर्तनात्** बुद्धिप्रवृत्तिदर्शनाच्चेति सूत्रार्थः ।४।२।२२-२५।

परिहरति—

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ।४।२।२६।

पूर्वकृतः पूर्वशरीराभ्यस्तसमाधिविशेषस्तत्**फलं** संस्कारः, **तस्यानुबन्धः** स्थेमा तस्मात् । पूर्वकृतफलानुबन्धस्य साक्षात्कारणस्य तत्त्वज्ञानस्योत्पत्तिः जन्मान्तराभ्यासाहितसंस्कारसहायात् ऐहिकजन्मकृतात् समाधिविशेषादस्पृष्टविषयान्तरं संवर्ततयैकाग्र्येणोत्पद्यमानः साक्षात्कारो नार्थान्तरेण प्रबलेनापि निरोद्धुं शक्यत इति सूत्रार्थः ।४।२।२६।

चोदयति—

[२]अपवर्गेऽप्येवं प्रसङ्गः ।४।२।२७।

यद्यर्थविशेषप्राबल्यादनिच्छतोऽपि बुद्ध्युत्पत्तिः तर्ह्यर्थविशेषप्राबल्यस्या

१—भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता ।

२—अरण्यगुहापुलिनादिषु योगाभ्यासोद्देश इति सूत्रमितः पूर्वमेकं न्यायसूचीनिबन्धेऽन्यत्र चोपलभ्यते नेह तदुपलब्धिः ।

निवृत्तेरपवर्गेऽपि एकं विधानां बुद्धीनां प्रसङ्गः स्यादिन्द्रियादिनिरपेक्षस्येवार्थस्य तथा सामर्थ्यम्यनुज्ञानादिति सूत्रार्थः ।४।२।२७।

परिहरति —

[न] निष्पन्नावश्यंभावित्वात् ।४।२।२८।

कर्मवशान्निष्पन्नस्य शरीरादेरवश्यं भावित्वात् प्रबलोऽप्यर्थस्तद्रहितो नापवर्गे ज्ञानमुत्पादयितुं समर्थं इति सूत्रार्थः ।४।२।२८।

ननु तर्हि तदभ्युपगम्यतामपवर्ग इत्याशङ्क्याह—

तदभावश्चापवर्गे ।४।२।२९।

तस्य शरीरादेरभाव एवापवर्गे । तन्मूलस्य धर्माधर्मसंस्कारादेरत्यन्ताभावादिति सूत्रार्थः ।४।२।२९।

प्रकृतमुपसंहरति—

[1]तस्मात् सर्वदुःखविमोक्षोऽपवर्गः ।४।२।३०।

यस्मात् सर्वं दुःखबीजम् दुःखं चापवर्गेण विच्छिद्यते । तस्मात् सर्वेण दुःखेन विमुक्तिरपवर्ग इत्येतत् सुगममिति सूत्रार्थः । ४।२।३०।

किं समाधिविशेष एव साक्षात्कारस्य कारणमित्याशङ्क्याह—

तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाद्वाध्यात्मविध्युपायैः ।४।२।३१।

तदर्थं तत्त्वज्ञानार्थं **यमनियमाभ्यां** यमो साधारणधर्मसाधनमाश्रमिणां नियमस्त्वसाधारणस्ताभ्यामात्मशोधनमात्मसंस्कारः कर्तव्य इति । तथा **योगा**द्योगशास्त्राद्धिरण्यगर्भादेः विहितैरध्यात्मविध्युपायैः । तथा प्राणायामादिभिश्चात्मसंस्कारः कर्तव्य इति तेऽपि साक्षात्कारोत्पादनद्वारेण मोक्षोपाया इति सूत्रतात्पर्यार्थः ।४।२।३१।

ननु यद्येते तत्त्वज्ञानो [त्पाद] क्रमेणापवर्गोपायाः, कृतं तर्ह्यान्वीक्षिक्येत्यत आह—

१ —भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता

ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादात् ।४।२।३२।

ज्ञायतेऽनेनेति **ज्ञानं** न्यायशास्त्रं तस्य **ग्रहण**मध्ययनं तस्या**भ्यासो** धारणार्थं सततक्रिया । **तद्विद्यैश्च सह संवादः** सा विद्या येषां ते तद्विद्याः तैः **सह संवादः** सहाध्यायाध्यापनम् । तद्विद्यायां समत्वापादनमपवादस्तदुभयं कर्तव्यं साक्षात्कारज्ञानोत्पादजननद्वारेणापवर्गार्थमिति सूत्रार्थः ।४।२।३२।

तद्विद्यैश्च सह संवाद इत्येतद्विवेक्तुमाह—

तं शिष्यगुरुसब्रह्मचारिशिष्टश्रेयोऽर्थिभिरनसूयुभिरभ्युपेयात् ।४।२।३३।

तं वादं **शिष्यैः गुरुभिः सहाध्यायिभिः शिष्टैः** गुर्वादिव्यतिरिक्तैः शास्त्रेणानुशिष्टैः **श्रेयोऽर्थिभिः** निःश्रेयसं प्रति श्रद्धावद्भिः **अनसूयुभि**रसूयारहितै**रभ्युपेयात्** प्राप्नुयात् । ततश्च तत्त्वावबोधः परिशुद्धो भवतीति सूत्रार्थः ।४।२।३३।

यस्तु मन्यते पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्य गुर्वादेस्ततश्च तेन सह वादोऽपि न कर्तुं युक्त इति । तं प्रत्याह—

तं प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ।४।२।३४।

तं वादं **प्रतिपक्षहीनमपि** वाभ्युपेयात् किमर्थं **प्रयोजनार्थमर्थित्वे** सति । परतो गुर्वादेः प्रज्ञामुपादित्समान[स्तत्त्वबुभुत्साप्रकाशनेन] आत्मनः शरीरादिभ्यो भेदमहं भवतो बुभुत्से इत्यभिदधानः स्वपक्षमनवस्थापयन् स्वदर्शनं गुर्वादिकृताद्विचारात् पूर्वपक्षोच्छेदेन स्वपक्षव्यवस्थालक्षणात् स्वदर्शनं परिशोधयेदिति सूत्रतात्पर्यार्थः ।४।२।३४।

[तत्त्वज्ञानपरिपालनप्रकरणम्]

ननु यत्र वादस्यैवेदृशी दशा तत्र तत्त्वनिर्णये जल्पवितण्डे दत्ताञ्जली इति तदाशङ्क्याह—

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ।४।२।३५।

यथा बीजप्ररोहसंरक्षणार्थं कण्टकशाखाभिरावरणमावृतिः क्रियते, तथा तत्त्वाध्यवसायसंरक्षणार्थमनुत्पन्नसाक्षात्कारतत्त्वज्ञानैस्तदर्थं घटमानैः कर्तव्ये, जल्पवितण्डे इति तेऽपि सप्रयोजने इति सूत्रार्थः । ४।२।३५।

न केवलं तदर्थं घटमानानां जल्पवितण्डे किं तर्हि विद्याभिर्वेदादिभिश्च परेणावज्ञायमानस्य ताभ्यां जल्पवितण्डाभ्यां विगृह्य कथनं युक्तमित्याह—

ताभ्यां विगृह्य कथनम् ।४।२।३६।

यस्तु कुदर्शनाभ्यासाहितमिथ्याज्ञानावलेपदुर्विदग्धतया कुहेतुभिरीश्वराणां ज्ञाना धाराणां पुरतो वेदब्राह्मणपरलोकादिदूषणेन तन्मतविभ्रमापादने प्रवृत्तस्तं प्रति वादी समीचीनदूषणमप्रतिभयाऽपश्यन् जल्पवितण्डे अवतार्य विजिगीषया तां निगृह्य तत्त्वकथनं करोति। मा भूदीश्वराणां मतिविभ्रमेण तच्चरितानुर्वतिनीनां प्रजानामपि धर्मविप्लव इत्यनेनापि प्रयोजनेन जल्पवितण्डे इति सूत्रार्थः ।४।२।३६।

द्विधा प्रवृत्तिं त्रिविधांश्च दोषान्
संप्रत्यभावा फलदुःखमोक्षाः ।
मार्गश्च मोक्षस्य यथाप्रमाणं
परीक्षितं सर्वमिदं चतुर्थे ।

इति भट्टवागीश्वरविरचितायां न्यायसूत्रतात्पर्यदीपिकायां
चतुर्थोऽध्यायः ।

———

अथ पञ्चमोऽध्यायः ।

प्रथमाह्निकम् ।

[सत्प्रतिपक्षदेशनाभासप्रकरणम्]

अथेदानीं जल्पवितण्डापरीक्षानन्तरं तदङ्गत्वेनावसरप्राप्तानि जातिनिग्रहस्थानानि विविच्य कथ्यन्ते । तत्र जातिर्नाम साधर्म्यवैधर्म्याभ्यां प्रतीपमवस्थानं जातिरिति सामान्यलक्षणमुक्तं पूर्वमेव । संप्रति तद्विशेषलक्षणार्थं विभागोद्देशसूत्रम्—

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ।५।१।१।

साधर्म्यमेव समो यस्मिन् प्रयोगे स साधर्म्यसमः प्रतिषेधः । एवं वैधर्म्यसमप्रभृतयोऽपि निर्वक्तव्याः । त एते चतुर्विंशतिहेतवः स्थापनाहेतौ प्रयुक्ते सम्भवतीति सूत्रार्थः ।५।१।१।

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ।५।१।२।

साधर्म्येणोपसंहारे तत्साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः प्रतिषेधः । यथा नित्यः शब्द उत्पत्तिधर्मकत्वाद् घटवदित्युक्ते जातिवाद्याह यद्यनित्यघटसाधर्म्यादनित्यः तर्हि नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्तः । एकस्मिन्नेव हेतौ आकाशवैधर्म्यादित्युक्ते य नित्याकाशवैधर्म्यादुत्पत्तिवैधर्मकत्वादनित्यः साधर्म्यमप्याकाशे नास्त्यमूर्तत्वमतो नित्यः शब्दः प्राप्तः । अथ मन्यसे सत्यप्येतस्मिन् साधर्म्येण नित्य इति न तर्हि वक्तव्यमनित्यघटसाधर्म्यात् नित्याकाशवैधर्म्यादनित्य इति । अनित्येनाप्यस्य घटेन वैधर्म्यममूर्तत्वमस्ति । अतो नित्यः प्राप्तस्तस्मिन्नेव हेतौ घटसाधर्म्यादिति कृते यद्यनित्यघटसाधर्म्यादनित्यो वैधर्म्यमप्यस्यानेनास्त्यमूर्तत्वमतो नित्यः प्राप्त इति ।५।१।२।

अनयोरुत्तरम्—

गोत्वाद्गोसिद्धिवत् तत्सिद्धिः ।५।१।३।

गवाश्वसाधर्म्ये सत्त्वादौ समाने वैधर्म्ये चैकशफादौ न साधर्म्यमात्रात् सत्त्वात् गौरश्वो भवति । न वैधर्म्यमात्रादेकशफादेरश्वो गौर्भवतीति । किं कारणं गोत्वे

साध्ये सत्त्वस्याश्वादौ गोत्वेन व्यभिचारेण गवाश्चबाधात्। अगोत्वे साध्ये वेकशफादेर्वैधर्म्यस्य महिषादेरपि व्यावृत्तेर्यदन्वयव्यतिरेकि साधर्म्यं तस्मात्तद्धर्मव्यवस्था भवति। गोत्वञ्च तथा, तस्माद्गोत्वादेव गौः सिद्धयति तथा इहाप्यमूर्तत्वमुभयव्यतिरेकि उभयान्वयि न तस्मान्नित्यमनित्यं वा शक्यं प्रतिपत्तुमपि तु अन्वयव्यतिरेकि संपन्नादुत्पत्तिधर्मत्वात् प्रत्यवस्थानं साधर्म्येणोक्ते हेतौ तद्वैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः। यथा तस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः अतो यद्ब्रवीषि विशेषहेत्वभावादिति तन्नायमविशेष इति सूत्रार्थः ।५।१।३।

[उत्कर्षसमादिजातिषट्कप्रकरणम्]

साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ।५।१।४।

साध्यदृष्टान्तयोर्धर्मविकल्पाद्वैचित्र्यात् साध्ये अविद्यमानधर्माध्यारोपः उत्कर्षः, विद्यमानधर्मापनयोऽपकर्षः वर्ण्यः साध्यः अवर्ण्योऽसाध्यः विकल्पो विशेष एतेषां धर्माणामुद्भावनार्थाः प्रयोगा उत्कर्षसमाद्या जातय इति साध्यसाधनधर्मयोस्तुल्यतया प्रत्यवस्थानं साध्यसमेत्युच्यत इति। उदाहरणन्तु अनित्यः शब्दः उत्पत्तिधर्मकत्वात् घटवदित्युक्ते यदि यथा घटस्तथा शब्दः, घटो रूपादिमान् शब्दोऽप्येवं प्रसक्त इत्युत्कर्षः। घटः श्रावणो न भवतीति शब्दोऽप्येवं प्रसक्त इत्यपकर्षसमः। शब्दो नित्यवर्णः घटोऽप्येवमघटो वा नित्यवर्णः शब्दोऽप्येवमिति वर्ण्यावर्ण्यसमौ। यथा सत्येकस्मिन्नुत्पत्तिधर्मकत्वे विभागजः शब्दो न विभागजो घटः विभागजाविभागजविकल्पो नित्यानित्यविकल्प इति विकल्पसमः। सत्यपि विकल्पवैचित्र्ये सर्वत्रोत्कर्षादीनां समाख्यानिरुक्तिवशात् विकल्पसमतो मिथश्च भेदो द्रष्टव्यः। घटो वा नित्य इत्यत्र को हेतुरयमपि साध्यवत् पञ्चावयवयोगित्वेन प्रज्ञापयितव्य इति साध्यसमः ।५।१।४।

एतेषामुत्तरम्—

किञ्चित्साधर्म्यादुपसंहारासिद्धेः वैधर्म्यादप्रतिषेधः ।५।१।५।

न ब्रूमो यावन्तो घटधर्मास्ते सर्व एव शब्दे भवन्तीति। अपि तु यो धर्मः साधर्म्येण स्वभावप्रतिबन्धयुक्तो भवति स तत्रोपसंह्रियते। तथा च शब्द इत्युपनयपदेन [?] एवञ्च सति यथोक्तं न संबन्धं यथा गौस्तथा गवय इत्युक्ते न गोधर्माः सर्व एव गवये, न गवयधर्माः सर्व एव गवि, अपि तु यश्चेतरेण संबध्यते तावन्मात्र एवोपसंह्रियते। अशेषधर्मोपसंहारे तु यथेत्येव न स्यात्। स एवासाविति यथेहापीत्यदोष इति सूत्रार्थः ।५।१।५।

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ।५।१।६।

दृष्टान्तः साध्य इति ब्रुवता न दृष्टान्तलक्षणं..........हि नामापीह तयोर्दर्शनयोर्विषयः । तथा च साध्यत्वमनुपपन्नम् । अथ दर्शनं विहन्यते, नासौ दृष्टान्ते लक्षणाभावादिति वर्ण्यावर्ण्यविकल्पसाध्यासाध्यसमानामनुत्थानमिति सूत्रार्थः ।५।१।६।

[प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम्]

प्राप्यसाध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ।५।१।७।

हेतुः प्राप्य वार्थं साधयेदप्राप्य वा । यदि प्राप्य तर्हि प्राप्तिविषयत्वेन विद्यमानत्वात् साध्यस्य कस्येदं साधनं नहि सिद्धं साध्यते । अथाप्राप्य न तर्हि साधकत्वं नह्यग्निरप्राप्तो दहतीति प्राप्त्या प्रत्यवस्थानं प्राप्तिसमः ।५।१।७।

अनयोरुत्तरम्—

घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः ।५।१।८।

कर्तृकरणं मृदं प्राप्य साध्यकर्मासाधारणं घटादिकं फलं निष्पादयति । तथा पीड़ने चाभिचारादप्राप्य साधकत्वं दृष्टमिति प्राप्त्यप्राप्तिसमयोरनुत्थानं प्रतिषेधेऽपि तुल्यत्वादिति सूत्रार्थः ।५।१।८।

[प्रसङ्गप्रतिदृष्टान्तसमजातिद्वयप्रकरणम्]

दृष्टान्तस्य कारणानपदेशात्प्रत्यवस्थानाच्चप्रतिदृष्टान्तेन प्रसङ्गप्रति-दृष्टान्तसमौ ।५।१।९।

दृष्टान्तस्य दृष्टान्तगतानित्यत्वस्य **कारणानपदेशात्** प्रमाणानपदेशादिति दृष्टान्तगतनित्यत्वस्य प्रमाणं वाच्यमिति प्रसङ्गेन प्रत्यवस्थानं प्रसङ्गसमः । प्रमाणमात्रप्रत्यवस्थानं साध्यसमानो विशेषः प्रसङ्गमस्येति प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः । यथा अनित्यः प्रमेयत्वाद्घटवदित्युक्ते जातिवाद्याह प्रमेयमाकाशं नित्यं दृष्टं, अयमपि तथास्त्वित्यनैकान्तिकत्वमुद्भावयितुमशक्नुवन्न प्रतिदृष्टान्तः दृष्टान्तमात्रेण प्रत्यवतिष्ठत इति जातित्वमन्यथा सदुत्तरमेव स्यादिति मन्तव्यमिति सूत्रार्थः ।५।१।९।

तत्र प्रसङ्गसमस्योत्तरम्—

प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ।५।१।१०।

प्रत्यक्षदर्शनार्थं प्रदीपमुपाददानैः न प्रदीपान्तरमुपादीयते प्रदीपप्रदर्शनार्थम् । तद्वदप्रज्ञातस्य प्रज्ञापनार्थं दृष्टान्तमुपाददानैः न दृष्टान्तस्य कारणमपदेष्टव्यमपदिष्टकारणत्वात्तस्येति सूत्रार्थः ।५।१।१०।

अथ प्रतिदृष्टान्तसमस्योत्तरम्—

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ।५।१।११।

प्रतिदृष्टान्तं ब्रुवता न विशेषहेतुरुच्यते। येन कारणेन प्रतिदृष्टान्तः साधको न दृष्टान्त इति प्रतिदृष्टान्तहेतुत्वे अहेतुर्दृष्टान्त इति नोपपद्यते। हेतुत्वे च दृष्टान्तस्य प्रतिदृष्टान्तस्यानुत्थानमिति सूत्रार्थः ।५।१।११।

[अनुत्पत्तिसमप्रकरणम्]

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ।५।१।१२।

अनित्यः शब्द उत्पत्तिधर्मकत्वात् कुम्भवदित्युक्ते ब्रूयात् प्रागुत्पत्तेरुत्पत्तिर्नास्तीत्यनित्यत्वस्याकारणं तदभावादनुत्पत्तिधर्मकत्वमनुत्पत्तिधर्मकत्वाच्च नित्य इत्यनुपपत्त्या प्रत्यवस्थानमनुत्पत्तिसमः ।५।१।१२।

अस्येदमुत्तरम्—

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ।५।१।१३।

उत्पन्नः खल्वयं शब्द इति भवत्युत्पत्तिधर्मक इति च प्रागुत्पत्तेः शब्द एव नास्ति। उत्पन्नस्य तथाभावाच्छब्दस्य सत उत्पत्तिधर्मकत्वमनित्यत्वकारणमुपपद्यते। कारणोपपत्तेश्च प्रागुत्पत्तेः कारणाभावादिति कारणप्रतिषेधो न युक्त इति सूत्रार्थः ।५।१।१३।

[संशयसमप्रकरणम्]

साभान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ।५।१।१४।

दृष्टान्तः प्रयत्ननान्तरीयकत्वस्य हेतोर्घटः। यथा हि विशेषधर्मस्य प्रयत्नानन्तरीयकत्वस्य दर्शनं निश्चयकारणमस्तीति निश्चयोत्पत्तिरेवं सामान्यधर्मस्यैन्द्रियकत्वस्य दर्शनसंशयकारणमस्ति। संशयेन प्रत्यवस्थानं संशयसम इति संशयसमा साधर्म्यसमातो न भिद्यत इति चेन्न उभयैकसाधर्म्यभेदात्। उभयसाधर्म्यात् संशयसमः। एकसाधर्म्यात् साधर्म्यसम इति सूत्रार्थः ।५।१।१४।

अस्योत्तरम्—

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ।५।१।१५।

साधर्म्यात् सामान्यधर्मदर्शनात् संशये न संशयो वैधर्म्याद्विशेषदर्शनादुभयथा वा सामान्यविशेषदर्शनाभ्यां संशयेऽत्यन्तं नित्यसंशयप्रसङ्गो नित्यत्वान-

भ्युपगमाच्च सामान्यस्य साधारणधर्मस्य नित्यं संशयहेतुत्वेनानभ्युपगमाच्च । प्रतिषेधः संशयसमलक्षणप्रतिषेधो नास्तीति न साधर्म्यस्यैन्द्रियकत्वस्य दर्शनमात्रं संशयकारणमपि तु विशेषदर्शनसहितम् । विशेषस्य प्रयत्ननान्तरीयकत्वस्य दर्शने तु न तद्रहितं सामान्यदर्शनमस्तीति संशयसमस्यानुत्थानमिति सूत्रतात्पर्यार्थः ।५।१।१५।

[प्रकरणसमप्रकरणम्]

उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ।५।१।१६।

उभयेन नित्येन च साधर्म्यात् **प्रक्रियासिद्धेः** पक्षप्रतिपक्षयोः प्रवृत्तिसिद्धेः प्रकरणानतिवृत्त्या प्रत्यवस्थानं प्रकरणसमः । उपलक्षणञ्चैतत् उभयवैधर्म्यादित्यपि द्रष्टव्यम् । यथा अनित्यः शब्दः प्रयत्ननान्तरीयकत्वात् घटवदित्येकः पक्षं प्रवर्तयति । द्वितीयश्च नित्यः शब्दः श्रावणत्वात् शब्दत्ववदित्युभयधर्मस्योदाहरणम् । यथा नित्यः शब्दः कृतकत्वादाकाशवदित्येकः, नित्यः शब्दोऽस्पर्शत्वाद्घटवदित्यपरः । एवञ्च सत्यनित्यनित्यसाधर्म्यान्नित्यवैधर्म्याद्वादिनः साधनात् प्रकरणमनतिवर्तमानान्निर्णयान्निष्पत्तिरिति ।

ननु संशयसमातः प्रकरणसमा न भिद्यते । तत्रापि उभयसाधर्म्यमिहापि इति नोभयपक्षसिद्ध्यसिद्धिभेदाद्भेदोपपत्तेः । प्रकरणसमायां तु वादी स्वपक्षविनिश्चयेन परपक्षं दूषणीयमिति बुद्ध्या प्रत्यवतिष्ठते । संशयसमायां तु वादी साधनेन साधर्म्यमात्रापादनेन [प्रतिवादी] तु स्वपक्षनिश्चयेनेति । साम्यापादनञ्च सद्दूषणैर्न साधनेनेति ।५।१।१६।

अस्योत्तरम्—

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ।५।१।१७।

प्रतिपक्षात् प्रतिपक्षसाधनात् **प्रकरणस्य** प्रतीयमानस्य साध्यस्य **सिद्धेः प्रतिषेधस्य** प्रतिवादिसाधनस्य स्वपक्षसिद्धिद्वारेण परपक्षसाधनप्रतिषेधनस्यानुपपत्तिस्तस्मात् प्रतिपक्षोपपत्तेरिति । अयमर्थः द्वयोः साधनयोस्तदानीमगृह्यमाणविषययोः समानबलयोश्चायमात्मीयात् साधनात् स्वपक्षसिद्धिमिच्छति प्रतिवादी । ततश्चानिच्छन्नपि वादिनाऽपि साधनात् बलात् पक्षसिद्धिमभ्युपगमयितव्यः । अन्यथा राजकुलस्थितिप्रसङ्गात् । एवं च तयोरपि फलतो व्यभिचारः सिद्धो भवति ।

न च विरुद्धाव्यभिचारी स भवति । वस्तुनो द्वैरूप्यप्रसङ्गादिति प्रकरणसमस्य प्रतिषेधस्यानुपपत्तिरिति । ननु प्रकरणसमाद्धेत्वाभासादस्य को विशेषः ?

अयं विशेषः। स्वसाध्यनिर्णयेन परसाधनविघ्नबुद्धया प्रतिवादिना साधनं प्रयुज्यमानं प्रकरणसमजात्युत्तरं भवति। सत् प्रतिपक्षतया वादिनः साधनमनिश्चायकं करोमीति बुद्धया प्रतिपक्षसाधनं प्रयुज्यमानं सदुत्तरं भवतीति ।५।१।१७।

[अहेतुसमप्रकरणम्]

त्रैकाल्यासिद्धेः हेतोरहेतुसमः ।५।१।१८।

हेतोस्त्रिष्वपि कालेष्वसिद्धेः हेतुरहेतुना न विशिष्यते अहेतुसाम्यात् प्रत्यवस्थानमहेतुसम इति सूत्रार्थः ।५।१।१८।

अस्योत्तरम्—

[न] हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः ।५।१।१९।

नोत्पद्यमानमहेतुत उत्पद्यते ज्ञाप्यमानमहेतुतो वा ज्ञाप्यते। ततश्च न हेतोस्त्रैकाल्यासिद्धिः लोकप्रमाणविरोधादिति सूत्रार्थः ।५।१।१९।

[अर्थापत्तिसमप्रकरणम्]

[1]अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ।५।१।२०।

अनित्यः शब्द इत्यर्थापत्त्या प्रतिपक्षं साधयतोऽर्थापत्तिसमः प्रतिषेधो भवति। साधर्म्यसमादौ वाद्यभिप्रायवर्णनमित्येतावता भेदो द्रष्टव्यः ।५।१।२०।

अस्योत्तरम्—

अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वात्
[अनैकान्तिकत्वाच्चार्थापत्तेः] ।५।१।२१।

तदेतत् खल्वनुक्तं वचनाल्लभ्यते यत्कल्पनामन्तरेण वचनार्थो न घटते। पीनो देवदत्तो दिवा न भुङ्क्ते इत्युक्ते रात्रौ भुङ्क्त इति वाक्यार्थोपपादने तस्य सामर्थ्यात्। न त्वव्यभिचारिणः साधर्म्यात् साध्ये साध्यमानेऽर्थादुक्तं भवति। व्यभिचारिणापि साधर्म्येण साध्यं साधयितव्यमिति। तस्य वाक्यार्थोपपादनेऽसामर्थ्यात्। तदन्तरेणापि वाक्यार्थोपपत्तेः। यदि पुनरनुक्तमात्रस्यार्थादापत्तिः ततस्त्वया नित्यत्वापादने शब्दस्योच्यमाने अनुच्यमा[नमनित्यत्वं प्रत्येतव्यम्] अनित्यत्वपक्षस्य हेतोरुपपत्तिः। तस्या अप्यनित्यत्वादिति सूत्रार्थः।

१—इतः पूर्वं सूत्रमेकं सर्वत्रोपलभ्यमानमत्र नास्ति—"प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः"।

नहि घनस्य ग्राव्णः पतनमित्युक्ते द्रवस्योदकस्यापतनमर्थाल्लभ्यत इति व्यभिचार इति सूत्रार्थः ।५।१।२१।

[अविशेषसमप्रकरणम्]

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गाद् सद्भावोपपत्तेरविशेषसमः ।५।१।२२।

एकस्य प्रयत्नानन्तरीयकत्वस्य[घटसाधर्म्याद्]पपत्तेः[घटशब्द]योरविशेषः। अनित्यत्वे सति सर्वेषामविशेषप्रसङ्गः। कस्मात् सद्भावोपपत्तेरिति।

अथ [साधर्म्यसमविशेष] समयोर्भेदोऽभिधेय इति ? अस्योत्तरम्—

क्वचिद्धर्मोपपत्तेः क्वचिच्चानुपपत्तेः प्रतिषेधाभावः ।५।१।२३।

क्वचित्साधर्म्ये प्रयत्नानन्तरीयकत्वादौ सति शब्दादेर्घटादिना समानधर्मस्य घटधर्मस्यानित्यत्वस्योपपत्तेः क्वचिच्च साधर्म्ये शब्दस्य भावमात्रेण सह सत्त्वादौ सति भावमात्रधर्मस्यानुपपत्तेः प्रतिषेधाभावः। कस्मादविनाभावसंपन्नस्य साधर्म्यस्य गमकत्वादन्यस्य सत्त्वादेरगमकत्वादिति सूत्रार्थः ।५।१।२३।

[उपपत्तिसमप्रकरणम्]

उभयकारणोपपत्तेरुपपत्तिसमः ।५।१।२४।

उभयस्य नित्यानित्यत्वस्य कारणोपपत्त्या प्रत्यवस्थानमुपपत्तिसमः। यद्यनित्यत्वस्य कारणमुपपद्यते शब्दस्येत्यनित्यः। एवं नित्यत्वस्यापि कारणमुपपद्यते अस्पर्शत्वमिति नित्यः स्यादिति। प्रकरणसमायां जातौ पक्षप्रतिपक्षसाधनयोः समानबलत्वेऽपि प्रतिवादी स्वसाधनात्स्वपक्षसिद्ध्या वादिनः साधनदूषणे प्रवर्तते। उपपत्तिसमायान्तु स्वसाधनेनैवेति विशेषो बोद्धव्य इति ।५।१।२४।

अस्योत्तरम्—

उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः ।५।१।२५।

नित्यत्वकारणमप्यस्योपपद्यत इति [ब्रुवताऽभ्यनुज्ञातमनित्य]त्वकारणम्। तथा च विरोधादुत्तरपक्षोत्थानमयुक्तमिति सूत्रार्थः ।५।१।२५।

[उपलब्धिसमप्रकरणम्]

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ।५।१।२६।

निर्दिष्टस्य साध्यधर्मकारणस्याभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानमुपलब्धिसमः । यथा अनित्यः शब्दः सामान्यविशेषवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वादित्युक्ते सर्वमनित्यमित्यध्यारोप्य दूषयति—नह्ययं हेतुः सर्वस्मिन्ननित्ये वर्तते द्वयणुकादौ व्यभिचारादिति सूत्रार्थः ।२।१।२६।

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ।५।१।२७।

कारणान्तरात् ज्ञापकान्तरात् अपि तद्धर्मोपपत्तेरपक्षीकृतानां न पूर्वोक्तः प्रतिषेधः । पक्षीकृतेषु प्रकृतस्यापि ज्ञापकत्वस्यानपायादनुक्ताध्यारोपस्यायुक्तत्वाच्चेति सूत्रार्थः ।५।१।२७।

[अनुपलब्धिसमप्रकरणम्]

तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ।५।१।२८।

न प्रागुच्चारणाच्छब्दस्य सतोऽनुपलब्धिरावरणादेरनुपलब्धेरित्युक्ते जातिवाद्याह—तेषामावरणादीनामनुपलब्धिर्नोपलभ्यते, उपलभ्यमानत्वे तूपलब्धिरूपतयानुपलब्धित्वानुपपत्तेः । तथा चानुपलब्धेर[नुपलम्भाद]नुपलब्धिर्नास्तीति आवरणाद्युपलब्धिसिद्धेरावरणादिसिद्धिरिति आवरणानुपलब्धौ च समयानुपलब्ध्या प्रत्यवस्थानमनुपलब्धिसम इति सूत्रार्थः ।५।१।२८।

अस्योत्तरम्—

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ।५।१।२९।

आवरणाद्यनुपलब्धिर्नास्ति, अनुपलम्भादित्ययमहेतुः । कस्मात् ? अनुपलम्भात्मकत्वादनुपलब्धेः । उपलम्भाभावमात्रत्वादनुपलब्धेः । उपलम्भाभावो अनुपलब्ध्या निश्चीयते, नत्वात्मनः । यद्यात्मनोऽप्यभावो निश्चीयते तदावरणानुपलब्धेरनुपलब्ध्याऽपि स्वभावो निश्चीयते । ततश्चावरणानुपलब्धिसिद्धेरावरणाभावसिद्धिरिति प्रतिषेधानुत्थानमिति सूत्रार्थः ।५।१।२९।

ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम् ।५।१।३०।

आवरणानुपलब्धेरनुपलम्भादित्यसिद्धो हेतुः। तस्याः प्रतिपुरुषं संवेद्यत्वात्। नाप्युपलब्धिरूपतयानुपलब्धित्वहानिरुपलम्भाभावतदुपलब्ध्योरत्यन्तविलक्षणत्वादिति सूत्रार्थः ।५।१।३०।

[अनित्यसमप्रकरणम्]

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गोऽनित्यसमः ।५।१।३१।

अनित्येन घटेन साधर्म्यादनित्यः शब्दस्ततोऽनित्येन घटेन सर्वभावानां साधर्म्यमिति सर्वस्यानित्यत्वं प्रसज्यत इत्यनित्यत्वेन प्रत्यवस्थानमनित्यसमः। अविशेषसमातोऽनित्यसमा न भिद्यत इति चेत् सर्वाविशेषसर्वानित्यत्वप्रसङ्गभेदाद्भेदोपपत्तिरिति सूत्रार्थः ।५।१।३१।

अस्योत्तरम्—

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ।५।१।३२।

यदि घटसाधर्म्यात् प्रतिषेध्यस्यानित्यत्वस्यासिद्धिः तर्हि प्रतिषेध्यस्याप्यसिद्धिः। कस्मात् ? प्रतिषेध्यसाधर्म्यात्। प्रतिषेध्येन पक्षेण साधर्म्यस्य प्रतिज्ञादियोगस्य प्रतिषेधस्य विद्यमानत्वात्। साधर्म्यस्य विशेषस्य गमकत्वाच्चानित्यसमस्यानुत्थानमिति सूत्रार्थः ।५।१।३२।

[नित्यसमप्रकरणम्]

[1]नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ।५।१।३३।

अनित्यः शब्द इति प्रतिज्ञा[य]ते। तदनित्यत्वं [किं] शब्दे नित्यम् अथानित्यम् ? तद्धर्मस्य नित्यत्वात्तद्धर्मिणोऽपि नित्यत्वम्। अथानित्यस्तर्हि अनित्यत्वस्याभावान्नित्यः शब्द इति नित्यत्वेन प्रत्यवस्थानं नित्यसमः ।५।१।३३।

१—सूत्रमिदं सर्वत्रोपलभ्यमानमत्र नास्ति—दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य हेतुत्वात्तस्य चोभयथा भावान्नाविशेषः।

अस्योत्तरम्—

प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः ।५।१।३४।

प्रतिषेध्ये शब्दे नित्यमनित्यभावादित्युच्यमानेऽनुज्ञातं शब्दस्यानित्यत्वम् । अनित्यत्वोपपत्तेर्नानित्यः शब्द इति प्रतिषेधो नोपपद्यते। अथ तु नानुज्ञायते नित्यत्वमनित्यत्वस्याभावादिति हेतुर्न भवतीति हेत्वभावात् प्रतिषेधानुपपत्तिरिति सूत्रार्थः ५।१।३४।

[कार्यसमप्रकरणम्]

प्रयत्नकार्यानेकत्वात् कार्यसमः ।५।१।३५।

अनित्यः शब्दः प्रयत्नानन्तरीयकत्वादित्युक्ते यदा जातिवादी प्रयत्नान्तरमुपलब्धेरिति हेत्वर्थाध्यारोपेण प्रतिषेधति प्रयत्नानन्तरमुपलभ्यमानमनित्यञ्च दृष्टम् । शब्दोऽपि किं नित्य उतानित्य इति तदा कार्यविशेषेण प्रत्यवस्थानात् कार्यसम इति सूत्रार्थः । विशेषोपलब्धिविवक्षयोपलब्धिसाधर्म्यात् संशयसमः, तदविवक्षया हेत्वर्थाध्यारोपेण कार्यसमः, साधर्म्यमात्रेण साधर्म्यसम इति त्रयाणां परस्परं भेदो द्रष्टव्यः ।५।१।३५।

अस्योत्तरम्—

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणानुपपत्तेः ।५।१।३६।

अनुपलब्धिकारणावरणादेरर्थसत्त्वेन भवदध्यारोपितस्य प्रयत्नानन्तरोपलम्भस्य हेतुत्वेन विवक्षितत्वादित्युत्तरवादिनं प्रति साधनवादिना सम्यक्साधनं स्वसाध्यस्य वक्तव्यम्, तत्त्वनिर्णयावसानत्वात्कथाया इति दर्शितम् ।५।१।३६।

[षट्पक्षीरूपकथाभासप्रकरणम्]

संप्रति समाधानाभाववादिनं प्रति षट्पक्षं दर्श [यति] सूत्रकारः—

प्रतिषेधेऽपि समानो दोषः ५।१।३७।

प्रयत्नकार्यानेकत्वादिति योऽयं प्रतिषेधो जातिवादिनस्तस्याप्यनैकान्तिकः कस्यचित् प्रतिषेधात् कस्यचिदप्रतिषेधादिति सूत्रार्थः ।५।१।३७।

सर्वत्रैवम् ।५।१।३८।

न केवलस्याज्ञाता वयं समाधानाभासवादिनोऽपि सर्वा जातिष्वेषा युक्तिरिति सूत्रार्थः ।५।१।३८।

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद्दोषः ।५।१।३९।

प्रतिषेधो जातिवादिनस्तस्य प्रतिषेधो मूलसाधनवादिनः तस्मिँस्तुल्यो दोष इति जातिवादिनः प्रत्यवस्थानमिति सूत्रार्थः ।५।१।३९।

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसङ्गो मतानुज्ञा ।५।१।४०।

चतुर्थपक्षवादिनं प्रति पञ्चमपक्षे स्थितः साधनवादी मतानुज्ञापादनं करोतीति सूत्रार्थः ।५।१।४०।

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात् समानो दोषः ।५।१।४१।

स्वपक्षे लक्ष्यत इति स्वपक्षलक्षणमनैकान्तिकत्वचोदना अपेक्षानुज्ञोपपत्तिः संभावना। तदयमर्थः। स्थापनाहेतुवादी स्वपक्षोक्तमनैकान्तिकत्वमनुद्धृत्य स्वपक्षे संभाव्यमानमनैकान्तिकत्वदोषं जातिवादपक्षे प्रतिषेधेऽपि समानो दोष [इति] उपसंहृत्य तत्र हेतुं निर्दिशति—ततश्च परेण स्वपक्ष उक्तस्यानैकान्तिकत्वदोषस्य साधनवादिनाभ्युपगमादन्यस्यापि मतानुज्ञा लक्षणो दोषः समान इति षष्ठे पक्षे स्थितस्य जातिवादिनो वचनमिति। चतुर्थषष्ठयोः पक्षयोरर्थाविशेषात् पुनरुक्तदोषप्रसङ्गः समानः। तृतीयपञ्चमयोश्चतुर्थपक्षेणापि द्वितीयपक्षोक्तदोषोऽभ्यनुज्ञायते। षष्ठपक्षेणापि पञ्चमपक्षोक्तदोषः।

एवं तृतीयपक्षेणापि द्वितीयपक्षोक्तदोषोऽभ्यनुज्ञायते, पञ्चमपक्षेणापि चतुर्थपक्षोक्तदोषः। एवं तृतीयचतुर्थयोर्मतानुज्ञा, पञ्चमषष्ठयोर्वादिप्रतिवादिनोः स्वपक्षापेक्षया पुनरुक्तेति सूत्रद्वितयार्थः। षट्पक्ष्यामुभयोरसिद्धिः, प्रथमद्वितीय पक्षयोः विशेषहेत्वभावादन्येषां चतुर्णां पक्षाणां मतानुज्ञापौनरुक्तदोषादुभयोः पक्षयोरसिद्धिरिति। तदेवमन्यतरनिर्णयावसानत्वात् कथाया इति समीचीनमेव

साधनवादी जातिवादिनं प्रति वक्तव्यं प्रायशस्तथा च षट्पक्षी न वर्तते, अन्यथा तु षट्पक्षी प्रवर्तत इति सूत्रतात्पर्यार्थः ।५।१।४१।

इतीह यत्नेन विपञ्चितं मया
समस्तजात्युत्तरमुत्तरान्वितम् ।
क्वचित्प्रयोगः फलमस्य वर्णनं
क्वचित्प्रयुक्तावनुयोग इत्यपि ।।

इति भट्टवागीश्वरविरचितायां न्यायसूत्रतात्पर्यदीपिकायां
पञ्चमाध्यायस्याद्यमाह्निकम् ।।

———

पञ्चमोऽध्यायः ।

द्वितीयाह्निकम् ।

[प्रतिज्ञाहेत्वन्यतराश्रितनिग्रहस्थानपञ्चकविशेषलक्षणप्रकरणम्]

अथेदानीमवसरप्राप्तानां निग्रहस्थानानां विशेषलक्षणार्थं विभागोद्देश-सूत्रम्--

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तर-मर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनु-योज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्चेति ।५।२।१।

निग्रहस्थानानि तानीदानीं द्वाविंशतिधा विभज्य लक्ष्यन्त इति सूत्रार्थः ।

ननु कर्तृकरणकर्मणां कस्य निग्रहः ? कर्तुः । कस्मात् ? स्वातन्त्र्यात् । कर्मकरणयोः पारतन्त्र्याद्यथाकाशेऽसि व्यापारयतः पुरुषस्यापराधो नाकाशस्य नाप्यसेः । तस्मादसमर्थयोः कर्मकरणयोरुपादानाद्विप्रतिपत्त्योस्तदाधारत्वाच्च कर्तुरेव निग्रहो वचनद्वारेण तूद्भाव्यन्त इति न्यूनतादयो वचनदोषा न साक्षादिति ।५।२।१।

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ।५।२।२।

दृष्टश्चासावन्ते निगमने व्यवस्थितश्चेति दृष्टान्तः, स्वश्चासौ दृष्टान्तश्चेति स्वदृष्टान्तशब्देन स्वपक्ष उच्यते । एवं प्रतिदृष्टान्तशब्देनापि प्रतिपक्षः । प्रतिपक्षस्य यो धर्मस्तस्य स्वपक्षेऽभ्यनुज्ञानं प्रतिज्ञाहानिः । यथा अनित्यः शब्द ऐन्द्रियकत्वात् घटवदित्युक्ते सामान्यमैन्द्रियकं नित्यं दृष्टमिति अनैकान्तिकत्वेन प्रतिवादिना प्रत्यवस्थितो वादी यथा सर्वं नित्यमिति सांख्यसिद्धान्तावलम्बनेनानैकान्तिकत्व-मुज्जिहीर्षुः शब्दनित्यत्वमभ्युपैति तदा विपक्षाभावान्नानैकान्तिकत्वं नापि विरुद्धता, किं तर्हि ? प्रतिज्ञातार्थहानिरिति तया गृह्यत इति सूत्रार्थः ।५।२।२।

प्रतिज्ञातार्थविप्रतिषेधे धर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तरम् ।५।२।३।

अनित्यः शब्द ऐन्द्रियकत्वादिति [योऽस्य प्रतिषेधः प्रतिदृष्टान्तेन हेतुव्यभिचारः] सामान्यमैन्द्रियकं [नित्यं] दृष्टमित्यथैन्द्रियकत्वेन प्रतिषेधे कृते धर्मविकल्पात् घटसामान्ययोः सर्वगतत्वात्सर्वगतत्वधर्मभेदात्

[तदर्थं प्रतिज्ञातार्थं] सिद्धयर्थं [शब्दस्यासर्वगतत्वं प्रतिपादयितुम]सर्वगतः शब्द इति योऽसौ निर्देशः स प्रतिज्ञान्तरमिति सूत्रार्थः।

नन्वनैकान्तिकत्वादेवास्य निग्रहो भविष्यति किमर्थं प्रतिज्ञान्तरकल्पन……
……पर्यवसितपद एवं मध्ये प्रतिवादिना हेतोरनैकान्तिक……शब्दस्यासर्वगतत्वं साधयित्वा तेनैन्द्रियकत्वं विशिष्य…सर्वगतः शब्द इति प्रतिज्ञान्तरं कृत्वा …………सहादर्शनभीत्या वा न तत्र हेतुं ब्रवीति। तेन………यथा जोय……
वादी प्रतिज्ञामात्रस्या सा……साधकत्व बुद्धचोपादानादिति मन्तव्यम् ।५।२।३।

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ।५।२।४।

प्रतिज्ञाहेत्वोरिति प्रतियोगिद्वयमात्रोपलक्षण [परम्। तेन दृष्टान्ताद्योऽपि] प्रतियोगिन उपलक्षयितव्याः। लक्ष्यस्थितस्यापि प्रतिज्ञाग्रहण[स्योपलक्षण] परत्वं वेदितव्यम्। तेनैतदुक्तं भवति। येषां वाक्यगतानां पदार्थानां मिथो व्याघातः संबन्धस्मृत्यनपेक्षयैवापाततः प्रती[यते प्रमाणान्तरं च विरोधकं] स विरोधो नाम निग्रहस्थानमिति। यथा गुणव्यतिरिक्तं द्रव्यं तदप्यतिरिक्तत्वात्। यद्यतो भिन्नं तत्सर्वं ततो व्यतिरिक्तं दृष्टम्। यथा घटात् पटो व्यतिरिक्तं च द्रव्यं गुणात्ततो व्यतिरिक्तमित्येवमादि। न च विरुद्धादिहेत्वाभासानां विरोधनिग्रहस्थानत्वप्रसङ्गः। तेषां संबन्धस्मृत्यनपेक्षत्वात् विरोधप्रतीतेस्तदपेक्षत्वादस्येति सूत्रार्थः ।५।२।४।

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयः प्रतिज्ञासन्न्यासः ।५।२।५।

अनित्यः शब्द ऐन्द्रियकत्वाद् घटवदित्युक्ते समान्यमैन्द्रियकं दृष्टं नित्यमित्यनैकान्तिकत्वेन प्रतिषेधे कृते प्रतिवादिना वादिप्रतिज्ञार्थापह्नवेनानैकान्तिकत्वमुज्जिहीर्षुः प्रतिज्ञार्थापनयं करोति। स एवमाहानित्यः शब्द इति। तदा प्रतिज्ञासन्न्यास एव वादिनो निग्रहो नत्वनैकान्तिकत्वमपह्नवे सत्यनैकान्तिकत्वानुपपत्तिरिति सूत्रार्थः ।५।२।५।

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ।५।२।६।

नित्या वेदा अस्मर्यमाणकर्तृकत्वादित्यविशेषेणोक्ते हेतौ जीर्णकयादिना[?] नेकान्तिकत्वेन प्रतिषेधे अस्मर्यमाणकर्तृकत्वे सतीति विशेषमिच्छतो वादिनो हेत्वन्तरं निग्रहस्थानं भवति। पुनस्तस्य हेतोरसामर्थ्याख्यानात् सामर्थ्ये वा हेत्वन्तरोपादानवैयर्थ्यादिति। नन्वनैकान्तिकत्वादेवास्य निग्रहो भविष्यतीति किमर्थं हेत्वन्तरकल्पनेति अनेकान्तिकत्वस्य तु विशेषणेनैव समाहितत्वादिति सूत्रार्थः। ५।२।६।

[निग्रहस्थानचतुष्कलक्षणप्रकरणम्]

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ।५।२।७।

हेतुसाध्यसिद्धौ प्रकृतायां वादी साधनं ब्रूयात् नित्यः शब्द अस्पर्शत्वादिति। अत्रान्तरैः सुखादिभिर्व्यभिचारात् स्वहेतोरसामर्थ्यं पश्यन् तत्प्रच्छादनाय प्रसक्तानुप्रसक्त्या हेतुर्नाम हिनोतेः धातोस्तुनि प्रत्यये कृते कृदन्तं पदमित्याद्यभिधायित्वादिति सूत्रार्थः ।५।२।७।

वर्णक्रमनिर्देशवन्निरर्थकम् ।५।२।८।

अनित्यः शब्दः कचटतपानां जबगडदत्वात् झभघढधवदिति यथा वर्णक्रमनिर्देशो निरर्थकः निरभिधेय एवं यदर्थभेदविवक्षोत्थापितं वचनं तत्सर्वं निरर्थकं निग्रहस्थानम् । तस्य समयेन साभिधेयत्वेऽप्यार्यं प्रत्यनभिधायकत्वेन तत्प्रतिपादकशब्दाप्रतिपत्तेः तदारम्भवैयर्थ्यादिति सूत्रार्थः ।५।२।८।

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ।५।२।९।

यद्वाक्यं वादिना त्रिरभिहितमपि परिषदा प्रतिवादिना वा न ज्ञायते क्लिष्टशब्दमप्रतीतप्रयोगमतिद्रुतोच्चारितमित्यादिना कारणेन तदविज्ञातार्थं नाम निग्रहस्थानं भवति । वादिनः प्रयोगेष्वसामर्थ्यख्यापनादिति सूत्रार्थः ।५।२।९।

पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकम् ।५।२।१०।

यत्रानेकस्य पदस्य वाक्यस्य वा पौर्वापर्येणार्थसंबन्धो नास्तीत्यसंबद्धार्थता गृह्यते तदपार्थकं नाम निग्रहस्थानम् । समुदायार्थासंभवेन वाक्यार्थप्रत्यायन प्रयोजनशून्यत्वात् । यथा दश दाडिमानि षडपूपाः कुण्डं पलं पिण्डमित्यादिना निरर्थकापार्थकयोरभेदः । निरभिधेयत्वनिष्प्रयोजनत्वयोरत्यन्तविलक्षणत्वादिति सूत्रार्थः ।५।२।१०।

[निग्रहस्थानत्रिकलक्षणप्रकरणम्]

अवयवविपर्यासवचनमप्राप्तकालम् ।५।२।११।

अवयवानां यथालक्षणं प्रयोगोऽर्थवत्तिसिद्धस्तद्विपर्यासे त्वाकाङ्क्षाभावेन तत्पूर्वकस्य पदार्थसंबन्धस्याभावादप्राप्तकालं संबन्धनिग्रहस्थानं भवति । यत्रावयवविपर्यासे अवयवार्थसंबन्धो दृष्टस्तत्रापि प्रयोगापेतशब्दवत् मूलानुपूर्वीस्मृत्यैवार्थप्रत्ययो बोद्धव्य इति सूत्रार्थः ।५।२।११।

हीनमन्यतमेनाप्यवयवेन न्यूनम् ।५।२।१२।

प्रतिज्ञादीनां मिलितानां साधनत्वमुपपादितम् । न्यूनत्वे साधनत्वं नास्ति तदभावे न साध्यसिद्धिः । नहि सामग्रीनिष्पाद्यं कार्यं सामग्र्यैकदेशात् भवति । तस्मान्न्यूनं तद्वादिनो निग्रहस्थानमिति सूत्रार्थः ।५।२।१२।

हेतूदाहरणाधिकमधिकम् ।५।२।१३।

यस्मिन् वाक्ये द्वौ हेतू द्वौ दृष्टान्तौ तद्वाक्यमधिकं निग्रहस्थानमिति निष्पादितक्रिये कर्मण्यविशेषाभिधायिनः साधनस्य साधन[न्यायातिपातात्] विवादनादिति [?] सूत्रार्थः ।५।२।१३।

[पुनरुक्तनिग्रहस्थानप्रकरणम्]

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ।५।१।१४।

अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तम् ।५।१।१५।

[तदनेन सूत्रद्वयेन] पुनरुक्तमेकमेव निग्रहस्थानं क्वचिच्छब्दाभ्यासात् क्वचित् पर्यायान्तरात् क्वचिदर्थादिति कथञ्चिदवान्तरभेदविवक्षया त्रिविधमिति । पुनरुक्तप्रयोगे तत्प्रयोजनानुसरणसमाकुलचित्तः प्रथमाभिधानादापाततः प्रतीतमप्यर्थमप्रतीतमिव मन्यमानो न विश्वसितुमर्हति । ततश्च प्रतिपादनाय प्रवृत्तोऽपि न प्रतिपादयेदिति [वि] रुद्धप्रयोजनत्वेन पुनरुक्तस्य निग्रहस्थानत्वं वेदितव्यमिति सूत्रार्थः ।५।१।१५।

[निग्रहस्थानचतुष्कलक्षणप्रकरणम्]

विज्ञातस्य परिषदा त्रिरभिहितस्याप्रत्युच्चारणमननुभाषणम् ।५।२।१६।

प्रतिवादिना न तावत् सर्वं दूषणीयम्, अन्यतमावयवदूषणेनैव साधनस्य दूषितत्वेन दोषान्तराभिधानवैयर्थ्यात् । न खलु मृतो मृत्युना पुनः शक्यो मारयितुम् । एवं दूषितमपि न शक्यं दूषयितुम् । तस्मादन्यतमस्य दूषणस्य परिषदा विज्ञातस्य वादिना त्रिरभिहितस्य तच्छब्देन शब्दान्तरेण वा यदप्रत्युच्चारणं न तदननुभाषणं निग्रहस्थानमन्यथा दूषणाश्रयस्यानिर्देशेन तस्यावयवस्येदं दूषणमिति संशयप्रसङ्गात् । न च सर्वानुवादोऽभिमतः । तथा सत्यदूष्यानुवादद्विरनुवादादिदोषप्रसङ्गादिति सूत्रार्थः ।५।२।१६।

अविज्ञातं चाज्ञानम् ।५।२।१७।

परिषदा विज्ञातस्य दूष्यस्य यदपरिज्ञानं तदज्ञानं नाम निग्रहस्थानं तद्विषयाप्रत्युच्चारणाद्भिन्नमिति सूत्रार्थः ।५।२।१७।

उत्तरस्याप्रतिपत्तिरप्रतिभा ।५।२।१८।

परपक्षप्रतिषेध उत्तरं तद्यदा न प्रतिपद्यते श्लोकपाठादिभिरवज्ञां करोति तदा निगृहीतो वेदितव्यः। इयञ्चाप्रतिभा तत्साधनोपन्यासे द्रष्टव्या साधना-भावे तु पर्यनुयोज्योपेक्षणमिति सूत्रार्थः ।५।२।१८।

कार्यव्यासङ्गात् कथाविच्छेदो विक्षेपः ।५।२।१९।

यत्र कर्तव्यं व्यासज्याभ्युपगतां कथां विच्छिनत्ति इदं मे करणीयं परिहीयते तस्मिन् पर्यवसिते पश्चात् कथयिष्यामीति स विक्षेपो नाम निग्रहस्थानम्। एकतर निग्रहान्तायां कथायां स्वयमेव कथान्तं प्रतिपद्यत इति सूत्रार्थः ।५।२।१९।

[मतानुज्ञादिनिग्रहस्थानत्रिकलक्षणप्रकरणम्]

स्वपक्षे दोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा ।५।२।२०।

परेण चोदितदोषं स्वपक्षेऽभ्युपगम्यानुद्धृत्य परपक्षे दोषं प्रसंजति, भवत् पक्षेऽपि समानो दोष इति। परमतमनुजानातीति परानुज्ञया निगृह्यते परोदित-दोषान्तरापरिज्ञानादिति सूत्रार्थः। उदाहरणं तु भवांश्चौर इत्युक्ते त्वमपि चोर इत्यादि ।५।२।२०।

निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ।५।२।२१।

यो निग्रहप्राप्तं पुरुषं न निगृह्णाति स निगृहीतो वेदितव्यः। कुतः पर्यनु-योज्यस्योपेक्षणात् तद्विषयनिग्रहस्थानापरिज्ञानादिति सूत्रार्थः ।५।२।२१।

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ।५।२।२२।

निग्रहस्थानलक्षणस्य मिथ्याध्यवसायादनिग्रहस्थाने निगृहीतोऽसीति परं ब्रुवन् निरनुयोज्यानुयोगान्निगृहीतो वेदितव्य इति। अनेन च सर्वा एव जातय छलानि च निग्रहस्थानत्वेन संगृहीतानीति मन्तव्यम्। निरनुयोज्यानुयोगात्तेषाम्। हेत्वाभासानान्तु हेतुबुद्ध्योप·····वादिभिरनुत्थानत्वविवक्षयाऽस्मिन् निरनुयो-ज्यानुयोगात्प्रतिवादिनिग्रहस्थानात् भेदेनोपन्यास इति सूत्रतात्पर्यार्थः ।५।२।२२।

[कथकान्योक्तिरूपनिग्रहस्थानद्वयप्रकरणम्]

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः ।५।२।२३।

कश्चित्सिद्धान्तमभ्युपेत्यानियमात् सिद्धान्तविपर्ययाद् यः कथाप्रसङ्गः सोऽपसिद्धान्तो नाम निग्रहस्थानम्। यथाऽनित्यः शब्दो जातिमत्त्वे सत्यस्मदादि-

बाह्येन्द्रियग्राह्यत्वादित्युक्ते **वैशेषिकेण मीमांसकः** प्रत्यवतिष्ठते। अस्ति तर्हि गोत्वसामान्यस्यापि जातिमत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वं सत्ता योगित्वादिति। स पुनः **वैशेषिकस्तदुक्तिमभ्युपेत्य** यदा दूषणान्तरं मृगयते तदा निःसामान्यानि········पसिद्धान्तान्निगृह्यते पूर्वापरविरुद्धार्थाभिधायित्वादिति सूत्रार्थः। ।५।२।२३।

हेत्वाभासाश्च यथोक्ताः ।५।३।२४।

यथैव विभक्ता लक्षणे [न तथैव] तेषां निग्रहस्थानभावो न लक्षणान्तरेण। चकारात् यत् किञ्चिदनुक्तमपि निग्रस्थानमस्ति चेत् तदपि निग्रहस्थान [मिति] सूत्रार्थः ।५।२।२४।

एवं निग्रहवस्तुतत्त्वमखिलं निर्णीतमेतत्पुनः।
ज्ञातं जल्पवितण्डयोर्बहुफलं सूते स्वयं वादिनाम् ॥
························मुखरा जेतुं कथं वादिनः।
शक्यन्ते कथमेवमात्मविषयं ज्ञानं कथं वोच्यते ॥
इति जगति जनानामीशसायुज्यभाजाम्।
अनुपजनित··················भाषणेषु ॥
पशुपतिरपि यस्मै सस्मितः, साधु साध्वि
त्यवददवतु सोऽस्मानक्षपादो मुनीन्द्रः ॥

इति

———

परिशिष्टम्

परिशिष्टम् (१)

आलोचनात्मिका टिप्पणी

१. १. १. 'तत्त्वं ज्ञायतेऽनेनेति' वृत्तिसन्दर्भस्य उपजीव्यो ग्रन्थस्तात्पर्यटीका। तथा हि—"ज्ञायतेऽनेनेति ज्ञानमिति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमुच्यते। पञ्चम्या च तस्य हेतुत्वम्। न हि विषघ्नमन्त्रवत् स्वरूपमात्रेण तदविवक्षितार्थं निःश्रेयसहेतुरिति पदार्थतत्त्वावगमकरणतया शास्त्रमपदिशति न तु स्वरूपेण। शास्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः। तेन शास्त्रस्य निःश्रेयसे कर्तव्ये प्रमाणादितत्त्वावगमोऽवान्तरव्यापार इति। तथा च प्रमाणादिपदार्थतत्त्वं प्रतिपाद्यं प्रतिपादकं च शास्त्रमिति शास्त्रप्रमाणादिपदार्थतत्त्वयोर्ज्ञाप्यज्ञापकभावश्च। प्रमाणादिपदार्थतत्त्वज्ञाननिःश्रेयसयोः कार्यकारणभावलक्षणश्च सम्बन्धः सूचितो भवति"। इह वृत्तौ तु न्यायभाष्यप्रतिध्वनिः समष्टावभिलक्ष्यते।

१।१।२। इह वृत्तेः प्रथमायां पंक्तौ "तदनन्तराभावात्" इत्यनन्तरम् अपवर्ग इति पदं यदि योज्यते तदाऽर्थस्य विसङ्गतिरपहृता भवति। भाष्याद्यभिप्रायस्य निर्यासोऽत्र वर्तते।

१।१।३। भाष्यप्रतिध्वनिरिह वृत्तौ।

१।१।४। वृत्ताविहारम्भे वार्त्तिकस्य कथा समागता पश्चात् तात्पर्यटीकायाः संवादः। तथा हि टीका —"इह द्वयी प्रत्यक्षजातिरविकल्पिका सविकल्पिका चेति। × × × तत्राविकल्पिकायाः पदमव्यपदेश्यमिति सविकल्पिकायाश्च व्यवसायात्मकमिति × × × × तत्र नामरहितमविकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति" इति।

१।१।५। (क) इह वृत्तावारम्भे भाष्यपंक्तिः—"तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं चाभिसंबद्धयते। लिङ्गलिङ्गिनोः संबद्धयोर्दर्शनेन लिङ्गस्मृतिरभिसंबद्धयते। स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽनुमीयते।

तत्र पूर्वं कारणं विद्यते यस्य तत् पूर्ववदिति कारणेन कार्यानुमानम्। यथा मेघोन्नत्या भविष्यति वृष्टिरिति। शेषवत् तत् यत्र कार्येण कारणमनुमीयते। पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वं च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति"

वृत्तौ "यथा नदीपूरेण वृष्टि"रित्यस्य स्थाने नदीपूरेण भूता वृष्टिरिति पाठेऽर्थसङ्गतिर्भवति।

सामान्यतो दृष्टस्यानुमानस्योदाहरणं वार्त्तिकतोऽत्र संगृहीतम्।

(ख) इहाथवा कल्पो वार्त्तिकतः संगृहीतः। "त्रिविधमिति अन्वयी, व्यतिरेकी, अन्वयव्यतिरेकी चेति"।

तत्रान्वयव्यतिरेकी विवक्षिततज्जातीयोपपत्तौ विपक्षावृत्तिः। अन्वयी विवक्षिततज्जातीयवृत्तित्वे सति विपक्षहीनः। व्यतिरेकी विवक्षितव्यापकत्वे सति सपक्षाभावे सति विपक्षावृत्तिः।"

१. १. ६. वृत्ताविह वार्त्तिकपंक्तिः सन्दृश्यते। तद् यथा—"प्रसिद्धं साधर्म्यं यस्य प्रसिद्धेन वा साधर्म्यं यस्य सोऽयं प्रसिद्धसाधर्म्यो गवयस्तस्मात् प्रसिद्धसाधर्म्यात्" इति।

इदमत्राभिधेयम्। उपमाननिरूपणे भाष्यमतं वार्त्तिकतात्पर्यटीकामताद् भिन्नमिति प्रतिभाति। यद्यपि उपमितिज्ञानविषये ज्ञानस्वरूपे वा न कश्चिदपि भेदः। उभयानुसारेण संज्ञासंज्ञिसम्बन्ध एवोपमितिविषयस्तथापि उपमितिकरणस्वरूपे च भेदः परिलक्ष्यते। गवयदर्शनसमये गोसदृशो गवय इत्यतिदेशवाक्ये यत्सादृश्यमुक्तं तदेवोपमितेः करणमिति भाष्यमतं प्रतिभाति। यतोऽत्र तद्वाक्यमेवात्र उपमाननाम्नोक्तम्। वार्त्तिकतात्पर्यटीकानुसारेण तु गवयदर्शनानन्तरं यत् तस्मिन् गोसादृश्यं दृश्यते तदेवोक्तातिदेशवाक्यस्मरणसहकृतमुपमितिकरणम्। तथा च वार्त्तिकम्—"आगमाहितस्मृत्यपेक्षं सादृश्यज्ञानमुपमानम्" इति। अत्र तात्पर्यटीका—"पिण्डस्य हि गवयशब्दवाच्यतां पुरुषोऽतिदेशवाक्यस्मरणसहकारिणः प्रत्यक्षात् गवयगताद् गोसादृश्यात् प्रजानन् तेन प्रज्ञाप्यते"। परिशुद्धिस्त्विह—"सादृश्यस्यैव प्रज्ञायमानस्य करणत्वमभिप्रैति" इति।

वृत्तिकृन् न्यायतात्पर्यदीपिकाकारोऽत्र वार्त्तिकं तात्पर्यटीकाञ्चानुगच्छति। अतएव प्रसिद्धिश्चोभयी प्रत्यक्षमयी अनुमानमयी चेति तात्पर्यटीकाप्रतिध्वनिरिहोपलभ्यते।

१. १. ८. इह वृत्तौ न्यायभाष्यस्य सर्वथा संवाद एव।

१. १. १०. वृत्ताविह न्यायभाष्यस्य प्रतिध्वनिः प्रारम्भे पंक्तिसाम्यं च।

१. १. ११. मूर्तान्तरप्रत्ययायोगे सति इत्यत्र पाठः समुचितः। असमूर्तान्तरप्रत्यययोगे सतीति प्रामादिकः पाठ इति मन्ये। अतएव हिताहितप्राप्तिपरिहारलक्षणः परिस्पन्दः दारुयन्त्रादिषु न व्यभिचरतीति तात्पर्यटीका यस्याः प्रतिध्वनिरिह वृत्तिकृता विहितः।

१. १. १२. इह वृत्तौ वार्त्तिकतात्पर्यटीकाद्यभिहितकथायाः सारांशः सन्दृश्यते। म० म० डा० गङ्गानाथझामहाशयविरचिते खद्योताभिधे न्यायभाष्यटिप्पणके एतस्याः वृत्तेः पंक्तिस्तु समुपलभ्यते।

१. १. १७. इह वृत्तौ वार्त्तिकपंक्तिसाम्यं दृश्यते। तथा हि—"शरीरेण मनसा वाचा च। सेयं प्रवृत्तिः प्रत्येकं दश विधा पुण्या पापा च। पुण्या कायेन परित्राणं परिचरणं दानमिति। वाचा सत्यं हितं प्रियं स्वाध्यायश्चेति। मनसा दया अस्पृहा श्रद्धा चेति। विपर्ययेण पापा दशविधैव"।

१. १. १९. इह वार्त्तिकपंक्तिर्वृत्तौ—"पूर्वोपात्तशरीरादिपरित्यागादन्यशरीरोपसंक्रान्तिः स प्रेत्यभाव इति। पुनर्ग्रहणम् संसारानादित्वज्ञापनार्थम्"।

१. १. २०. वृत्ताविह वार्त्तिकतात्पर्यटीकासंवाद एवाभिलक्ष्यते

१. १. २२. नित्यसुखाभिव्यक्तिर्मुक्तिरिति प्राचीनस्यैव कस्यचिद् न्यायसम्प्रदायविशेषस्य मतं खण्डनार्थं न्यायभाष्ये मण्डनार्थं भासर्वज्ञाचार्यप्रणीते न्यायभूषणोपबृंहिते न्यायसारे समवलोक्यते। तत एव प्रभावितोऽयं वृत्तिकार एवं वृत्तिमभिदधाति।

१. १, २३. इह वार्त्तिकमनुसरति वृत्तिकारः। तदीयपंक्तिसाम्यं च वर्तते। "तत्र समानधर्मोपपत्तेर्विप्रतिपत्तेश्च त्रिविध एवं संशय इतरपदविशेषणाद् भवतीति सूत्रार्थः। तत्र विषयस्वरूपानवधारणात्मकः प्रत्ययः संशय इति" एवमन्यापि पंक्तिर्वृत्तेः साम्यं संरक्षति।

भाष्यं यद्यपि संशयस्य पञ्च प्रकारत्वमभिदधाति तेन साकं वार्त्तिकतात्पर्यटीकयोरस्ति मतभेदस्तथापि परवर्तिभिरनेकैः वृत्तिकृद्भिरिह न्यायभाष्यमतोपेक्षा कृतेति नास्ति चिन्तावसरः।

१. १. २४. वार्त्तिकाशयानुसारिणी वृत्तिरिह परिलक्ष्यते।

१. १. २७. वृत्ताविह भाष्यप्रतिध्वनिः।

१. १. २८. वृत्तिरियं वार्त्तिकस्यैव पंक्तिः।

१. १. ३०. इह वृत्तौ तात्पर्यटीकायाः पंक्तिरेवेति पादटिप्पणके प्रदर्शितम्।

१. २. १. तात्पर्यटीकायाः कथालक्षणमिह वृत्तौ—"तथा च नानाप्रवक्तृकविचारविषयवाक्यसन्दृब्धिः कथेति सामान्यलक्षणम्"। अन्यत् सर्वं वार्त्तिकतः संगृहीतम्।

१. २. ५. इह वार्त्तिकस्यैव प्रतिध्वनिः। प्रथमा पंक्तिरपि तत्रत्या।

१. २. ६. इह वृत्तौ भाष्यप्रतिध्वनिः। तथा हि भाष्यम्—"तं विरुणद्धि इति तद्विरोधी—अभ्युपेतं सिद्धान्तं व्याहन्तीति। यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात् अपेतोऽप्यस्ति विनाशप्रतिषेधात्" इति।

१. २. १०. वृत्ताविह वार्त्तिकपंक्तिः—"सामान्यशब्दस्य विशेषानेकसम्बन्धित्वे सति अविवक्षिताध्यारोपेण वचनविघातो यः क्रियते तच्छलमिति वेदितव्यम्"।

१. २. १२. भाष्यस्य संवाद एवेह वृत्तौ।

१. २. १४. इह वार्त्तिकप्रतिध्वनिः।

१. २. १७. इह वृत्तिकृता "अविशेषेण" इति सूत्रांशः परिगृहीतः। अन्यत्र प्रथितस्तु पाठः "अविशेषे वा" इति वर्तते।

१. २. १९. वृत्तिरिह वार्त्तिकतः विप्रतिपत्त्यप्रतिपत्त्योर्लक्षणं संगृह्णाति।

१. २. २०. वृत्तिरिह भाष्यमनुगच्छति । आदितः पंक्तिद्वयं भाष्यात् संगृहीतम् ।

× × × × × ×

२. १. १. (क) वृत्तिकृदिह 'अन्यतरधर्माध्यवसायाद्' इति सूत्रांशं नोल्लिखति अथ च व्याख्यातीति महदाश्चर्यम् । मन्ये प्रतिलिपिदोषात् प्रमादाद् वा तदंशपरित्यागः ।

(ख) इह वार्त्तिकपंक्तिर्वर्तते वृत्तौ—"तत्र यथोद्देशस्तथा लक्षणं तथा परीक्षेति स्थानवतां परीक्षावचनमिति । पूर्वं प्रमाणमुद्दिष्टं लक्षितं च पूर्वमेव तत्परीक्ष्यत इत्यवसर-प्राप्तानि तानि विलङ्घ्य संशयः परीक्ष्यते । किमर्थं क्रमभेदः ? परीक्षाङ्गत्वात्"

(ग) "समानस्य धर्मस्याध्यवसायात् संशयो न समानधर्ममात्रात्" इति वार्त्तिकम् ।

२. १. २. इह वृत्तौ भाष्यपंक्तिः । तथाहि "न विप्रतिपत्तिमात्रादव्यवस्थामात्राद् वा संशयः । किं तर्हि विप्रत्तिपत्तिमुपलभमानस्येति ।"

२. १. ३. वृत्तिरिह तात्पर्यटीकामनुसरति

२. १. ४. भाष्यसंवादोऽत्र वृत्तौ

२. १. ५. भाष्यसंवादोऽत्र वृत्तौ

२. १. ६. इह तात्पर्यटीकामप्यनुसरति वृत्तिः । तथा हि टीका "यदि निर्विशेषणं समान-धर्मोपपत्त्यादि संशयकारणमुच्येत ततः पश्चादकरणात् पूर्वमपि न कुर्यादित्यसंशयः । पूर्वं वा करणात् पश्चादपि कुर्यादित्यत्यन्तसंशयः । न त्वसौ निर्विशेषणः संशयकारणमिति नासंशयो नात्यन्तसंशय इत्यर्थः" ।

इहैवं यदि वृत्तिपाठो भवति तदा सुस्पष्टं प्रतीतिरर्थस्य जायते—"यदि निर्विशेषणं समानधर्मादिकं संशयकारणमुच्यते तदा तदुपपत्तेः पश्चादकरणात् पूर्वमपि न कुर्यादित्य-संशयः । पूर्वं वा करणात् पश्चादपि कुर्यादित्यत्यन्तसंशयः" । यथाश्रुतवृत्तिपाठस्तु प्रामादिक इति मन्ये । सर्वमन्यत् भाष्यानुसारि दृश्यते वृत्तौ ।

२. १. ७. भाष्यपंक्तिरेव वृत्ताविह । केवलं शिष्यशिक्षा वार्त्तिकतः संगृहीता ।

२. १. १०. वृत्तिरिह तात्पर्यटीकानुगामिनी ।

२. १. ११. तात्पर्यटीकयैव वृत्तिरचना कृता । तथाहि तात्पर्यटीकायां—"यौगपद्ये दृष्ट-व्याघातः सूत्रव्याघातश्च । प्रयोगस्तु प्रत्यक्षादयो न प्रमाणत्वेन व्यवहर्तव्याः कालत्रयेऽ-प्यर्थाप्रतिपादकत्वात् । यदेवं न तत् प्रमाणत्वेन व्यवह्रियते । यथा शशविषाणं तथा चैतत् तस्मात् तथेति" ।

२. १. १२. भाष्यपंक्त्यैव वृत्तिर्निर्मिता वर्तते।

२. १. १३. वार्तिकप्रतिध्वनिरिह वृत्तौ। तथा चात्र वार्त्तिकम् "त्रैकाल्यासिद्धेरित्यस्य हेतोरुदाहरणमुपादीयते न वा? यद्युपादीयते, व्याघातो भवति। प्रत्यक्षादीनां चाप्रामाण्याभ्युपगमादुपादीयमानमपि नार्थं साधयति। अथ साधयति व्याघातः। अथ नोपादीयते अप्रदर्शितं हेत्वर्थस्य साधकत्वमिति। अप्रदर्शितदृष्टान्तो हेतुर्न साधक इति सोऽयं हेतुः सर्वैः प्रमाणैर्विप्रतिपिद्धो विरुद्धो भवति"।

२. १. १४-१५. इह भाष्यमनुवक्ति वृत्तिः।

२. १. १६. इह भाष्यकथां प्रथममुक्त्वा पश्चात् सङ्गत्या तात्पर्यटीकाकथामभिदधाति वृत्तिः। तात्पर्यटीकापंक्तिस्तु "यत्पुनराक्षिप्यते यदनियतं न तत् परमार्थसत्। यथा रज्वांमारोपितं सर्पत्वम्" इति दृश्यते वृत्तौ। व्याख्या तु सूत्रस्य भाष्यानुसारिण्येव।

२. १. १७. वृत्ताविह तात्पर्यटीकासंवादः। तथा चात्र टीका—"किं प्रत्यक्षादीनामुपलब्धिः ससाधना निःसाधना वा? यदापि ससाधना तदापि किमेभिरेव प्रत्यक्षादिभिराहो प्रमाणान्तरेण। यदाऽप्येभिस्तदापि किं तयैव प्रत्यक्षव्यक्त्या अथैका व्यक्तिर्व्यक्त्यन्तरेणेति। × × × × × × तत्र तयैव व्यक्त्या तु ग्रहणे आत्मनि वृत्तिविरोधः। × × × × नापि प्रत्यक्षादिव्यतिरिक्तप्रमाणाभ्युपगमो येन विभागसूत्रव्याघातः स्यात्"।

२. १. २०. भाष्यसंवादोऽत्र वृत्तौ। तथा हि भाष्यम्—"यथा प्रदीपप्रकाशः प्रदीपान्तरप्रकाशमन्तरेण गृह्यते। तथा प्रमाणानि प्रमाणान्तरमन्तरेण गृह्यन्त" इति सूत्रावतरणम् वृत्तेरपि। सूत्रस्य व्याख्यावृत्तिरपि भाष्यसंवादिन्येव। तात्पर्यटीकानिर्यासस्तु वृत्तेरुत्तरार्धे समास्वाद्यते। अत एव तत्रत्यपंक्त्या सहाचार्यदेशीया अपि समागता वृत्तौ।

२. १. २१. नैतत् सूत्रमपि तु भाष्यवाक्यम्। भाष्यलक्षणे सूत्रार्थवर्णनेन सह स्वपदवर्णनमपि वर्तते तथाविधमेव वर्णनीयं भाष्यस्य स्वपदस्वरूपं वाक्यमेतत्।

२. १. २२. वृत्ताविह वार्त्तिकसंवादः। तथा ह्यत्र वार्त्तिकम्—"अथेन्द्रियार्थसन्निकर्षोत्पन्नमित्येतल्लक्षणमिति? लक्षणमप्येतन्न भवति। कस्मादुत्पत्तिकारणापदेशात्। इन्द्रियार्थसन्निकर्षोत्पन्नमित्येतत् कारणमपदिश्यते। न च कारणापदेशो वस्तुनो लक्षणम्। नहि घटादेः कार्यस्य मृत्पिण्डादिक्रमोत्पत्तिस्तल्लक्षणम् इति। यदिदं भवता प्रत्यक्षलक्षणकारणमुच्यते इन्द्रियार्थसन्निकर्षोत्पन्नमिति तदसमग्रम्। कस्मात्? अन्यान्यपि प्रत्यक्षस्य कारणानि सन्ति तानि नोक्तानि यथात्ममनः संयोग इत्येवमादीनि" इति।

२. १. २३. वृत्ताविह भाष्यप्रतिध्वनिः। तथा चात्र भाष्यम्—"न चासंयुक्ते द्रव्ये संयोगजन्यस्य गुणस्योत्पत्तिरिति ज्ञानोत्पत्तिदर्शनादात्ममनःसन्निकर्षः कारणम्। मनःसन्निकर्षानपेक्षस्य चेन्द्रियार्थसन्निकर्षस्य ज्ञानकारणत्वे युगपदुत्पद्येरन् बुद्धय इति मनःसन्निकर्षोऽपि कारणम्" इति।

२. १. २४. वृत्ताविह भाष्यसंवादः। "अकारणभावेऽपि ज्ञानोत्पत्तिर्दिगादिसन्निधेरवर्जनीयत्वात्। यदाप्यकारणं दिगादीनि ज्ञानोत्पत्तौ, तदापि सत्सु दिगादिषु ज्ञानेन भवितव्यम्" इतीह भाष्यपंक्तिः।

२. १. २५. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः। तथा चेह टीका—"अत्र ज्ञानस्यात्मलिङ्गत्वमुच्यते। ज्ञानं तावत् कार्यमनित्यत्वाद् घटवत् × × × अतो गुणजातीयं ज्ञानं कार्यत्वे सति विभुद्रव्यसमवायात्। तस्मात् संयोगभेदं कादाचित्कमपेक्षते इत्यर्थात् सिद्ध आत्ममनः-संयोग इति।"

२. १. २६. प्रत्यक्षनिमित्तायौगपद्येत्यादिसूत्रपाठः मातृकायामुपलब्धः किन्तु वृत्तौ यथाप्रसिद्धस्यैव तदयौगपद्येत्यादिपाठस्य व्याख्या सन्दृश्यते। अतोऽत्र प्रामादिकः पाठः सूत्रस्येति मन्ये।

२. १. २७. वृत्ताविह २।१।२२। सूत्रस्य तात्पर्यटीकाया: संवादः तदीयपंक्तिसाम्यं चावलोकनीयम्।

२. १. २८. वृत्ताविह भाष्यवार्त्तिकतात्पर्यटीकानिर्यासः सम्मिलित एवोपलभ्यते।

२. १. २९. वृत्ताविह भाष्यसंवादः।

२. १. ३२. वृत्ताविह वार्त्तिकसंवादस्तथा हि तदीया पंक्तिः—"यदिदमिन्द्रियार्थसन्निकर्षादुत्पद्यते ज्ञानम् अयं वृक्ष इति। एतत् किल प्रत्यक्षं तदनुमानमेव। कस्मादेकदेशग्रहणाद् वृक्षोपलब्धेः। एकदेशमयं गृहीत्वा वृक्षमुपलभते।"

"अवयवसमूहपक्षे तावदवयवान्तराणि द्रव्यान्तरोत्पत्तिपक्षे तानि चावयवीति चेन्न" इति।

२. १. ३४. नैतत्सूत्रतयाभियुक्तैः परिगृहीतम्। भाष्यस्य वाक्यमेतत्स्वपदवर्णनक्रमायातम्।

२. १. ३५. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः। तथाहि तदीया पंक्तिः "अपि चावयविनोऽसत्त्वं मन्यमानेन त्वयैकदेशमात्रोपलब्ध्या वृक्षबुद्धेरनुमानत्वमुक्तम्। न त्वियमेकदेशमात्रोपलब्धिरपि तु तस्य तत्सहचरितस्य चावयविन उपलब्धिलक्षणप्राप्तस्य सिद्धेः" इति। वार्त्तिकपंक्तिरपि—"कस्मादवयविसद्भावात्"।

अस्ति हि अयमेकदेशव्यतिरिक्तोऽवयवी। तस्यावयवस्थानस्योपलब्धिलक्षणप्राप्तस्यैकदेशोपलब्धावनुपलब्धिरनुपपन्ना। किं कारणम्? महदनेकद्रव्यरूपाद्युपलब्धिकारणानि तान्येकदेशवदेकदेशिन्यपि विद्यन्ते। तस्मादेकदेश उपलभ्यते नैकदेशीत्ययुक्तम्"

"नावयविन उपलब्धिर्युक्ता। कस्माद् विकल्पानुपपत्तेः। अयं खलु अवयवेषु वर्तमान एकस्मिन् कार्त्स्न्येन वा वर्तते एकदेशेन वा?"

"एकस्मिन् कृत्स्नैकदेशशब्दासम्भवादप्रश्नः"। "अपि चैकोऽनेकत्र वर्तते इति प्रतिजानानो नानुयोक्तव्यः। कस्मात्? उभयेन व्याघातात्। × × × एवं चानुयोगेऽधिकरणव्याघातः।" तात्पर्यटीकायामिह—यस्तु मन्यते यत् सत् तत् सर्वमनवयवम्, यथा विज्ञानं, सच्चेदं नीलाद्यनुभवावसितमिति स्वभावहेतुः सत्तामात्रव्यापित्वादनवयवित्वस्य। तथा हि एकस्य सत्त्वं विरुद्धधर्मासंसर्गेण व्याप्तम्। तद्विरुद्धश्च विरुद्धधर्मसंसर्गो नीलादीनां सावयवत्वे प्रसज्जन् स्वविरुद्धं विरुद्धधर्मासंसर्गं निवर्तयंस्तद् व्याप्तं सत्त्वमपि निवर्तयति। "युतसिद्धिदोषा" भिधानमपि वृत्तौ तात्पर्यटीकाया एव परिगृहीतम्।

२. १. ३७. वृत्ताविह भाष्यवार्त्तिकयोः प्रतिध्वनिः स्फुटं परिलक्ष्यते

२. १. ३८. वार्त्तिकतात्पर्यटीकयोरनुगामिनी वृत्तिरिह। धारणाकर्षणयोर्लक्षणं वार्त्तिकाद् गृहीतम्। अनुमानाकारस्तात्पर्यटीकायाः संगृहीतः।

"ननु जत्वादिद्रव्यसंग्रहकारिते धारणाकर्षणे" इत्यादि वृत्तिसन्दर्भः वार्त्तिकादत्र गृहीतः।

२. १. ३९. भाष्यस्यारम्भिकी कथा वृत्ताविहोप ̣ ̣ ̣ ं।

२. १. ४०. वृत्ताविह भट्टवागीश्वरः भाष्यवार्त्तिकमार्गानुसरणं कृतं मयेति कण्ठतोऽभिदधाति।

२. १. ४१. वृत्ताविह वार्त्तिकप्रतिध्वनिः।

२ १. ४३. इह भाष्यानुसारिणी वृत्तिः। तथा च तुलनीया भाष्यपंक्तिः—"नाध्वव्यङ्ग्यः कालः, किं तर्हि, क्रियाव्यङ्ग्यः—पततीति यदा पतनक्रिया व्युपरता भवति स पतितकालः। यदोत्पत्स्यते स पतितव्यकालः। यदा द्रव्ये वर्तमाना क्रिया गृह्यते स वर्तमानः काल" इत्यादि।

२. १. ४४. भाष्यानुसारिणी वृत्तिरिह सन्दृश्यते।

२. १. ४६. वृत्ताविह भाष्यवार्त्तिकयोः सारः संगृहीतः।

२. १. ४७. भाष्यपंक्तिमासाद्य वृत्तिर्निर्मितेह

२. १. ४८. भाष्याभिहितस्य पल्लवनमिह वृत्तौ।

२. १. ४९. इह "उपमानमनुमान"मित्यंशः सूत्रस्य भाष्यात् परिगृहीतः सूत्ररूपेणास्य चर्चा तु केवलमिहैव विद्यते। सर्वत्र भाष्यपंक्तितयैवोल्लेखः परवर्तिषु ग्रन्थेषु। वृत्तिरिह भाष्यपंक्तिरेव।

२. १. ५०. वृत्ताविह तात्पर्यटीकासारः संगृहीतः। तद्यथा टीकापंक्तिः—"परार्थमुपमानमिति चेन्मन्यसे सिद्धान्तवादिन् तन्नास्ति। कुतः? स्वयमप्यध्यवसायात्। एवं हि परार्थं

स्याद्यथा गौरेवं गवय इति वाक्यं यदि परस्यैवाध्यवसायं जनयेत् यावतोच्चारयितुरपि अध्यवसायं जनयति ।"

"उपपादितं चैतदुपमानलक्षणे । तस्मात् प्रत्यक्षो गवयः अप्रत्यक्षेण गवा प्रतीयत इति सिद्धम्"

२. १. ५१. वृत्ताविह १।१।६। तमसूत्रस्य तात्पर्यटीकासारांशः संगृहीतः ।

२. १. ५२. वृत्ताविह भाष्यप्रतिध्वनिः ।

२. १. ५४. इह वृत्तौ भाष्यप्रतिध्वनिः । इह "सम्बन्धस्य विद्यमानत्वात्" इत्येतावानेवांशः सूत्रस्यास्य वृत्तिः । "नन्वनेनेति" वृत्तिस्तु अग्रिमस्य सूत्रस्येति प्रतीयते । मातृकामनुसृत्यात्र वृत्तिच्छेदो न विहित इति ।

२. १. ५५. वृत्तिरिह तात्पर्यटीकावाक्यांशादेव निर्मितेति तथा प्रतीयते । तात्पर्यटीकायां— "तथा हि यन्न दुःखेनेत्यादिभिः पदैः स्मारिताः पदार्थाः गुणप्रधानभावेनावस्थिताः संसर्गवन्तः आकाङ्क्षायोग्यतासत्तिमत्त्वे सति पदैः स्मारितत्वात् गामभ्याजेति पदस्मारितपदार्थवत् ।

तथा च पटो भवतीत्येतावन्मात्रं निराकांक्षं यं कंचिद् गुणमाक्षिप्य निवृणोति । रक्तः पटो भवतीत्यत्र तु रक्तपदस्यापि समभिव्याहारात् पटादिसंसर्गपरत्वमिति पटादिसंसर्गमन्तरेण रक्तत्वमपर्यवस्यद् ....परस्परसम्बद्धा भवन्तीति सिद्धयत्येकवाक्यता ।

"अयं पदकदम्बकविशेषः स्मारितपदार्थसंसर्गवान् आकांक्षादिमत्त्वे सति पदकदम्बत्वाद् गामभ्याजेति पदावलीवदिति नापक्षधर्मता । मैवम् । अन्योन्याश्रयापत्तेः । (ता० टी०)

२. १. ५६. भाष्यपंक्तिरियम् । न केनाप्याचार्येण न्यायसूत्रेष्वेतत् परिगणितम् । मुद्रणाशुद्धिरिह । नोपलब्धिरतीन्द्रियत्वादिति शुद्धपाठः ।

२. १. ५७. वृत्ताविह भाष्यप्रतिध्वनिः।

२. १. ५८. वृत्ताविह भाष्यप्रतिध्वनिः । वार्त्तिकपंक्तिश्च संदृश्यते —"यो यत्प्रत्ययनियमहेतुः स तत्संबद्धोऽर्थप्रत्यायको दृष्टः, यथा प्रदीप इति ।"

२. १. ५९. वृत्ताविह वार्त्तिकप्रतिध्वनिः । तद् यथा—"न सम्बन्धकारितं शब्दार्थव्यवस्थानं, किं तर्हि ? समयकारितम् । कः पुनरयं समयः ? अभिधानाभिधेयनियमनियोगः । तस्मिन्स्तूपयुक्ते शब्दार्थव्यवस्था भवतीति" वार्त्तिकम् । "गो शब्दात् सास्नादिमानेवार्थोऽभिधीयते, अश्वशब्दात् केशरादिमानेवेति" वृत्तिपंक्तिस्तात्पर्यटीकायाः संगृहीता । पुनरिह

वार्त्तिकपंक्तिः—"अयं च वाच्यवाचकभावलक्षणः सम्बन्धः स्वाभाविकशब्दार्थसम्बन्धवादिनाप्यनुज्ञेयः।"

२. १. ६०. नैतत्सूत्रं केनाप्याचार्येण सूत्रतया परिगृहीतम्। उपर्युक्तसूत्रस्य भाष्यपंक्तिरियं सूत्रतयेह स्वीकृता। अस्या वृत्तेस्तूपजीव्यो ग्रन्थस्तात्पर्यटीका।

२. १. ६१. वार्त्तिकतात्पर्यटीकयोः प्रतिध्वनिः वृत्ताविह। तद्यथेह वार्त्तिकम्—"न स्वाभाविकः शब्दार्थयोः सम्बन्धः। यदि स्वाभाविकः शब्दार्थसम्बन्धोऽभविष्यत् न जातिविशेषे शब्दार्थव्यवस्थाऽभविष्यत्। अस्ति तु यथाकामं प्रयोगो दृष्टः जातिविशेषे न तु स्वाभाविकेन सम्बन्धेन संवद्धानां जातिविशेषे व्यभिचारो दृष्टः। नहि प्रदीपोऽस्माकमन्यथा प्रकाशयति अन्यथा जातिविशेष इति।"

"आर्याः यवशब्दाद्दीर्घशूकं पदार्थं प्रतिपद्यन्ते म्लेच्छास्तु प्रियङ्गुं प्रतिपद्यन्ते।"

स्वाभाविको हि सम्बन्धः कस्यचिच्छब्दस्य केनचिदर्थेन न सर्वस्य सर्वेण। तथा सति शब्दार्थव्यवस्था न स्यात्" इतीह तात्पर्यटीका।

२. १. ६२. भाष्यप्रतिध्वनिरिह वृत्तौ

२. १. ६३. भाष्यप्रतिध्वनिरिह वृत्तौ

२. १. ६४. उपर्युक्तसूत्रस्य भाष्यपंक्तिरियमिह सूत्रतया परिगृहीता। अस्य च सूत्रस्य वृत्तिस्तात्पर्यटीकायाः पंक्तया निर्मिता। तद्यथा—"ननु यदि निरपेक्षा नेष्टिः साधनं तांस्तर्ह्यनपेक्षमाणौ पितरावेव सम्यक् संयुज्यमानौ पुत्रस्य जनकौ कृतमत्र पुत्रकामेष्टया। अत एव म्लेच्छादीनामपि पुत्रजन्मोपपद्यत इति"

"नान्वयव्यतिरेकगम्यमिष्टेः सहकारित्वमपि त्वागमगम्यं, म्लेच्छादीनां पुत्रजन्म जन्मान्तरीयादृष्टवशादित्यागमप्रामाण्यादनुसरणीयम्।"

२. १. ६५. भाष्यप्रतिध्वनिरिह वृत्तौ।

२. १. ६६. भाष्यप्रतिध्वनिरिह वृत्तौ। अनन्तरं सूत्रमेकं—" वाक्यविभागस्य चार्थग्रहणात्" इति दृश्यते सर्वत्र यदिह नोपलभ्यते।

२. १. ७२. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ।

२. १. ७३. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ। तद् यथेह तात्पर्यटीका "न चैते शौद्धोदनिप्रभृतयः तनुभुवनादीनां कर्तारो येन सर्वज्ञा इति निश्चीयेरन्"

"मन्त्रायुर्वेदवाक्यानि सर्वज्ञकर्तृकाणि महाजनपरिग्रहे सति अलौकिकार्थप्रतिपादकत्वात्" इति

×× 　　 ×× 　　 ××

२

२. २. १. भाष्यप्रतिध्वनिः पंक्तिसाम्यं चेह वृत्तौ ।

२. २. २. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ ।

२. २. ३. भाष्यपंक्तिरेवेह वृत्तौ ।

२. २. ५. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ ।

२. २. ६. भाष्यप्रतिध्वनिरिह वृत्तौ ।

२. २. ७. नैतत्सूत्रं प्रामाणिकेषु न्यायसूत्रपाठेषु क्वचिदुपलब्धमिह तु पूर्वसूत्रस्य तात्पर्यटीका-कथामादाय वृत्तिः संघटिता । तद्यथा तात्पर्यटीका—"यदा खलु सन्नेकत्र नास्ति तदाऽन्यत्रास्ति । यदा वाऽव्यापक एव एकत्रास्ति तदाऽन्यत्र नास्ति सोऽयं स्वशरीर एव व्याप्तिग्रहः सुकरः ।" "न च तस्य सत्त्वेन गेहाभावः शक्योऽपह्नोतुम् येनासिद्धो गेहाभावो न हेतुः स्यात् । गेहाभावेन वा सत्त्वमपह्नूयेत येन सत्त्वमेवानुपपद्यमानं न स्वात्मानं वहिरवस्थापयेत् । तथाहि सत्त्वमात्रं वा विरुद्धयते चैत्रस्य गेहाभावेन गेहसत्त्वं वा चैत्रस्य । न तावद् यत्र क्वचन सत्त्वस्यास्ति विरोधो गेहे असत्तया समानविषयत्वाभावात् । देश-सामान्येन गृहविशेषाक्षेपोऽपि पाक्षिक इति समानविषयतया विरोध इति चेत् न प्रमाण-विनिश्चितस्य सांशयिकेन प्रतिक्षेपायोगात् । नापि प्रमाणविनिश्चितोऽभाव एव पाक्षिकं तस्य गृहसत्त्वं प्रतिक्षिपन् सत्त्वमपि प्रतिक्षेप्तुं सांशयिकत्वं वाऽपनेतुमर्हतीति युक्तमित्यादि"

इह तात्पर्यटीकाया यथासङ्गतार्थप्रतीतिस्तथा न वृत्तेस्तस्याः पाठदोषयुक्त-त्वमिति सुधीभिराकलनीयम् ।

२. २. ८. इह तात्पर्यटीकापंक्तिरेव वृत्तौ ।

२. २. ९. वृत्ताविह ग्रन्थकृतो मौलिको विचारः वार्त्तिकप्रतिध्वनिश्च ।

२. २. १०-११. भाष्यप्रतिध्वनिरिह वृत्तौ । एकमेव सूत्रं विभज्य पठितमिहेति किं प्रयोजनं विभागस्येति सुधीभिराकलनीयम् ।

२. २. १२. वार्त्तिकाशयपरिष्कार इह वृत्तौ ।

२. २. १३. वार्त्तिकाशयपरिष्कार इह वृत्तौ ।

२. २. १५. भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता । म० म० विन्ध्येश्वरी प्रसादद्विवेदिमहाभागा टिप्पणयन्तिस्म स्वसम्पादितन्यायवार्त्तिकपादटिप्पणे—"विश्वनाथपञ्चाननमते नेदं सूत्रं किन्तु भाष्यम् । न्यायसूचीग्रन्थे तु त्रयोदशभिः सूत्रैः प्रमाणचतुष्टयप्रकरणमित्युक्तं किन्तु सूत्रमिदं न दृश्यते तत्र द्वादश सूत्राणि सन्ति न्या० वा० पृ० २८० ।

२. २. १६. वृत्ताविहारम्भे भाष्यपंक्तिसाम्यं पश्चात् तात्पर्यटीकासंवादः। तथा चात्र भाष्यम्—"आदिर्योनिः कारणम्। कारणवदनित्यं दृष्टं संयोगविभागजश्च शब्दः कारणवत्त्वादनित्य इति।" "किमुत्पत्तिकारणं संयोगविभागौ शब्दस्य आहोस्विदभिव्यक्तिकारणम्—इत्यत आह ऐन्द्रियकत्वादिति। इन्द्रियप्रत्यासत्तिग्राह्य ऐन्द्रियकः"। तात्पर्यटीका चात्र—"कार्याणां तु समानदेशानामपि समानेन्द्रियग्राह्याणामपि रूपादीनां संख्यादीनां च दृष्टः कारणनियम इति शब्दानामपि नियतकारणतयोत्पत्तिनियम उपपद्यते" सर्वार्थाव्यवधानेऽपि किञ्चिदेव वस्तु केनचिदेव सामान्येन सम्बद्धं न सर्वं सर्वेणेत्याशयवान् निराकरोति।" "एतेन श्रोत्रसंस्कारेऽप्यनियमो बोद्धव्यः।"

"अत्र चोपचारेण प्रयोगेण तत्कारणं शब्दभेदप्रत्ययमुपलक्षयति। अस्ति हि शुकसारिकामनुष्यवक्त्रप्रभवेषु गकारादिषु स्फुटतरा रूपभेदप्रत्ययाः पुंसाम्।"

"तथा हि औपाधिकत्वमानुभाविकं वा स्याद् यथा कुङ्कुमारुणा तरुणीति। उपपत्तिगोचरो वा" "शुकादिभेदमविदुषोऽपि च काण्डपटाद्यावृते शुकादौ शब्दभेदप्रत्ययो भवति।" "नाप्यौपाधिकत्वमुपपत्तिगोचरः। नहि शब्दस्वरूपसमवायिनो भेदस्यौपाधिकत्वे किञ्चिदस्ति प्रमाणम्। मुखस्येव मणिदर्पणकृपाणगतस्य।" "अपि चौपाधिकत्वपक्षे ताल्वादिसंयोगधर्मो वा तदभिघातप्रेरितध्वनिधर्मो वा तीव्रानुनासिकत्वादिः शब्दे समारोप्यत इत्यास्थेयम्।" "न च मण्डूकवसाक्ताक्षाणामिवानवगतास्मृतोरगाणामपि प्रथमाक्षसन्निपाताद् वंशेपूरगारोप इति साम्प्रतम्। सर्वासामेव भ्रान्तीनां प्रमाणगृहीतारोप्यारोपविषयग्रहणपुरःसरत्वनियमात्।"

वंशानां तावदस्ति भूयः सारूप्यमुरगेण, तेन चैते तन्मात्रेण रूपेण शक्नुवन्ति गृहीताः स्मारयितुमुरगम्।"

२. २. ४२. भाष्यप्रतिध्वनिरिह वृत्तौ।

२. २. ४८. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ।

२. २. ५०. वृत्ताविह भाष्यप्रतिध्वनिः।

२. २. ५१-५२. आक्षेपपरिहारभाष्यपंक्तिरूपेणैतयोरुल्लेखः म० म० गङ्गानाथ झा महाभागैर्विहितोऽस्ति। न्यायसूचीनिबन्धादौ नानयोरस्ति स्वीकृतिर्यद्यपि तथापि वार्त्तिके पाठ एतयोरुपलभ्यते सूत्रतयेति सुधीभिरिह दत्तावधानैर्भवितव्यम्।

२. २. ५४—५५. वृत्ताविह साधर्म्यसमविकल्पसमजात्योरुल्लेखस्तु वार्त्तिकप्रभावात्।

२. २. ५७. वृत्ताविह तात्पर्यटीकाया एव कथा। तद्यथात्र टीका—"इतश्च वर्णविकारानुपपत्तिः, प्रकृत्यनियमादिति। क्षीरजातीयस्य दधिजातीयो विकारो न पुनः कदाचिदपि दधिजातीयस्य क्षीरजातीया विकारा उपलभ्यन्ते। इह तु यथा इकारजातीयस्य यकार-

जातीयो विकारो दध्यत्रेति दृश्यते एवं यकारजातीयस्यापि विकार इकार जातीयो दृश्यते × × × तस्मादनियमान्न प्रकृतिविकारभाव इत्यर्थः।" म० म० गङ्गानाथझा महाभागाः "प्रकृत्यनियमादित्येतावानेवांशं सूत्रतया परिगृह्णन्ति तथैव न्यायसूचीनिबन्धे स्वसम्पादिते भाष्ये च पठन्ति किन्तु वार्त्तिकादाविह निर्दिष्टपाठोऽप्युपलभ्यते।

२. २. ५८ वृत्ताविह भाष्यसंवादः।

२. २. ६०. वृत्ताविह भाष्यसंवादः।

२. २. ६१. वृत्ताविह तात्पर्यटीकापंक्तिसाम्यम्। तात्पर्यटीकाया "इदमत्राकूतमित्यारभ्य पंक्तिरेव सर्वा सन्दृश्यत इह वृत्तौ। "°मनर्त (र्थे)" इति पाठस्तु संशोधनीयः। "°म् नर्तें" इति पाठः साधीयान्।

२. २. ६३. भाष्यसंवादोऽत्र वृत्तौ।

२. २. ६५. भाष्यसंवादोऽत्र वृत्तौ।

२. २. ६९. वृत्ताविह तात्पर्यटीकापंक्तिसाम्यम्। तद्यथेह टीका—"गोशब्दोच्चारणानन्तरं विदितसङ्गतैरेकपदे व्यक्त्याकृतिजातिनिर्भासः प्रत्यय उदयमासादयति न पुनर्यथा गङ्गायां घोषः प्रतिवसतीत्यत्र गौर्वाहीक इत्यत्र वा गङ्गात्वगोत्वावगमोत्तरकालं वाक्यार्थे तत्संबन्धानुपपत्तेस्तदविनाभावेन वा लक्ष्यमाणगुणयोगेन वा तीरं वाहीको वाऽवगम्यते तथेहावगतिः। प्रयोगप्राचुर्यादत्यन्ताभ्यासेनातिशीघ्रतया सन्नपि प्रत्ययक्रमो न लक्ष्यते। शीघ्रतरबाणहेतुकशतपत्रशतव्यतिभेदवदिति चेत्। न असति बाधके बलवति प्रत्ययाभेदप्रथायामन्यथाकरणायोगात्"

"अपि च न रूपिशून्या रूपावगतिः। रूपं च द्रव्यस्य जातिः तेन रूप्यमाणत्वादित्यादि" इह वृत्तेः खण्डितांशस्य परिपूर्तिरपि तात्पर्यटीकापंक्त्या भवति—"प्रतिभासभेदा............" इत्यस्य स्थाने "प्रत्ययाभेदप्रथायामन्यथाकरणायोगादिति पंक्त्या अर्थावगतिः सुलभा।

२. २. ७०. इह वार्त्तिकप्रतिध्वनिः वार्त्तिकस्य च भाष्येण वैमत्यम्।

२. २. ७२. भाष्यसंवादोऽत्र वृत्तौ।

× × ×

३. १. १. भाष्यपंक्तिरियं सूत्रतयेह परिगृहीता। भाष्यसंवादमभिदधाति वृत्तिरिह। तद्यथा—"क्रियाकरणयोः कर्त्रा सम्बन्धस्याभिधानं व्यपदेशः। स द्विविधः, अवयवेन समुदायस्य, मूलैर्वृक्षस्तिष्ठति, स्तम्भैः प्रासादो ध्रियत इति। अन्येनान्यस्य व्यपदेशः—परशुना वृश्चति, प्रदीपेन पश्यति। अस्ति चायं व्यपदेशः, चक्षुषा पश्यति, मनसा विजानाति।

तत्र नावधार्यते किमवयवेन समुदायस्य देहादिसंघातस्य अथान्येनान्यस्य तद्व्यतिरिक्तस्य वेति" भाष्यपंक्तिरेवेह वृत्तौ समवलोक्यते।

३. १. २. वृत्ताविह वार्त्तिकप्रतिध्वनिः। तद्यथा—"दृश्यतेऽनेनेति दर्शनं चक्षुः। स्पृश्यतेऽनेनेति स्पर्शनं त्वगिन्द्रियम्। दर्शनेन दृष्टमर्थं स्पर्शनेन प्रत्यभिजानाति यमद्राक्षं तं स्पृशामि यमस्पाक्षं तं पश्यामीति एकविषयावेतौ प्रत्ययौ प्रतिसन्धीयेते।" "संघातकर्तृकौ दर्शनस्पर्शनविषयौ प्रत्ययौ भविष्यत इति न युक्तम्। संघातस्य नानात्वाबाधनात्। संघातः संहन्यमानतन्त्रो भवतीति संहन्यमानं चानेकम्। अनेकं च प्रतिसन्धानप्रत्ययकारणं न युक्तम्।......... एकेन्द्रियप्रत्ययाविति चेत्.......... तन्नाविषयत्वात्। चक्षुः खलु स्वविषयं प्रतिसन्धातुमर्हतीति यमद्राक्षं स एवायमर्थ इति, न पुनः स्पर्शमिन्द्रियान्तरविषयत्वादिति" वार्त्तिकपंक्तिः।

३. १. ३. वृत्ताविह भाष्य संवादः।

३. १. ५. वृत्ताविह वार्त्तिकप्रतिध्वनिः तदीयपंक्तिसाम्यं च। तद्यथा—"शरीरग्रहणेन शरीरेन्द्रियबुद्धिवेदनासंघातः प्राणिभूतो गृह्यते। शरीरं प्राणिभूतं दहतः प्राणिहिंसा कृतं पापं पातकमित्युच्यते। तस्याभावोऽकर्तुः फलेन सम्बन्धः कर्तुश्चानभिसम्बन्ध इति।" एवं यत्कायचित्तसन्तानप्रभवं कर्म तत्कायचित्तसन्तानप्रभवं फलमिति नास्त्यकृताभ्यागमकृतनाशप्रसंगः।.........न, उक्तोत्तरत्वात्। न सन्तानो नानात्वं बाधते इत्युक्तोत्तरमेतत्" इति वार्त्तिकम्।

३. १. ६. भाष्यप्रतिध्वनिरिह वृत्तौ।

३. १. ७. 'वधात्' इत्यस्य स्थाने 'बाधादिति' पठन्ति न्यायसूत्रविवरणकारा इति खद्योते म० म० डा० गङ्गानाथझा महाशयैरुल्लिखितम्। वृत्ताविह भाष्यसंवादः पंक्तिसाम्यं च।

३. १. ८. प्रासङ्गिकस्यैतस्य चक्षुरद्वैतनिराकरणपरस्य प्रकरणस्य विषये व्याख्यातृषु महान् मतभेदो दृश्यते। न्यायसूचीनिबन्धे तात्पर्यटीकायां च वाचस्पतिमिश्राः एतत् सूत्रमारभ्य पञ्चदशसूत्रपर्यन्तमेकं प्रकरणमभिप्रेत्य तदर्थं चक्षुरिन्द्रियस्य द्वित्वे आत्मनश्चैकत्वे सिद्धे नात्मेन्द्रिययोरभेदः सम्भवतीति वर्णयन्ति।

एतद्धि वार्त्तिककारस्य नाभिप्रेतम्। एतैरुक्तम्—एके इदं प्रकरणमात्मन इन्द्रियव्यतिरेकज्ञापनार्थं वर्णयन्ति। तन्न पूर्वप्रकरणेनैव तत्सिद्धेः। गौतमीयसूत्रप्रकाशकृत् केशवमिश्रस्तु वार्त्तिकमतमनुसृत्य व्याख्यामाख्यातवान्। परं भट्टवागीश्वरस्तु न्यायतात्पर्यदीपिकायामिह तात्पर्याचार्यं वाचस्पतिमिश्रमनुगच्छति। वाचस्पतिमिश्रोऽप्यत्र भाष्यमनुसृतवानिति सुधीभिरालोचनीयम्।

३. १. ९. भाष्यानुसारिणी वृत्तिरिह

३. १. १०. भाष्यानुसारिणी वृत्तिरिह

३. १. ११. वृत्तिरत्र भाष्यमनुगच्छति ।

३. १. १३. वृत्ताविह भाष्याशयपल्लवनं संदृश्यते ।

३. १. १४. वृत्तिरचनेह तात्पर्यटीकापंक्तिभिरेव ।

३. १. १६. अत्र वार्त्तिकपंक्त्या वृत्तिरचना दृश्यते ।

३. १. १७. वृत्तिरत्र वार्त्तिकाभिप्रायं पल्लवयति । वार्त्तिकपंक्तिरप्यादौ संगृह्णाति । इतः परं सूत्रमेकं "नियमश्च निरनुमानः" सर्वत्र न्यायदर्शनेषु समुपलभ्यते किन्तु नास्तीह तस्य समावेशः ।

३. १. १८. पूर्वाभ्यस्तेति ३।१।१९। सूत्रस्यावतरणभाष्यवाक्यं सूत्रतयेह परिगृहीतम् । तदीय भाष्यकथयैव एतत्सूत्रवृत्तिरपि निर्मिता ।

३. १. १९. वार्त्तिकपंक्तिसाम्यं वृत्तौ समवलोकनीयमिह । भाष्याशयपल्लवनमेव वृत्तिकृत् करोति ।

३. १. २०. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. २२. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. २३. भाष्यमनुगच्छतीह वृत्तिः ।

३. १. २४-२५. भाष्याशयपल्लवनमिह वृत्तौ । नैसर्गिकं भाष्यपंक्तिसाम्यं चावलोक्यते ।

३. १. २६-२७. भाष्याशयपल्लवनमिह वृत्तौ ।

३. १. २८. भाष्यवाक्यमेतत् सूत्रतयेह परिगृहीतम् । 'पार्थिवं' इति सूत्रावतरणभाष्ये वाक्यमेतदुपलभ्यते । वृत्तिरपि भाष्यवाक्यार्थबोधिकया तदीयपंक्त्या एव संघटिताऽस्ति ।

३. १. २९. "पार्थिवं गुणान्तरोपलब्धेः" इति प्रामाणिकः सूत्रपाठः । इह वृत्तिकृदुपलब्धेरित्यस्य स्थाने उत्पत्तेरिति पठति किमस्य तात्पर्यमिति नावधार्यते । वृत्ताविह तात्पर्यटीकाशयसंवादः परिलक्ष्यते । भाष्यप्रतिध्वनिस्तु वर्तत एव

३. १. ३३. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. ३४. इह केचिदित्यनेन बौद्धग्रहणम् । तात्पर्यटीकायामिह "कृष्णसारमेव चक्षुरिति बौद्धा" इति पंक्तिर्दृश्यते । इह वृत्तौ तात्पर्यटीकाप्रभावः । विप्रतिपत्तेः संशयः इति प्रतीकमादाय तात्पर्याचार्यः वाचस्पतिः कथयति—तत्र पूर्वः सांख्यनैयायिकयोर्विप्रतिपत्तेः । उत्तरस्तु सौगतनैयायिकयोरिति ।"

३. १. ३५. वृत्तिरिह भाष्यानुगामिनी ।

३. १. ३८. भाष्यपंक्तिमासाद्य वृत्तिर्निमितेह । तद्यथा—"सन्निकर्षप्रतिषेधार्थेनावरणेन लिङ्गेनानुमीयमानस्य रश्मेर्या प्रत्यक्षतोऽनुपलब्धिर्नासावभावं प्रतिपादयति । यथा चन्द्रमसः परभागस्य पृथिव्याश्चाधो भागस्य" इति भाष्यम् ।

३. १. ३९. भाष्यस्याभिप्रायं वृत्तौ स्फुटं प्रकाशयति वृत्तिकृदिह । अनन्तरं सूत्रमेकम्—"अनेकद्रव्यसमवायाद् रूपविशेषाच्च रूपोपलब्धि"रिति वाचस्पतिमिश्रः पठति न्याय सूचीनिबन्धे । इह भट्टवागीश्वरो न परिगृह्णाति । केशवमिश्रेणापि गौतमीयसूत्रप्रकाशे नैतस्य परिग्रहः कृतः । वैशेषिकसूत्रमेतत् भाष्यकृता समुल्लिखितं प्राचीनादेव कालाद् न्यायसूत्रतया—वाचस्पतिमिश्रेण स्वीकृतमिति तत्परित्यागः समुचित एव ।

३. १. ४१-४२. भाष्यपंक्तिद्वयमिह सूत्रतया परिगृहीतं वृत्तिकृता । "अव्यभिचारात्तु प्रतिघातो भौतिकधर्मः" इति सूत्रतया स्वीकृतं वार्त्तिककृतोद्द्योतकरेणेति म० म० विन्ध्येश्वरी प्रसादद्विवेदिसम्पादिते न्यायवार्त्तिके दृश्यते ।

३. १. ४३. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. ४७. वार्त्तिकप्रतिध्वनिरिह वृत्तौ ।

३. १. ४८. भाष्यानुगामिनीह वृत्तिः ।

३. १. ५१. भाष्यसंवादोऽत्र वृत्तौ ।

३. १. ५३. भाष्यसंवादोऽत्र वृत्तौ ।

३. १. ५५. वृत्तिरिह भाष्याभिप्रायं संक्षेपेण परिष्करोति ।

३. १. ५६. भाष्यसंवादोऽत्र वृत्तौ ।

३. १. ५७. भाष्यप्रतिध्वनिरिह वृत्तौ । इतः परं सूत्रमेकं "विप्रतिषेधाच्च न त्वगेका" इति सर्वत्र समुपलभ्यते परमिह तस्य समावेशो न दृश्यते ।

३. १. ५८-५९. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. ६०-६१. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. १. ६२-६३. भाष्यसंवादोऽत्र वृत्तौ ।

३. १. ६६-६७. भाष्यसंवादोऽत्र वृत्तौ ।

३. १. ६८. संसर्गात्त्वनेकगुणग्रहणमिति वार्त्तिक पंक्तिः सूत्रतयेह परिगृहीता ।

३. १. ७२-७३. भाष्यप्रतिध्वनिरिह वृत्तौ। इतः परं सूत्रमेकम्—"तेनैव तस्याग्रहणाच्च" इति दृश्यते सर्वत्र न्यायसूत्रपाठेषु परमिह तन्नास्ति।

× × × × × ×

३. २. २. वृत्तिरिह तात्पर्यटीकाकथामनुवक्ति। तद्यथेह टीका—"वृत्तिमान् किल विषयं प्रत्यभिजानन् आत्मानमपि प्रत्यभिजानाति। न च चेतनो वृत्तिमान्, तस्य कूटस्थ-नित्यत्वात्। अन्यथा पूर्वापरावस्थाभेदवान् न कूटस्थनित्यः स्यात्। परिणामिनित्या तु बुद्धिरुदयव्ययवदनेकवृत्तिमती युज्यत इति भावः"।

३. २. ८. वृत्तिरिह तात्पर्यटीकानुगामिनी। [तथा चात्र टीका—"तस्माद् विभुनि अन्तः करणेऽवश्यंभावि प्रत्यययौगपद्यं न चैतद् दृष्टम्। तस्मादन्तःकरणमण्वित्यर्थः। ननु दीर्घां शष्कुलीं भक्षयतः पञ्चानामपि ज्ञानानां युगपदुत्पादो दृष्ट इति कोऽयं प्रसङ्गः अन्तः करणस्य विभुत्वे युगपदुत्पादः प्रसज्येतेत्यत आह..............। अतिशीघ्रतया युगपदुत्पादाभिमानो न तु तत्र यौगपद्यं भाविकमित्यर्थः"।

३. २. ९. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः पंक्तिसाम्यं च। टीका पंक्तिर्यथेह—"स्फटिकस्य यथैकस्यापि तापिच्छजपार्कणिकारादिकुसुमोपधानभेदाद् भेद औपाधिक एवमन्तः-करणमणेरपि स्वच्छस्येन्द्रियप्रणालिकया तत्तदर्थोपरक्तस्यौपाधिकं नानात्वं वृत्तिरिति"।

३. २. १०. इह वृत्तौ तात्पर्यटीकाप्रतिध्वनिः। अत एव "शाक्यमतावलम्बनेन दूषणमाहेति" वृत्त्यवतरणम्। "स्वमतेन सांख्यपक्षं दूषयित्वा बौद्धैर्यत् सांख्यराद्धान्ते दूषणमुक्तं तद्दूषयितुं बौद्धमतमुपन्यस्यती"त्यत्र तात्पर्यटीका। सूत्रव्याख्यानमपि भाष्यादिसम्मतां तात्पर्यटीकां संवदति।

३. २. ११. वृत्ताविह भाष्यप्रतिध्वनिः।

३. २. १२. तात्पर्यटीकायाः सारमासाद्य वृत्तिरिह निर्मिता। अतएव भावसाम्येन सहात्र पंक्ति-साम्यमपि वर्तते। तात्पर्यटीकायाश्च "लिङ्गतो ग्रहणान्नानुपलब्धि"रिति सूत्रव्याख्यान-पराया अत्र ग्रहणमिति विशेषः। एतत्सूत्रं चेह नाङ्गीकृतं वृत्तिकृता।

३. २. १३. भाष्यप्रतिध्वनिरिह वृत्तौ।

३. २. १४. वृत्ताविह भाष्यप्रतिध्वनिः। अनन्तरमेकं सूत्रं समुपलभ्यते सर्वत्र प्रामाणिकेषु न्यायसूत्रपाठेषु "व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानम्" इति। परमस्येह नास्ति समुल्लेखः।

३. २. १५. इह वृत्तौ वार्त्तिकप्रतिध्वनिः पंक्तिसाम्यं च। तद्यथा—"योऽत्र साधकस्तस्याभ्यनु-ज्ञानादप्रतिषेधः" इति वार्त्तिकपंक्तिः।

३. २. १६. 'नेन्द्रियार्थयोरि'त्यग्रिमसूत्रस्यावतरणभाष्यवाक्यमेतत्सूत्रतया परिगृहीतम् ।

३. २. १७. भाष्याशयोऽत्र वृत्तौ ।

३. २. १९-२०. भाष्यवाक्यमेतत् सूत्रतयेह परिगृहीतम् । वृत्तिश्च भाष्यानुसारिणी ।

३. २. २२. सर्वत्र न्यायसूत्रपाठेषु आदावस्मिन् सूत्रे "इन्द्रियैर्मनस" इत्यधिकमुपलभ्यते यस्येह नास्ति समावेशः । भाष्याशयप्रभावोऽत्र वृत्तौ ।

३. २. २४. वार्त्तिकप्रतिध्वनिरिह वृत्तौ ।

३. २. २५-२७. वृत्ताविह भाष्यप्रतिध्वनिः ।

३. २. ३०. अत्र सूत्रान्ते 'मनस' इत्यधिकपाठः प्रामाणिकेषु न्यायसूत्रपाठेषु समुपलभ्यते ।

३. २. ३१. भाष्यप्रतिध्वनिरिह वृत्तौ तत्पंक्तिसाम्यं च ।

३. २. ३३-३४. भाष्याशयोऽत्र वृत्तौ । इदमिहावधेयम् । 'प्रणिधानादि' सूत्रानन्तरं म० म० विन्ध्येश्वरीप्रसादद्विवेदिमहाभागैः सम्पादिते न्यायवार्त्तिके सूत्रमेकं—"प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्ते यौगपद्यप्रसङ्गः" इत्युपलभ्यते किन्तु स्वकीये खद्योते म० म० गङ्गानाथझामहाभागैरुक्तम्—"प्रातिभवत्तु" इति वाक्यं केचित् सूत्रं मन्यन्ते । तत्प्रमाणाभावादुपेक्ष्य भाष्यस्थमेवेदमाक्षेपवाक्यमिति निर्धारितम् इति ।

३. २. ३५. भाष्याशयोऽत्र वृत्तौ । कस्यचिद् दर्शनमित्युक्तं भाष्यकृता तत्रायं वृत्तिकृत् सांख्यमतं स्फुटं प्रतिपादयति ।

३. २. ३६. वृत्ताविह भाष्यप्रतिध्वनिः । इतः परं सूत्रमेकं "परश्वादिष्वारम्भनिवृत्तिदर्शना" दिति प्रामाणिकग्रन्थेषु समुपलभ्यते किन्त्वत्र वृत्तिकृतोपेक्षितं तदिति ।

३. २. ३७. वार्त्तिकाभिप्रायोऽत्र वृत्तौ तदीयपंक्तिसाम्यं च ।

३. २. ३८. वार्त्तिकप्रतिध्वनिरिह वृत्तौ ।

३. २. ३९. भाष्याशयपरिष्कारोऽत्र वृत्तौ ।

३. २. ४१. भाष्यपंक्तिरेवेह वृत्तौ ।

३. २. ४२. भाष्यवाक्यमेतत् सूत्रतयेह परिगृहीतम् ।

३. २. ४३-४४. भाष्यानुगामिनीह वृत्तिः । इतः परं सूत्रमेकं—"हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञे"ति प्रामाणिकन्यायसूत्रपाठेषु दृश्यते । न चेह वृत्तौ तदुल्लेखस्तस्य वृत्तिर्वा ।

३. २. ४५-४६. वृत्ताविह भाष्याशयप्रकाशः ।

३. २. ५०-५५. भाष्यप्रतिध्वनिरेतेषां सूत्राणामिह वृत्तिषु ।

३. २. ५६-५९. भाष्यप्रतिध्वनिरेतेषां सूत्रेषु ।

३. २. ६०. भाष्यवाक्यमिदं सूत्रतयेह स्वीकृतम् । वृत्तिरपि भाष्यानुसारिणी ।

३. २. ६१. वार्त्तिकप्रतिध्वनिस्तदीयपंक्तिसाम्यं चेह वृत्तौ । तद्यथा—"पूर्वशरीरे या प्रवृत्तिर्वाग्बुद्धिशरीरारम्भलक्षणा तत्पूर्वकृतं तस्य फलं तज्जनितौ धर्माधर्मौ तयोरनुबन्ध आत्मसमवेतयोरवस्थानम् । तेनावस्थितेन प्रयुक्तेभ्यो भूतेभ्यस्तस्य शरीरस्योत्पत्तिर्न स्वतन्त्रेभ्यः" ।

"कः पुनरत्र न्यायः, कर्मतन्त्राणि भूतानि शरीरमारभन्ते न निरपेक्षाणीति । अयं न्यायोऽभिधीयते—पुरुषविशेषगुणप्रेरितभूतपूर्वकं शरीरं कार्यत्वे सति पुरुषार्थक्रिया-सामर्थ्यात् । यत्पुरुषार्थसमर्थं तत् पुरुषविशेषगुणप्रेरितभूतपूर्वकं दृष्टम्, यथा रथादीति" वार्त्तिकम् ।

३. २. ६२. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. २. ६३. "न साध्यसमत्वादिति" प्रामाणिकं सूत्रं समुपलभ्यते इह तु पाठभेद इति सुधीभिराकलनीयम् वृत्ताविह भाष्यप्रतिध्वनिः ।

३. २. ६४-६५. भाष्याभिप्रायपरिष्कार इह वृत्तौ ।

३. २. ६६-६८. भाष्यप्रतिध्वनिरेवंतेषां वृत्तिष्विह ।

३. २. ६९. "एतेनानियमः प्रत्युक्त" इति सूत्रस्य भाष्यवाक्यमेतत् सूत्रतयेह परिगृहीतम् ।

३. २. ७०. भाष्यप्रतिध्वनिरिह वृत्तौ ।

३. २. ७१. इहान्तिमांशस्तु सूत्रस्य "संयोगाद्यनुच्छेद" इति प्रामाणिकैः पठ्यते ।

× × × × × ×

४. १. १. वार्त्तिकाभिप्रायपरिष्कारस्तदीयवृत्तिसाम्यं चेह वृत्तौ । विंशतिप्रकारभिन्नेत्यपि ।१।१।१७। सूत्रवार्त्तिकेऽभिहितमिह पादटिप्पणे प्रदर्शितम् ।

४. १. ३. वृत्ताविह भाष्यप्रतिध्वनिः । तथाहि—"तेषां दोषाणां त्रयो राशयस्त्रयः पक्षाः । रागपक्षः—कामो मत्सरः स्पृहा तृष्णा लोभ इति । द्वेषपक्षः—क्रोध ईर्ष्याऽसूया द्रोहोऽमर्ष इति । मोहपक्षः—मिथ्याज्ञानं विचिकित्सा मानं प्रमाद इति" ।

"नानुपपन्नं, रागद्वेषमोहार्थान्तरभावात् । आसक्तिलक्षणो रागः, अमर्षलक्षणो द्वेषः, मिथ्यो प्रतिपत्तिलक्षणो मोह" इत्यत्र भाष्यम् ।

४. १. ४-६. भाष्यप्रतिध्वनिः सर्वत्र वृत्तिषु ।

४. १. ७. प्रामाणिकपुस्तकेषु "निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्य" इति सूत्रपाठः समुपलभ्यते । इह तु मध्ये किञ्चित्परिवर्तनं दृश्यते ।

४. १. १०. इह वृत्तिपाठस्तु प्रामादिकं इति प्रतिभाति । तात्पर्यटीकापंक्तिसाम्यं वर्तते । किन्तु मन्ये प्रतिलिप्यवसरे लेखकेन विहितः प्रमादः । फलतः—"तस्मादस्मिन् दर्शने न युक्तः" इत्यस्य स्थाने तस्मादस्पन्दनेन युक्त इत्युपलब्धस्तत्र पाठः । पूर्वस्मिन् वाक्ये नकारोऽप्यनावश्यक एव । तात्पर्यटीकापंक्तिरिहैवं विद्यते—"उत्पादोच्छेदौ प्रेत्यभावो न चात्मनो नित्यस्य तौ स्तः तस्मादस्मिन् दर्शने न युक्तः प्रेत्यभावः" । एवमेव भाष्यं वृत्त्याऽपि । पुनश्चाग्रेऽपि तदीया पंक्तिर्यथा "वैनाशिकानां तु सत्त्वोत्पादनिरोधाभ्यां युक्तः प्रेत्यभावः प्रेत्येति ल्यब् मुखं व्यादाय स्वपितीति वद् द्रष्टव्यः । तथा च भूत्वा प्रायणमिति भवनेप्रायणयोः समानकर्तृकत्वमपि उपपन्नमिति पूर्वपक्षः । पूर्वाभ्यस्तसूत्रे आत्मनित्यत्व-व्यवस्थापनात् । सत्त्वोत्पादोच्छेदे च कृतहानाकृताभ्यागमदोषेणाभ्युदयनिःश्रेयसार्थम-प्रवृत्तिः, ऋष्युपदेशानर्थक्यप्रसंगश्च स्वदेहेन्द्रियबुद्धिसंवेदनासम्बन्धोत्पादविनाशौ नित्यस्यात्मनो जन्मप्रायणे तथा चोपपन्नः प्रेत्यभाव इति सिद्धान्त" इति टीका ।

४. १. ११. वृत्ताविह प्रथमा पंक्तिर्भाष्यस्यापरा च वार्त्तिकस्य ।

४. १. १४. तात्पर्यटीकावाक्यमादाय वृत्तेरिह संघटना । अनन्तरं सूत्रद्वयमधोनिर्दिष्टं प्रामाणिकग्रन्थेषु समुपलभ्यते—"व्याघातादप्रयोगः । नातीतानागतयोः कारकशब्द-प्रयोगात्" इति । किन्तु वृत्तावस्यां नास्ति तयोः समावेश इति सुधीभिरालोचनीयम् ।

४. १. १५. इह तात्पर्यटीकावाक्यमासाद्य वृत्तिः संघटिता ।

४. १. १६. इह सूत्रे "न प्रतिषेधः" इत्यस्य स्थाने अप्रतिषेध इति पाठोऽस्त प्रथितः ।

४. १. १७-१९. इह तात्पर्यटीका वाक्यमासाद्य वृत्तिर्निर्मिता । इहेश्वरप्रकरणे वार्त्तिकतात्पर्य-टीकयोर्मतभेदः । वार्त्तिकानुसारं प्रथमसूत्रे सिद्धान्तः द्वितीयसूत्रे आक्षेपस्तृतीयसूत्रे तदाक्षेप-परिहारश्चेति निर्दिष्टम् तात्पर्यटीकानुसारं तु प्रथमसूत्रे पूर्वपक्षः वेदान्त्यभिमतेश्वरो-पादानकारणतायाः । द्वितीयसूत्रे पूर्वपक्षभूतवेदान्त्यभिमतोपादानकारणत्वानपेक्ष निमित्तकारणत्वनिरासः, तृतीये चेश्वरस्य निमित्तकारणत्वसिद्धान्तोपन्यासः । वृत्तिकृदिह तात्पर्यटीकामनुसरति ।

४. १. २०. भाष्यवाक्यमासाद्य वृत्तिरिह संघटिता ।

४. १. २१. एतस्यावतरणवृत्तिः "अत्रादृश्यमाननिमित्तानामित्यारभ्य राद्धान्त इति यावत् पूर्वसूत्रस्य तात्पर्यटीकावाक्यं तत्रैव समावेशयितुमुचितम् किन्तु सूत्रार्थं इति वृत्तिकृतो वृत्तिसमापनशैलीं वीक्ष्य तत्रैव प्रमादात् सूत्रसंख्या प्रतिलिपिकारेण विहितेति विद्वद्भिरवधार्यम् ।

४. १. २१. भाष्यप्रतिध्वनिरिह वृत्तौ ।

४. १. २२. भाष्यप्रतिध्वनिरिह वृत्तौ ।

४. १. २३-२५. वृत्ताविह वार्त्तिकपंक्तिसाम्यं परिलक्ष्यते ।

४. १. २६. भाष्यसंवादोऽत्र वृत्तौ ।

४. १. २७-२८. तात्पर्यटीकावाक्यमासाद्य वृत्तिरिह निर्मिता ।

४. १. ३०. भाष्यप्रतिध्वनिरिह वृत्तौ । इतः परं सूत्रमेकं—"न व्यवस्थानुपपत्तेः" इति प्रामाणिकपुस्तकेषु समुपलभ्यते न चात्र तद् दृश्यते ।

४. १. ३१. वृत्ताविह भाष्यप्रतिध्वनिः पंक्तिसाम्यं च ।

४. १. ३२. तात्पर्यटीकाशयपरिष्कारोऽत्र वृत्तौ तद्वाक्यनिवेशश्चादौ ।

४. १. ३४. वृत्ताविह भाष्यसंवादः ।

४. १. ३५. वार्त्तिकस्य संक्षेपेण सारमादाय तदीयवाक्यैरेव वृत्तिः संघटितेति ।

४. १. ३६. तात्पर्यटीकावाक्यैरिह वृत्तिनिर्माणम् ।

४. १. ३७. अयुक्तमिति प्रामाणिकैः सूत्रान्तिमांशः स्वीकृतः । अहेतुरिति तत्स्थाने वृत्तिकृता पठितम् । तात्पर्यटीकाशयः संक्षेपेण वृत्ताविहाभिहितः ।

४. १. ३८. भाष्यप्रतिध्वनिरिह वृत्तौ ।

४. १. ४४. वृत्ताविह तात्पर्यटीकासारांशः ।

४. १. ४६-४७. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ । इतः पूर्वं सूत्रमेकम्—"उत्पादव्ययदर्शनात्" इति प्रामाणिकेषु सूत्रपाठेषु समुपलभ्यते । न चात्र वृत्तौ तदुपलब्धिः ।

४. १. ५१. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ ।

४. १. ५२. भाष्यप्रतिध्वनिरिह वृत्तौ ।

४. १. ५६. इतः पूर्वं सूत्रमेकं "प्रधानशब्देनानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः" इति प्रामाणिकपुस्तकेषूपलभ्यते परमिह नास्ति ।

४. १. ५७. वृत्ताविह भाष्यप्रतिध्वनिः ।

४. १. ५८. वृत्ताविह भाष्याभिप्रायपरिष्कारः ।

× × × × × ×

४. २. १. तात्पर्यटीकासारांश इह वृत्तौ तदीयपंक्तिसाम्यं च। तद्यथा—"तदेवं संशयप्रमाणप्रमेयाणि परीक्षितानि। प्रयोजनादयोऽपि यत्र संशयस्तत्रैवमुत्तरोत्तरप्रसङ्ग इत्यतिदेशेन परीक्षिता इति षोडशापि प्रमाणादयः परीक्षिताः"।

४. २. २-३. भाष्यप्रतिध्वनिरिह वृत्तौ।

४. २. ६. वार्त्तिकवाक्येन वृत्तिसंघटनमिह। तथाहि वार्त्तिकमत्र—"अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते एकदेशेन वा? तत्र तावत् अवयवा अवयविनि कृत्स्नेन वर्तन्ते। अवयवावयविनोः परिमाणभेदात्। अल्पपरिमाणोऽवयवो महापरिमाणश्चावयवीति अल्पपरिमाणेन महापरिमाणस्याव्याप्तिः। एकद्रव्यश्चावयवः प्राप्नोति। एकावयविवृत्तित्वात्" इति। एतत्सूत्रतः पूर्वं सूत्रमेकं "वृत्त्यनुपपत्तेरपि तर्हि न संशय" इति प्रामाणिकपाठेषूपलभ्यते नास्ति चेह।

४. २. ७. अत्रापि वृत्तौ वार्त्तिकप्रतिध्वनिः।

४. २. १०. इतः पूर्वं सूत्रद्वयं प्रामाणिकसूत्रपाठेषूपलभ्यते "एकस्मिन् भेदाभावात् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः"। "अवयवान्तराभावेऽप्यवृत्तेरहेतुः" इति नास्तीह तयोः समावेशः। भाष्यप्रतिध्वनिश्चेह वृत्तौ।

४. २. ११. इतः पूर्वं सूत्रमेकम् —"स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद् विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः" इति प्रामाणिकेषु सूत्रपाठेषूपलभ्यते। न चेह तदुपलभ्यते।

वृत्तिश्चेह तात्पर्यटीकावाक्यैः संघटिता।

४. २. १२. भाष्याभिप्रायपरिष्कार इह वृत्तौ। इतः परं सूत्रमेकं "परं वा त्रुटेः" इति सर्वत्र सूत्रपाठेषु दृष्टमिह तु तस्य नास्ति समावेशः।

४. २. १५. इतः पूर्वं सूत्रत्रयं प्रामाणिकेषु सूत्रपाठेषु सन्दृश्यते "अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः"। "शब्दसंयोगविभवाच्च सर्वगतम्"। अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्मा" इत्येतेषां समुल्लेखो नास्त्यत्र। वृत्तिश्च वार्त्तिकवाक्यैः संघटिता।

४. २. १६. तात्पर्यटीकायाः सारसंक्षेपोऽत्र वृत्तौ। अनन्तरं सूत्रमेकं प्रामाणिकसूत्रपाठेषु समुपलभ्यते—"अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः" इति। न चेह वृत्तिकृता तदुल्लिखितम्।

४. २. १७. वार्त्तिकवाक्यमासाद्य वृत्तिरिह संघटिता।

बुद्धया विविच्यमानानां स्वभावो नावधार्यते।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः॥

इति माध्यमिककारिकाभाव इह तुलनीयः।

इतः परं सूत्र चतुष्टयं—"व्याहतत्वादहेतुः" "तदाश्रयत्वादपृथग् ग्रहणम्" "प्रमाणतश्चार्थप्रतिपत्तेः" "प्रमाणानुपपत्त्युपपत्तिभ्याम्" इति प्रामाणिकेषु पाठेषु समुपलभ्यते न चात्र तदुल्लिखितम् ।

४. २. १८. अत्र वृत्तौ तात्पर्यटीकाप्रतिध्वनिः ।

अनन्तरं सूत्रत्रयं प्रामाणिकेषु सूत्रपाठेषु संदृश्यते—"मायागन्धर्वनगरमृगतृष्णिकावद्वा"। "हेत्वभावादसिद्धिः" "स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः"। इति परमिह वृत्तिकृता नैतान्युल्लिखितानि ।

४. २. २०. तात्पर्यटीकावाक्यैरेव वृत्तिरिह संघटिता । अनन्तरं सूत्रमेकं —"तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेः द्वैविध्योपपत्ति"रिति प्रामाणिकसूत्रपाठेषु दृष्टमिह तु तदनुपलभ्यते ।

४. २. ३३. भाष्यवाक्यमेतद् वृत्तिकृतेह सूत्रतया स्वीकृतम् ।

४. २ः २६ इतः पूर्वं सूत्रमेकम् "अरण्यगुहापुलिनादिषु योगाभ्यासोद्देश" प्रामाणिकसूत्रपाठेषूपलभ्यते न चेह तस्योल्लेखः ।

४. २. २९. भाष्यवाक्यमेतत् सूत्रतयेह वृत्तिकृता स्वीकृतम् ।

×× ×× ××

५. १. २. वार्त्तिकवाक्यैरिह वृत्तिसंघटनम् । तथा चेह तद्वाक्यम्—"साधर्म्येणोपसंहारे तद्विपरीतसाधर्म्येण प्रत्यवस्थानं वैधर्म्येणोपसंहारे तद्विपरीतेन साधर्म्येण प्रत्यवस्थानं साधर्म्यसमः । यथा अनित्यः शब्द उत्पत्तिधर्मकत्वात् । उत्पत्तिधर्मकं कुम्भादि अनित्यं दृष्टम् । यद्यनित्यघटसाधर्म्यादनित्यः, नित्येनाप्याकाशेन साधर्म्यममूर्तत्वमस्तीति नित्यः प्राप्तः । एतस्मिन्नेव हेतावाकाशवैधर्म्यादित्युक्ते यदि नित्याकाशवैधर्म्यादनित्यः नित्य साधर्म्यमप्याकाशेनामूर्तत्वमस्त्यतो नित्यः प्राप्तः । अथ मन्यसे सत्यस्मिन् साधर्म्ये न नित्यः न तर्हि वक्तव्यमनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याच्चानित्य इति" ।

अत्रेदमवधेयम् । वार्त्तिकवाक्यैर्यथा पदार्थसङ्गतिर्जायते न तथा वृत्तिवाक्यैः । वृत्तौ तु पदे पदे दृश्यते प्रमाद इत्युभयोस्तुलनया केनापि ज्ञातुं शक्यते । मन्ये प्रमादोऽयं प्रतिलिपिकर्तुर्न तु मूललेखकस्य वृत्तिकृतः ।

५. १. ३. वार्त्तिकवाक्यान्येवेह वृत्तावपि ।

५. १. ४-५. वार्त्तिकानुगामिनीह वृत्तिः । वार्त्तिकवाक्यान्येव वृत्तौ ।

५. १. ६. इह वार्त्तिकवाक्यानि वृत्तौ । खण्डितांशस्तु "व्यज्ञायि" इति पदेन पूरणीयः ।

५. १. ७-८. भाष्यवाक्यैरिह वृत्तिः संघटिता ।

५. १. ९-१०. भाष्याशयप्रतिध्वनिरिह वृत्तौ ।

५. १. ११. भाष्यवाक्यमेवेह वृत्तौ ।

५. १. १२. वार्त्तिकप्रतिध्वनिरिह वृत्तौ ।

५. १. १३. वृत्ताविह भाष्यपंक्तिः ।

५. १. १४. तात्पर्यटीकावाक्याद् वृत्तिनिर्माणमिह ।

५. १. १५. वार्त्तिकाभिप्रायोऽत्र वृत्तौ ।

५. १. १६. भाष्यवाक्यजातमिह वृत्तौ । केवलमुपलक्षणं चैतदिति तात्पर्यटीकावाक्यम् । "ननु संशयसमेति" सन्दर्भस्तु वार्त्तिकस्य विद्यते ।

५. १. १७. तात्पर्यटीकायाः सारांश इह वृत्तौ । अन्ते तात्पर्यटीकाशयपरिष्कृतावपि वृत्तिकृतो यत्न अवलोक्यते ।

५. १. २०. इतः पूर्वं सूत्रमेकं प्रामाणिकेषु सूत्रपाठेषु समुपलभ्यमानमिह न दृश्यते । तच्च— प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः" । भाष्यवाक्याद् वृत्तिसंघटनमन्तिमं वाक्यं तु तात्पर्यटीकायाः ।

५. १. २१. वृत्तिरिह तात्पर्यटीकावाक्यान्यासाद्य संघटिता ।

५. १. २२. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. १. २३. वृत्ताविह तात्पर्यटीकावाक्यमेव ।

५. १. २४. वृत्ताविह तात्पर्यटीकापंक्तिः ।

५. १. २६. वृत्ताविह वार्त्तिकाशयप्रतिध्वनिः ।

५. १. २८. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. १. २९. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः ।

५. १. ३१. वृत्तिरिह भाष्यवाक्यमासाद्य संघटिता । वार्त्तिकाच्च अविशेषसमातोऽस्यास्तुलना संगृहीता ।

५. १. ३२. वृत्ताविह भाष्यप्रतिध्वनिः । इतः परं सूत्रमेकं—"दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात् तस्य चोभयथा भावान्नाविशेषः" इति प्रामाणिकपाठेषु दृष्टमिह तु नास्ति ।

५. १. ३३. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. १. ३४. वृत्ताविह भाष्यपंक्तिः ।

५. १. ३५. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः ।

५. १. ४१. वृत्ताविह तात्पर्यटीकाप्रतिध्वनिः ।

× × × × × ×

५. २. १-२. वार्त्तिकानुगामिनीह वृत्तिः ।

५. २. ३. भाष्यप्रतिध्वनिरत्र वृत्तौ ।

५. २. ४. तात्पर्यटीकाप्रतिध्वनिरिह वृत्तौ ।

५. २. ५. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. २. ७. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. २. ८. भाष्यप्रतिध्वनिरिह वृत्तौ ।

५. २. ९. इह क्लिष्ट इत्यस्य स्थाने श्लिष्ट इति युक्तं पदम् । इहापि भाष्यानुगामिनी वृत्तिः ।

५. २. १०. वृत्ताविह भाष्यप्रतिध्वनिः ।

५. २. १२. वृत्ताविह तात्पर्यटीकापंक्तिः ।

५. २. १३. वृत्ताविह वार्त्तिकप्रतिध्वनिः ।

५. २. १४-१५. वृत्ताविह तात्पर्यटीकापंक्तिः ।

× × × × × ×

इति

———

परिशिष्टम् (२)

उद्धृता आचार्याः सम्प्रदायाः ग्रन्थाश्च

परिशिष्टम् (३)

न्यायसूत्राणां वर्णानुक्रमसूची

इति

परिशिष्टम् (४)

विशिष्टशब्दसूची

आ

ए

ऐ

औ

क

स

ह